This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 508 विषय

नांव गीत गोविन्दम् (रसमंजरी टीका)

लेखक/लिपीकार श्रीशंकरमिश्र (टीकाकार)

पृष्ठ 91

काळ — पूर्ण/अपूर्ण MSS

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगीतगोविंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी० गो० ॥ श्रीगणेशाय नमः ॥ इह खलु निर्विघ्नप्राप्तिप्सितसमाप्त्यर्थं प्रतिपाद्य राधामाधवकेलिस्म
रणरूपमंगलमादावाचरति ॥ मेघैरित्यादि ॥ राधामाधवयोः रहःकेलयः एकांतक्रीडा जयंति सर्वोत्कर्षेण वर्तं
टि ते ॥ कथंभूतयोः इत्थं अनेनप्रकारेण नंदनिदेशतो नंदस्याज्ञया चलितयोः ॥ कीदृशो नंदनिदेशस्तत्राह ॥ हे
मेघैरित्यादि ॥ हे राधे तत्तस्मात्त्वमेव इमं कृष्णं गृहं प्रापय नय अत्र प्रकारः कोपाक्रोशालोचयंपतयोः तावत् यस्मा प
२ नीतस्तस्मात् त्वमेव गृहमभिप्रापय संनिधापय ॥ कुतोयं जातोयं कृष्णेन कोरात्रौ भीरुः ॥ शिशुलाडनशीलैः ॥ मयहेतुं
तरमाह ॥ मेघैरित्यादि ॥ अंबरमाकाशं मेघैर्मेदुरं स्निग्धं तथा वनभुवः काननभूमयः श्यामास्तमालद्रुमैरलभावहसैः
मेघैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय इत्थं नंदनि ॥१॥
देशतश्चलितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयंति यमुनाकूले रहःकेलयः ॥१॥
रथाना कुत्र जयंतीत्यत आह ॥ प्रत्यध्वेत्यादि । यमुनायाः कूले प्रत्यध्वकुंजद्रुमं ॥ अध्वनि ॥ कुंजेकुंजे द्रुमेद्रुमे इत्यर्थः । यद्वा
अध्वनः कुंजान् द्रुमान् लक्षीकृत्य स्वस्थ । अत्र अयं नक्तं भीरुः इमं गृहं प्रापय तत्र एतस्या देशोद्दिष्टो यावज्जनेन इति सू टी
त्रेण एना देशाः कर्म न भवतीति न वाच्यं । अन्वादेशविषयत्वाभावात् एककियानिर्दिष्टत्वं कथितस्य पुनः कथनमन्वा
देश इति तल्लक्षणं । इह तु नक्तं भीरुरिमनेन भीरुत्वविशिष्टतया निर्दिष्टो माधवस्वरूपेण पुनः नत्रियायात्र बोधितः अंतः प्रति
पद्यते ॥ नत्वक्रियांतरविशिष्टतया कथितस्या यत्क्रिया विशिष्टस्तस्या पुनः कथयामिति तथाचश्रीपतिदत्तः । यत्र कर्त
ते दिकृतया किंचिविधानं तिपाद्यसान्वादेश इति ॥ अबरं व्याप्रि वा समीसमरः ॥ अय वदोषा नक्तं च रजनी तिच । त्रस्तभीरुभी
रुकौ गुरुइत्यपि । निदेशः शासनं शिष्टिश्च । कुंजकुंजौ निकुंज लतादि पिहितोदर इत्यपि ॥ एकांतार्थे रहोव्ययमित्यपि ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते सावधानत्वसर्व्वमितरकाव्यापेक्षया स्वकाव्यस्योत्कर्षं कथयन्नेव प्रकृतकाव्यस्याधिकारिप्रयोजने आह ॥ यदीत्यादि हे
सज्जनगण यदि हरिस्मरणे कृष्णानुचिंतने मनः सरसं सानुरागं यदि च विलासकलासु सविलासः स्त्रीणां हावविशेषः तास्तं वैधिनीषु
कलासु क्रीडासु कुतूहलं कौतुकं तदा जयदेवसारस्वतीं शृणु ॥ कीदृशीं जयदेवसारस्वतीं । मधुरकोमलकांतपदावलीं । म
धुरत्वं द्विविधं शब्दाश्रितं अर्थाश्रितं च । तत्र शाब्दं मधुरत्वं पृथक्पदत्वं । अर्थमधुरत्वं उक्तिवैचित्र्यं तदुक्ता मधुरा तथा कोम
लत्वमपि द्विविधं तत्र शाब्दं कोमलत्वं बंधस्यापरुषत्वं । अर्थकोमलत्वं च परुषस्यार्थस्य परुषत्वं तदुभययुक्ता कोमला ॥ ए
वं कांतत्वमपि द्विविधं तत्र शब्दाश्रितमुज्वलत्वं बंधविशेषादिना मनःश्रोत्रप्रीतिप्रदत्वं अर्थगतत्वं दीप्तरसत्वं तदुभ
यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलं । मधुरकोमलकांतपदावलीं शृणु तदा जयदेवसरस्वतीं ॥३॥
ययुक्ता कांता एतादृशी पदावली पदपरंपरा यत्र तादृशी ॥६॥ शृंगारादौ रसे वीर्ये गुणे नागेंद्रवसे सरस्यमरः ॥ विलासल
क्षणं तु दशरूपके ॥ तात्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु इति ॥ कलास्याच्चंद्रकलायां । कलोस्यात्क्रीडनादि
ष्विति केशः ॥ शब्दमाधुर्यादिलक्षणानि तु वामनेन लिखितानि ॥ बंधे पृथक्पदत्वं च माधुर्यमुदितं बुधैः ॥ अनेनैव
पदन्यासः कामधारा मधुस्रुतः ॥ बंधस्याजरठत्वं च सौकुमार्यमुदाहृतं ॥ एतेन वंचिता बाधाः संतानश्रुति क्षमाः
॥ औज्वल्यं कांतिरित्याहुर्गुणं गुणविपश्चितः ॥ पुराणचित्रस्थानीयं तेन बंध्यं कवेर्वच इति ॥ अर्थमधुरत्वादिलक्ष
णं च वामनेन ॥ तथा च तत्सूत्राणि उक्तिवैचित्र्यं माधुर्यं आपारुष्यं सौकुमार्यं परुषस्यार्थस्य पारुष्यं यथामृते यशः
शेषे इत्यर्थः । दीप्तरसत्वं कांतिरिति ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्र राधिकामुकुन्दसाधारणप्रेमसर्वस्वं सकलजनमनोरमं शृंगाररसगर्भं भगवत्केलिवर्णनरूपं काव्यं क्रियत इत्युक्तिधेयं प्रतिजानीते
॥ वाग्देवतेत्यादि ॥ जयदेवकविः एतं गीतगोविंदाख्यं प्रबंधं करोति ॥ कीदृशं ॥ श्रीलक्ष्मीराधारूपेणावतीर्णा वासुदेवः कृष्णः तयो
रतिकेलिकथया सुरतक्रीडानुवर्णनेन समेतं युक्तं ॥ ननु वासुदेवकेलिवर्णनं बहुषु ग्रंथेषु वर्त्तते इति किमनेन सत आह ॥
ते वाग्देवेत्यादि ॥ वाक्स्वरूपा या देवता सरस्वती तस्याः श्रीरिति तेन प्रसादमाधुर्यादिगुणसंपन्नलोकोत्तरकाव्यरचना
रूपेण विचित्रितं चित्रमालेख्यं तदुत्कंचित रूपे सद्मगृहं यस्य तादृशं ॥ अत्र समकक्षेडमाह्लादकारित्वेन नामावर्णमयेन
वाग्देवताचरितस्य चित्रेण निरूपणं ॥ चित्रं च विचित्रकविता रूपमौषधनिर्धानं तेन हृत्केलिवर्णनादिना संसारतापसंतप्तक ल
जनविश्रामस्थानं तेन च सद्मतया निरूपितं अपरमपि गृहं विविधपुत्रिकाद्यालेख्यमंडितं भवतीति ध्वनिः ॥ तथा च ॥ यद्यपि

वाग्देवताचरितचित्रितचित्तसद्मा पद्मावतीचरणचारणचक्रवर्ती श्रीवासुदेवरतिकेलिकथासमेतमेतं करोति जय
देवकविः प्रबंधं ॥ २ ॥

कृष्णकेलिवर्णनमन्यत्रापि ग्रंथेषु वर्त्तते । तथापि पूर्वैर्वर्णितमपि लोकोत्तरापूर्वसत्काव्यरचनानिबद्धमपि चमत्कारकारि भ
विष्यति ॥ यथा ॥ पुरुषैरभिधीयमाना एवार्था नवीननवरचनभंगिमधिरूढाः अन्यमेव श्रोतृजनचमत्कारं करोतीति नानर्थको
मे प्रयासः इति भावः ॥ पुनः कीदृशः कविः पद्मावतीनामा जयदेवपत्नी तस्याश्चरणयोर्यच्चारणं संचारणं तेन नृत्यमिति यावत् त
तेन चक्रवर्ती सार्वभौम इव सदानंदमयत्वादित्यर्थः । यद्वा । पद्मावती चरणाभ्यां चारणे चक्रवर्ती नंदसार्वभौमः इत्यर्थः ॥ एतेन कवेः
भ कृष्णभक्त्याधिक्यं श्रृंगारिकत्वं च ध्वनितं ॥ तेन सरसकाव्यकरणे अधिकारः सूचितः । तदुक्तं । श्रृंगारी चेत्कविः काव्यं जातं रसमय २
र जगत् । स एव वीतरागश्चेत् श्रृंगारी सर्वा विरसता व्रजेदिति । केचित्तु । पद्मा इति संबोधयते तस्या इति पद्मावती लक्ष्मीस्तस्याश्चरणयोः प्रवृत्त
पृभूतयोः श्चरणं चक्रवर्ती नंदसार्वभौमः । २ सादिनास तत्कृष्णा साधनपरइत्यर्थः । एते दारिद्र्यादि संसारविता दरिद्रण
हिमं गारादिरसापिनतायत इति भाववस्तु । आलेख्यमथयो चित्रमित्यमरः । गृहं गृहोदवसितं वेश्मसद्मनिकेतनं निल
यः । चारणास्तु कुशीलवास्मपि ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰टी॰
७

भक्तजनमनोरथपूरणायैव भगवतस्तत्तदवतारपरिग्रह इतीहापि ममाभिलषिते भगवत्केलिवर्णनरूपे कर्मणि सं
पादितबहुत्रसहनिराकरणं सम्यक् करिष्यतीत्याशयेन भगवतो वताराणामसंख्येयेपि प्रधानतया दशावतारपुरस्का
रेणैव श्रीकृष्णस्तुतिं करिष्यन्नादौ मीनरूपं स्तौतीति॥ प्रळयेत्यादि॥ गीतस्यास्य मालवरागो रूपकतालः॥ तल्लक्षण
तु॥ रूपकस्याद्रुतं लघुरिति संगीतरत्नाकरे॥ गीतार्थस्तु हे केशव जय जय अतिशयेन सर्वोत्कर्षेण वर्तस्व॥ ननु मम स
र्वोत्कर्षेण वृत्तौ कुतः सामर्थ्यमित्यत आह। जगदीशेति। जगतां चतुर्दशभुवनानामीशा नियन्ता। तथा सति सर्वभुवनना
थस्यते तत्र कथं न सामर्थ्यमिति भावः। तत्र हेत्वन्तरमाह॥ हे हरे इति॥ हरति भक्तानां क्लेशमिति हरिः॥ तादृशो को दृश्यत

गीतं॥ मालवरागे॥ रूपकताले॥ प्रळयपयोधिजळे धृतवानसि वेदं॥ विहितवहित्रचरित्र
मखेदं॥ १॥ केशवधृतमीनशरीर जय जगदीश हरे॥ ध्रुवपदम्

मीनशरीरधृतं स्वेच्छया परिगृहीतं मीनस्य शरीरं येन तादृश। एतत्तु ध्रुवपदं प्रतिपदमनुवर्तमानत्वात्। तदुक्तं ध्रु
वताच्च ध्रुवो ज्ञेय इति। अत्र यद्यपि सर्वविद्भवकच्छपरूपेत्यादि भिन्नं भिन्नं पदमस्ति तथापि जय जगदीश हरे॥ ७॥ इदं स्य प्र
तिपदमनुवर्तमानत्वात् ध्रुवत्वं॥ ननु शरीरमात्रमेवं विधं ततोपि तिर्यग्योनिमीनादि शरीरं तन्मया। किमिति परिग्र
हमित्यत आह॥ प्रळयेत्यादि॥ हे प्रळयपयोधिजले॥ प्रळयकालीनाः परस्परं मिलिताये पयोधयः समुद्रास्तेषां
जळे वेदं निमज्जंतं मीनशरीरमुपादाय धृतवानसि। कथं यथा स्यात् विहितवहित्रचरित्रं यथा स्यात्॥ विहितं कृ
तं वहित्रस्य पोतस्य चरित्रं यत्र तत्तथा॥ अत्र पयोधिपदेनैव जळत्वे प्राप्तेपि जळपदोपादानं मत्स्यादिरहितं नतले
न विश्रामस्थळाभावं सूचयितुं॥ तथा च॥ निरीलेपि पयोधौ वेदं धृतवानसीति वेदधारणार्थमेव ते शरीरपरिग्र
ह इति भावः। पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः इत्यमरः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु तद्गुणविशिष्टापि सरस्वती लक्ष्मणसेन महाराजसभासु महाकवीनामुमापतिधरादीनां मध्ये किं श्रोतॄणां न सु
खावहेत्यत आह ॥ वाच इत्यादि ॥ उमापतिधरनामा लक्ष्मणसेनामात्यो वाचः पल्लवयति विस्तारयति । तथा चोमापतिधरस्य व
ग्यार्थगुणशून्यं शब्दविस्तारमात्रं काव्यं न सहृदयहृदयाह्लादजनकमिति भावः ॥ शरणनामा कविर्दुरूहस्य गूढार्थकाव्य
स्य शीघ्ररचने श्लाघ्यः स्तुत्यः । तथा च शरणकवेरपि काव्यं गूढार्थत्वादिदोषयुक्तं प्रसादिगुणरहितं चेति तदपि न विदग्धमनो ८
विनोदास्पदमिति भावः ॥ तथा शृङ्गारोत्तर सत्प्रमेयरचने शृङ्गाररस एवोत्तरः श्रेष्ठो यत्र शृङ्गारेणोत्तरं प्रधानं प्रमेयं उत्त
मवस्तु तस्य रचनैः कविताया ग्रथनैराचार्यगोवर्द्धनसार्द्धं गोवर्द्धनाचार्येण सह स्पर्धावान् कोपि न विश्रुतो न विख्यातः
अत्र शृङ्गारे सादि ना शृङ्गाररसप्रधानकाव्यरचनायामेव तस्य सामर्थ्यं रसान्तरवर्णने तु सोप्यप्रौढ एवेति । तत्काव्यं वर्णनी

वाचः पल्लवयत्युमापतिधरः संदर्भशुद्धिं गिरां जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते ॥ शृङ्गारोत्त
रसत्प्रमेयरचनैराचार्यगोवर्द्धनस्पर्द्धी कोपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः ॥४॥

यार्थस्य शुद्धत्वेपि माधुर्यादिगुणसंपन्नपदरचनायां सोप्यशक्त इति ध्वनितोऽर इतरविषयाध्यायनादिना आचार्यं ल
म सत्कवितारचनायाः प्रयोजकमिति । सोपहास मुक्तमाचार्येति ॥ तथा च तत्कवितापि न सत्कविहृदयंगमेति भावः । धो
यी कविः क्ष्मापतिः धोयीनामकविराजः श्रुतिधरः श्रुतिं श्रवणं तन्मात्राद्वेव ग्रंथादिग्राहकोऽत्र तथा च तस्य उच्चारितमा
त्रग्राहित्वमेव न तु तस्य कवितायां कौशलमिति भावः महाहंकारकथनाय राजोपमा । तथा चाहंकारादेव स्वस्य क
विराजपदवीमानी न वा न सत्कविमध्ये तु तस्य गणनापि नेति भावः ॥ गिरां वचसां संदर्भशुद्धिं गुणालंकारसंपन्नयुग्म
नाविशेषं जयदेव एव जानीते नान्यः अतोऽस्य काव्यश्रवणं तथा न संतोषो यथा जयदेवकविताश्रवणेनेत्येतदेव श्रो
तव्यमिति भावः ॥ पल्लवः किशलये विटपे विस्तरे बलौ इति विश्वप्रकाशः । लघु सिप्रं परं द्रुतमित्यमरः । उत्तरं प्रतिवाक्य
स्यादूर्ध्वोदीच्योत्तमेष्वपीति च

कच्छपरूपं स्तौति ॥ धृतकच्छपरूपेति ॥ हे केशव धृतकच्छपरूप धृतं कच्छपस्य रूपं येन तादृश जय जय ॥ ननु कच्छपरूपं मया
कस्य हेतोर्धृतमित्यत आह ॥ क्षितिरित्यादि ॥ तव पृष्ठे क्षितिः पृथ्वी तिष्ठति ॥ तिष्ठतीति वर्तमानकालनिर्देशेनाधुनापि
तत्पृष्ठे क्षितिस्तिष्ठतीति कच्छपावतारप्रयोजनं सर्वलोकप्रसिद्धमेवेति भावः ॥ ननु पंचाशत्कोटियोजनविस्तृतां पृथ्वीम
त्पृष्ठे कथं स्थितेत्यत आह ॥ अतिविपुलतर इति ॥ अतिशयेन पृथिव्यपेक्षयापि अधिकविस्तीर्णे ॥ पुनः कीदृशे धर
णिधारणकिणचक्रगरिष्ठे धरण्याः पृथ्व्या आधारः पालनं तस्मिन् यः किणः कठिनचर्मविकारः तस्य चक्रं मंडलं तेन गरिष्ठे ॥ कूर्मे कमठ
कच्छपाविति अमरः ॥ व्रणाचिन्हे घुणे किणा इति हारावलिः ॥२॥ वराहावतारं स्तौति ॥ धृतशूकररूपेति ॥ हे केशव धृत
क्षितिरति विपुलतरे तव तिष्ठति पृष्ठे धरणिधरणकिणचक्रगरिष्ठे ॥ केशव धृतकच्छपरूप जय जगदीश हरे ॥२॥
वसति दशनशिखरे धरणी तव लग्ना शशिनि कलंककलेव निमग्ना ॥ केशव धृतशूकररूप जय जगदीश हरे ॥३॥
शूकररूप धृतं शूकररूपं येन तादृश जय जय ॥ वराहावतारपरिग्रहप्रयोजनमाह ॥ वसतीत्यादि ॥ तव दशनशिखरे दंता
ग्रे लग्ना संश्लिष्टा धरणी पृथ्वी वसति ॥ कुत्र केशव ॥ शशिनि चंद्रे निमग्ना कलंककलेव लांछनलेश इव अत्र निमग्नापद के
दानेन बालचंद्रस्य सादृश्यं दर्शने प्राप्यते ॥ तत्रैव कलंकस्य शस्य निमग्नत्वात् पूर्णचंद्रे कलंकस्य स्पष्टत्वात् ॥ अत एव स्य
बालचंद्रस्य दीर्घतया सादृश्यमपि संगच्छति ॥ अत एव निमग्नापदं वैपुल्यमपि ॥ रदना दशना द्विदा दाढा रमरः ॥ अग्रं शिखर
मित्याह रूद्रिः शृंगे च तन्मतमिति धरणिः ॥ कलंकस्याकलेरेव पृष्ठोपि लाघवं मात्रके ॥ षोडशांशो च चंद्रस्य कल
ना काल योः कलेति विश्वप्रकाशः ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नृसिंहरूपं स्तौति। धृतनरहरिरूपेति॥ हे केशव धृतनरहरिरूप धृतं नरहरेर्नरसिंहस्य रूपं येन तादृश जय जय॥ श्रीनृसिंहावतारस्य प्रयोजनमाह॥ तवेत्यादि॥ तव करकमलवरे करोत्कृष्टः स एव कमलवरः कमलश्रेष्ठस्तत्र नखं तिष्ठति॥ कीदृशं अद्भुतशृंगं अद्भुतमाश्चर्यभूतं शृंगमग्रभागो यस्य तादृशं॥ अद्भुतत्वमेवाह॥ दलितेत्यादि। दलितो विदारितो हिरण्यकशिपोर्दैत्यस्य तनुर्देहः स एव भृंगो भ्रमरो येन तादृशं॥ अन्यत्र कमलं तन्मकरंदपानादिना भृंगमानां तृप्तिर्भवति॥ इदं तु श्रीनृसिंहकरकमलमग्रभागे भृंगमेव विदारितवदित्यद्भुतत्वं॥ अथवा॥ अन्यत्कमलं पत्राणि भृंगेण विदार्यंते अत्र तु कमलमेव भृंगं विदारितवदित्यद्भुतत्वं अत्र नृसिंहकरस्य कमलरूपणेन नखस्य हस्तस्य भृंगरूपणेन च स्थूलतनोर्पि हिरण्यकशिपुकायस्य॥ श्रीनृसिंहकरांबुजापेक्षया अतिसूक्ष्मत्वं ध्वनितं। पुनर्नावः॥ कररुहा नखाः स्त्री नखरा स्त्रियां मिरसमरः॥ शृंगं प्रभुत्वे शिखरे चिन्हे क्रीडांबुयंत्रके च विषाणोत्कर्षयोश्चाग्रे॥ शृंगस्यात्कूर्चशीर्षकोइतिविश्वप्रकाशः॥ तनुः काये कृशे चाल्पे विरले चापि वाच्यवदि

तव करकमलवरे नखमद्भुतशृंगं॥ दलितहिरण्यकशिपुतनुभृंगं॥ केशव धृतनरहरिरूप जय जगदीश हरे॥४॥ छलयसि विक्रमणे बलिमद्भुतवामन॥ पदनखनीरजनितजनपावन। केशव धृतवामनरूप जय जगदीश हरे॥५॥

छिरेफपुष्पलिङ्गगषट्पदभ्रमरालयः॥ वामनरूपं स्तौति। धृतवामनरूपेति। हे केशव धृत वामनरूप धृतं वामनस्य रूपं येन तादृश जय जय॥ वामनावतारप्रयोजनमाह॥ छलयसीत्यादि। हे अद्भुतवामन आश्चर्यरूप वामन विक्रमणे पादाक्रमणे बलिं दैत्यं छलयसि वंचयसि। भगवानुपेन्द्रो वामनरूपं धृत्वा बलेः सकाशात्स्वदेहेन परिमितां भूमिं प्रार्थ्य पश्चाद्बृहद्रूपं प्रकटीकृत्य तदुदैत्य भुवनेश्वपि पदत्रयापूरणे तदपराधेन बद्धोऽधः क्षिप्तवानिति पुराणप्रसिद्धः अद्भुतत्वमेवाह। पदनखेति। पदनखसंबंधि यन्नीरं गंगाजलं तेन जनितं समुत्पादितं जनानां पावनं पवित्रं येन तादृश॥ अत्रापि प्रवर्द्धमानस्य भगवतस्त्रिविक्रमस्य चरणांगुष्ठनखाग्रेण विदीर्णे ब्रह्मांडस्य प्रथमे पार्थिवावरणे तेनैव वर्त्मना तद्बाह्यं वारणाविंदं प्रक्षाल्य देवागंतयादि ती।

निर्गतजलेन भगवत्पदोस्य… क्षालित चरणकमलच्युतजलं भागीरथ्याम ते भागीरथी नित्यांसिद्धं… तस्य लोकान्पावयतीति प्रसिद्ध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परशुरामावतारं स्तौति ॥ हे केशव धृतं भृगुपतेः परशुरामस्य रूपं येन तादृश जय जय ॥ एतदवतारप्रयोजनमाह ॥ क्षत्रियरु
धिरसादि ॥ क्षत्रियाणां रुधिराणि प्रचुराणि यत्र तादृशे पयसि ॥ कुरुक्षेत्राख्यतीर्थजले ॥ जगत्त्राणि जातं अपगतपापं नष्टपा
पातकं यथा स्यात्तथा स्नपयसि ॥ यद्वधि परशुरामेणैकविंशतिवारान् क्षत्रियान् हत्वा तद्रुधिरैः कुरुक्षेत्रे पंचह्रदान् विधाय पि
तृतर्पणं कृतं तदवधि तन्महत्तीर्थं जातमिति पुराणप्रसिद्धः ॥ कीदृशं जगत् ॥ शमितभवतापं शमितो नाशितो भवस्य संसारस्य
तापः संतापो यत्र तादृशं ॥ प्राणिनां पापसंबंधादेव संतपस्तीर्थस्नानेन न तु सर्वपापनाशे संतापनाशादिति भावः । जलेम

क्षत्रियरुधिरमये जगदपगतपापं स्नपयसि पयसि शमितभवतापं ॥ केशव धृत भृगुपतिरूप जय जगदीश हरे ॥ ६ ॥
वितरसि दिक्षु रणे दिक्पतिकमनीयं ॥ दशमुखमौलिबलिं रमणीयं ॥ केशव धृत रामशरीर जय जगदीश हरे ॥ ७ ॥

स्य जतं संतर्तं तापनाशनं चितएवेति ध्वनिः ॥ ७ ॥ रुधि रेफाक्षरके प्रोक्तो रुधिरं कुंकुमास्रजोरिति विश्वप्रकाशः ॥ भवः संसारसंतति
श्रेयः शंकरजन्मसु इति च ॥ ६ ॥ रामचंद्रावतारं स्तौति ॥ धृतरघुपतिरूपेति ॥ हे केशव धृत रघुपतिरूप धृतं रघुपतेः श्रीरामचं
द्रस्य रूपं येन तादृश त्वं जय जय । श्रीरामावतारस्य पुरुषार्थमाह ॥ वितरसीत्यादि ॥ रणे संग्रामे दिक्षु दशमुखमौलिबलिं द
शमुखस्य रावणस्य ये मौलयः मस्तकानि मुकुटानि वा तान्येव बलिरुपहारं वितरसि ददासि ॥ कीदृशं दिक्पतिकमनी
यं ॥ दिशां ये पतयः इंद्रादयः तेषां कमनीयं अभिष्टं तत्र हेतुः रमणीयं ॥ किरीटे मूर्द्धि चूडासु मौलिः केशेषु संयते ।
करोत्कीरयोः पुंसि बलिः प्राण्यंगजे स्त्रियामिस्समरः ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बलभद्रावतारस्तोत्रं॥ धृतहलधररूपेति॥ हे केशव धृतहलधररूपधृतं हलधरस्य बलभद्रस्य रूपं येन तादृश त्वं जय जय॥ बलरामावतारस्य लीलामाह॥ वहसीत्यादि॥ हे विशदे शुभ्रे वपुषि देहे जलदाभं मेघनीलं वसनं वस्त्रं वहसि धारयसि। कीदृशं हलहतभीतिमिलितयमुनाभं हलेन हति र्हननं तद्भीत्या तद्भयेन मिलितायाः यमुनायास्तस्या इव आभा दीप्तिर्यस्य तादृशं। इयं च यमुना निववृन्दावनं कंपमानस्य वसनस्य सा यमुनायाः आभेव सा गमनीयमाभीरूणां हि कंपवितरणैवेतिभावः। वृन्दावने विहरन् वारुणीं पीत्वा गोपीभिः सह विहरता बलभद्रेण जलक्रीडार्थमाहूता प्रत्याख्यायमिति मत्वा गर्वेनातिक्रम्य आकृष्टा कालिन्दी सोपतो हलाग्रेण हलेन इवानितिपुराणप्रसिद्धः। हलधरपदेन निग्रहार्थमेव हलं धृतवानिति वृत्तान्तरूपाज्जनं ध्वनितं। गौरवपुः सहननं शरीरं च यस्य स्वयमरः। शुभ्रं शुभ्रं विश्यतविशदश्वेतपाण्डुरा इत्यपि। वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकमिति॥ भीतिः साध्वसं भयं रिति विश्वप्रकाशः॥८॥ बुद्धावतारस्तोत्रं। धृतबुद्धशरीरेति। हे केशव धृतबुद्धशरीरं येन तादृश त्वं जयः॥ ननु बुद्धावतारे वेदनिंदकस्य मम कथं स्तुतिः क्रियत इत्यत आह॥ निं-

८ वहसि वपुषि विशदे वसनं जलदाभं हलहतिभीतिमिलितयमुनाभं केशव धृतहलधररूप जय जगदीश हरे॥८॥

९ निंदसि यज्ञविधेरहह श्रुतिजातं सदयहृदयदर्शितपशुघातं॥ केशव धृतबुद्धशरीर जय जगदीश हरे॥९॥

दसीत्यादि॥ यज्ञविधेः श्रुतिजातं यज्ञविधायकवेदसमूहं निंदसि। ननु सर्वमिदमयुक्तं॥ सोपि किमिति निंदित इत्यत आह। दर्शितपशुघातं सदयहृदय। अहह कष्टं दर्शितो बोधितः पशूनां घातो येन तादृशं वेदोपि पशूनां घातबोधयतीत्यहह कष्टमिमं वेदं निंदसीति भावः। एतादृशनिंदायामपि हेतुमाह। सदयहृदयेति दयाकृपा तत्सहितं हृदयं यस्य तादृशः। अयं भावः। राज्ञां नृशासनि रकुशलानु जनानवलोक्य वेदमार्गे प्रवर्तमानपशुघातप्रचुर स्वर्गादि फलार्थकं निरपराधि बहुप्राणिवधसाध्यं यागादिकं कुर्वन्ति। विरोधितानेतेषामसत्तां हितमपि ति विचार्य पापमपुरुषार्थमोक्षसाधनानि च समीचीनं तान् प्रवर्तयितुं न हिंस्यात् सर्वाभूतानीत्यादिना यज्ञानुबोधकवेदस्य निंदा करोषि। ननु सर्वथा वेदनिंदायामेव ततः बुद्धावतार एव गूढं तवेदं तोस्य मत्वा तादृशात्मना वैदिकमार्गेष्व विश्वास इति तेषां मोहनायैव तवैतद्व तारपरिग्रह इव सच्चा वतार प्रयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्किवतारं स्तौति धृतकल्किशरीरेति हे केशव धृतं कल्किशरीरं धृतं कल्किनः शरीरं येन तादृश जय ननु पूर्वं ममस
दयत्वमुक्तं तत्कल्क्यवतारे प्राणिवधनिरतत्वमेव विरुद्धमिति तत आह म्लेछनिवहसारि तं म्लेछनिवहनिधने म्लेछस
मूह मारणार्थं करवाळं खड्गं कलयसि धारयसि किदृशं किमपि करालं अतिशयेन भयंकरं किमिव धूमकेतुमिव औ
त्पातिकग्रहविशेषमिव तेनानुदिते न करवालं पश्यतां म्लेछानां नाशो भवतीति करवालस्य धूमकेतुसाम्यं अन्यस्मिन्न
पि स्यूदिते धूमकेतुनाम्नि औत्पातिके ग्रहविशेषे तं पश्यतां प्राणिनां विपदो भवेतीति भावः यद्वा धूमकेतुः चिन्हं धूमस्य स
धूमकेतु वन्हिस्तमिव अत्र शस्त्रस्य नीलत्वाद् धूमसाम्यं मुष्टेः सुवर्णमयत्वात् अग्निसाम्यं म्लेछनिवह निवहनिधन
इत्यत्र चर्मणि द्वीपिनं हन्ति इत्यादिवन्निमित्तार्थे योगाद् इत्येन न सप्तमी समूह निवह संदोह रस इत्यमरः नि

म्लेछनिवहनिधने कलयसि करवालं धूमकेतुमिव किमपि करालं केशव धृत कल्किशरीर जय जगदी
शहरे १० श्रीजयदेवकवेरिदमुदितमुदारं शृणु सुखदं शुभदं भवसारं केशव धृतदशविधरूप जय जगदी

धनं स्यात् कलेनाश इति विश्वप्रकाशः खड्गे तु निस्त्रिंशचंद्रहासविश्वप्रकाशः करवाळो भीरवणेत्यवि शहरे ११
दितिव १० प्रत्येकावतारस्तुरस्काराणां भगवतस्स्तुतिं कृत्वा [illegible] समुदितदशावतारपुरस्कारेणाश्रीकृष्णं स्तौति । धृतद
शविधरूपेति धृतानि दशविधानि दशप्रकाराणि रूपाणि येन तादृश त्वं जय जय संप्रति जयदेवकविः संप्रदाया
गतं स्वनगीर्वाते स्वनामानिबध्नन् स्वकृतां भगवतस्स्तुतिं रूपयाऽन्यानपि श्रावयितुमाह । श्रीजयदेवेत्यादि इदं
जयदेवकवेः उदितं भाषितं शृणु कीदृशं सुखदं श्रोत्रमनःसंतोषप्रदं पुनः कीदृशं शुभदं मंगलप्रदं [illegible] की
र्तनत्वात् । अत एव भवसारं भवे संसारे सारं श्रेष्ठं महाधनरूपं वा अत एव उदारं महत् विधाविधोप्रका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी०टी०
६

अंशावतारानुक्रमेणसंप्रतिपूर्णस्यस्वरूपमवतारित्वंश्रीकृष्णंस्तौति वेदानित्यादि कृष्णायपरिपूर्णस्वरूपेणश्रीकृष्ण
स्वरूपधारिणेतुभ्यंनमः ननुमीनाद्यवतारवानीश्वरस्तस्यस्तुतिः कृतेवेदानींगोपबालंमृग्किंस्तौषीसतआह
दशाकृतिकृतेतुभ्यमिति मीनादिदशरूपधारिणेतुभ्यमेवनमः तथाचनत्वदवतारवानीश्वरस्त्वमेवनतत्त्वन्यइत्यर्थः
ननुईश्वरस्यदेहंतदपिक्षमीनाद्याकृतयः किमितिमायायाधृताइत्याशंक्यावताराणांप्रयोजनमाह वेदानुद्धरतइत्यादि
वेदानुद्धरतेमीनरूपेणवेदोद्धारंकुर्वते पुनःकीदृशायजगन्तभुवनंनिवहतेकच्छपरूपेणधारयते पुनःकीदृशाय

वेदानुद्धरतेजगन्निवहतेभूगोलमुद्बिभ्रते दैत्यंदारयतेबलिंछलयतेक्षत्रक्षयंकुर्वते पौलस्त्यं
जयतेहलंकलयतेकारुण्यमातन्वते म्लेच्छान्मूर्छयतेदशाकृतिकृतेकृष्णायतुभ्यंनमः ५

भूगोलंभूमिमंडलमुद्बिभ्रते वाराहरूपेणऊर्ध्वंप्रापयते पुनःकीदृशायदैत्यंहिरण्यकशिपुंदारयते श्रीनृसिं
हरूपेणविदारयते पुनःकीदृशायबलिंदैत्यंछलयते वामनरूपेणवंचयते पुनःकीदृशायक्षत्रक्षयंकुर्वते
परशुरामरूपेणदुष्टक्षत्रियाणांनाशंकुर्वते पुनःकीदृशायपौलस्त्यंरावणंश्रीरामचंद्ररूपेणजयते पुनःकीदृशा
यहलंदुष्टनिग्रहायायुद्धेनकलयते बलभद्ररूपेणविस्तारयते पुनःकीदृशायम्लेच्छान्कल्किरूपेणमूर्छयते
नाशयते पुनःकीदृशायकारुण्यंदयामातन्वतेविस्तारयते बुद्धरूपेण आकृतिःकथितारूपसामान्यव
योरपीतिविश्वप्रकाशः रूपेणधारयत ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वं केलपोऽयं तीक्ष्णं केलिश्च नायकोत्कर्षविनिमसंभवतीति समस्तनायकचूडामणेर्भगवतः श्रीकृष्णस्य लोकोत्तरगुणानुवर्णनायैवमंग
लांतरमपाचरति ॥ श्रितेत्यादि । गीतस्यास्य गुर्जरी रागः ॥ ताल अष्टमठ भगीतार्थस्तु । हे हरे देव जय । जय जय ये मादेर द्विवचनं । इदं च ध्रुवप
दं ॥ नायकगुणानाह ॥ श्रितेत्यादि ॥ श्रितमाश्रितं कमलायाः लक्ष्म्याः कुचमंडलं स्तनमंडलं येन तादृश । तथा च सकलनायकामुकुट
मणेर्लक्ष्म्या अपि केलिकौशलकथनेन रतिकौशलरूपो नायकगुणस्तूक्तः । लक्ष्मीप्रियत्वेन घनधनत्वमपि सूचितं ॥ कीदृशाय
तकुंडल । धृते कुंडले कर्णभूषणे येन तादृश ॥ पुनः कीदृश ॥ कलितललितवनमाल । कलिता धृता ललिता मनोहरा वनमाला चर
णपर्यंतावलंबिनी पुष्पमाला येन । तादृश । एतौ हि रोषलक्षणाद्वयेन भव्यत्वमुक्तं । कमलाश्रीहरिप्रिये समरच कुचोत्तमाविति
च । आपादप्रमिता माला वनमालेति विदुरिति शाश्वतः ॥१॥ पुनः कीदृश । दिनमणिमंडलमंडन ॥ दिनमणेः सूर्यस्य

गुर्जरीरागेण गीयते ॥ पाठताल ॥ श्रितकमलाकुचमंडल धृतकुंडल ए ॥ कलितललितवनमाल जय जगदीश हरे ॥
॥१॥ दिनमणिमंडलमंडन भवखंडन ए ॥ मुनिजनमानसहंस जय जयदेव हरे ॥२॥

मंडलं तस्य मंडनमलंकारः सूर्यो ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसंनिविष्ट इति पुराणप्रसिद्धेः । एतेन
स्थिरत्वं विरत्वमुक्तं । पुनः कीदृश । भवखंडन भवसंसारं खंडयति नाशयतीति भवखंडनः प्रलयकर्ता । तादृश । अनेन सामर्थ्यरूपो
नायकगुणउक्तः । पुनः कीदृश मुनिजनमानसहंस । मुनिजनानां मानसं चित्तं तदेव मानसं सरोवरविशेषस्तत्र हंसो मरालः अ
हं त्र मुनिजनमानसस्य हंसेन साश्रयत्वेन साधारणधर्मेण मानससरोवरत्वेन रूपितं । भगवश्च मुनिजनमानसेषु समुचितत्वे तः
ति मत्वादिना साधारणधर्मेणहंसत्वेन रूपणमिदं च सावयवपरितरूपकमलंकारः ॥ तदाह ॥ नियतारोपणोपायः स्यादारोपः प
रस्य यः । तत्परंपरितं श्लिष्टे वाचकभेदभाजि चेति ॥ मानसं सरसि स्वांत इति विश्वप्रकाशः ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰टी॰ ७

पुनः कीदृश। कालियविषधरगंजन। कालियनाम्नो विषधरस्य गंजन तिरस्कारक॥ अनेनापि सामर्थ्यमुक्तं॥ पुनः कीदृश। जनरंजन
जनानां मधुरवचनादिना रंजयतीति जनरंजन। अनेन शुभवचनत्वं नायकगुणा उक्तः। पुनः कीदृश। यदुकुलनलिनदिनेश। यदु
कुलमेव नलिनं कमलं तस्य दिनेश सूर्य प्रकाशकत्वात्। एतेन कुलीनत्वं नायकगुणा उक्तः। आशीविषो विषधरः स्वकीयो व्यालः सरीसृ
पेदृमरः। वापुसिप प्रनलिन मृरविंदमहोत्पलमित्यत्र। पुनः कीदृश। मधुमुरनरकविनाशन। मधुनाम्नो मुरनाम्नो नरकना
म्नो दैत्यस्य विनाशन विनाशकारि अनेनापि सामर्थ्यमुक्तं। पुनः कीदृश। गरुडासन। गरुड एव आसनं यस्य। पुनः कीदृश। सुर
कुलकेलिनिदान। सुरकुलं केलीनां देवसमूह क्रीडानां निदानं आदिकारण अनेनापि सामर्थ्यमुक्तं सुरादेवाविति विश्वप्रकाशः॥ स
जातीयगणे गोत्रे गेहे पि राणितं कुलमिति च। निदानं त्वादिकारणमित्यमरः। गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयो रति च॥ ४॥ ७५

कालियविषधरगंजनजनरंजनए यदुकुलनलिनदिनेश जयजयदेवहरे ३ मधुमुरनरकविनाशन गरुडा
सनए सुरकुलकेलिनिदान जयजयदेवहरे॥४॥ अमलकमलदललोचनभवमोचनए॥ त्रिभुवनभवननिधा
नजे ए जयदेवहरे॥५॥

पुनः कीदृश। अमलकमलदललोचन। अमलं निर्मलं यत्कमलं तस्य यद्दलं पत्रं तत्सदृशे
लोचने यस्य तादृश। अनेनापि भव्यत्वमेवोक्तं। पुनः कीदृश॥ भवमोचन। भवं जन्म तस्मात् प्रपन्नात्मोचयतीति तादृश
मोक्षप्रदे सर्थः। अतएव भवखंडने येनेननु न पोने रूपं यत्तस्तत्र भवपदस्य जन्मपरतया प्रलयकारित्व मुक्तमत्र तु भव
पदस्य जन्मपरतया मोक्षप्रदत्वमुक्तं। अनेन परमानंदरूप मोक्षप्रदत्वेन योगिरूपो नायकगुणा उक्तः। पुनः कीदृश।
त्रिभुवनभवननिधान। त्रिभुवनभवनं गृहं तदेव निधानं वासस्थानं यस्य तादृश। यद्वा॥ त्रिभुवनभवने निधानमिव ७
महानिधिरिव। दलं पर्णं छदः पुमानित्यमरः। भवनं भाववेश्मनोरिति विश्वः। निधानं त्वालये निधाविति च॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनः कीदृशा ॥ जनकसुतायाः कृतभूषण । जनकसुतायाः सीतायाः कृतानि भूषणानि अलंकरणानि मकरीकापत्रादीनि येन तादृश ॥
अनेन सकलकलाकौशलं सूचितं रूपेण च प्रथमो नायकगुणः पुनः कीदृश । जितदूषण । जितो दूषणनामा राक्षसो येन तादृश ॥ यद्वा ॥ जि
तानि स्वस्मिन् तिरस्कृतानि दूषणानि दोषा येन तादृश ॥ सप्तमः पुनः कीदृश । समरशमितदशकंठ । समरे संग्रामे शमितो नाशितो दशकंठो
रावणो येन तादृश ॥ एतेन परमोऽभिमानी रावणस्तस्य वधेन अभिमानवत्त्वं नायकगुणः ॥ रामावतारे पौरुषगुणवर्णनेन वैक्षमा
वतरूपेण नायकगुणसूचितः । अत्रियां समरानीकरणात् समरः ॥६॥ पुनः कीदृश । अभिनवजलधरसुंदर ॥ अभिनवो नूतनो यो जल
धरः सजलो मेघस्तद्वत् सुंदर ॥ अनेनापि भव्यतमेवोक्तं । पुनः कीदृश । धृतमंदर ॥ धृतः क्षीराब्धिमथनार्थं येन मंदरः पूर्वं तदिशोषो म
थानदंडभूतो येन तादृश अनेनापि सामर्थ्यमेवोक्तं । पुनः कीदृश ॥ श्रीमुखचंद्रचकोर ॥ श्रियः लक्ष्म्याः मुखमेव चंद्रः । अस्याह्लादका

जनकसुताकृतभूषण जितदूषण ॥ समरशमितदशकंठ ॥ जयजयदेव हरे ॥६॥ अभिनवजलधरसुंदर धृतमंदर ॥ श्रीमु
खचंद्रचकोर जयजयदेव हरे ॥७॥ तव चरणे प्रणिता वयमिति भावय ॥ कुरु कुशलं प्रणितेषु जयजयदेव हरे ॥८॥ श्रीजयदेव

गीतान् ॥ तस्य चकोर ॥ अत्रैंदिरानन रूपचंद्राधरसुधापानसामर्थ्यं कवेरिदं कुरुते मुदं । मंगलमुज्ज्वलगीतं जयजयदेव हरे ॥९॥
कं । प्रसंग भिनवा नव्या नवीना नूतना नवरसमरः ॥ अनया सम्प्रदायेन अगावेत चकोरत्वेन रूपणं । अनेनापि रतिकौशलमेवो
क्तं । सर्वनायकगुणाः उक्ताः ॥ नायकगुणास्तु ॥ त्यागी कुलीनः कु
शलो रतेषु कल्पः कलाविन्निपुणो धनाढ्यः । माध्यः क्षमावान् सुरूपो भिमानी स्त्रीणां मतः शुचिवश्यः स्वनायकस्याः ॥ इमे नेन
शृंगाररस कल्के कथिता ॥७॥ कविः सर्वनायकोत्कृष्टेन श्रीकृष्णेन भक्तानां सर्वमभीष्टं स्वस्य वा मोक्षं प्रार्थयते । तवेत्यादि ।
वयं तव चरणे प्रणितास्तु इति भावय जानीहि । ननु मयैतत् ज्ञातमेवतामवतो किं मया कर्तव्यमित्यत आह । कुरु कुशलं मिति । इदं श्रीज
यदेवकवेः मंगलं गीतविशेषः शृणते तव मुदं आनंदं करोतु तत्र तं कुशलं विप्रराशिषं कुरु । कीदृशं मंगलं उज्ज्वलं दोषरहितं गीतगानं
स्य तादृशं । गीतदोषास्तु भरते ॥ शंकितं भीतमुत्कृष्टमव्यक्तमनुनासिकं ॥ काकस्वरः शिरः कंपतथा स्थानविवर्जितं ॥ विस्वर
विरसं चैव विश्लिष्टं विषमाहतं । व्याकुलं तालहीनं च गीतदोषा विदुर्बुधाः ॥९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी०टी० १८

श्रीहल्लेन नायकस्य सामान्यगुणानुक्त्वा संप्रति नायकविशेषगुणान् कथयन् तेनाशीरूपं मंगलमाचरति ॥ पद्मेत्यादि ॥ मधु
सूदनस्य उरो हृदयं वो युष्माकं प्रियं वांछितं अनुपूरयतु संपूर्णं करोतु । कीदृशमुरः ॥ पद्मायाः लक्ष्म्याः याः पयोधरतटी स्तनप्रां
तः तस्याः परिरंभणे आलिंगने लग्नं यत् काश्मीरं कुंकुमं तेन मुद्रितमिव मुद्रितं मुद्राचिन्हविशेषाः तद्युक्तमिव इदं मधु
सूदनस्य हृदयं ममैव नान्यस्येति ख्यापनायैव भैम्या निजस्तनतटीलिप्तकाश्मीरेण मुद्रावदंकितमिति भावः ॥ पुनः कीदृ
शं । खेलंति क्रीडां कुर्वंति अनंगः कंदर्पः स तस्य खेद आयासः तेन यः स्वेदांबु स्वेदजलं तस्य पूरः प्रवाहो यत्र तादृशं । एतेन विर
लिप्तकाश्मीरस्य शुष्कत्वेपि स्वेदसंबंधेन मुद्रायोग्यत्वं ध्वनितं ॥ कीदृशमिव ॥ व्यक्तानुरागमिव । व्यक्तः प्रकटीभूतोनुरागः

पद्मापयोधरतटीपरिरंभलग्नकाश्मीरमुद्रितमुरो मधुसूदनस्य ॥ व्यक्तानुराग
मिव खेलदनंगखेदस्वेदांबुपूरमनुपूरयतु प्रियं वः ॥६॥

स्नेहो यत्र तादृशमिव ॥ अत्र लक्ष्मीविषयकानुरागआधिक्यादन्यं प्रति रसमावेशाभावात् कुंकुमरागव्याजेन बहिर्निःसृ
तइवेति भावः । मुद्रासंजातास्येति मुद्रितमिति । तारकादित्वादितच् । लक्ष्मीः पद्मालया पद्मेत्यमरः ॥ स्त्रीस्तनाब्दौ पयो टी
धराविति च । परिरंभः परिष्वंगः संश्लेष उपगूहनमित्यपि ॥ काश्मीरं कुंकुमं प्रोक्तं रक्तं पुष्करमूलयोरिति विश्वप्रकाशः ॥ उ
रो वत्सं च वक्षश्च समरः ॥ कंदर्पो दर्पकोऽनंगः स्मरः ॥ पूरो जलप्रवाहे स्यात् इति विश्वप्रकाशः ॥ अनेन सर्वदा लक्ष्म्यासक्तत्व १८
रागकथनेन दाक्षिण्यरूपो नायकगुणः उक्तः ॥ तदुक्तं शृंगारतिलके ॥ यो गौरवं भयं प्रेम सद्भावं पूर्वयोषिति । न मुंचत्यन्यचि
त्तोपि ज्ञेयोसौ दक्षिणः पतिरिति ॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गीत

गोविंद

एतावता ग्रंथेनाभिधेयप्रयोजनकेलिवर्णनप्रयुक्तानायकगुणप्रतिपादनपुरःसरं मंगलानि विधाय॥ कविः शृंगारर
सप्रधानं भगवत्केलिवर्णनं विकीर्षुस्तत्र संभोगापेक्षया विप्रलंभस्योत्कृष्टत्वादादौ विप्रलंभशृंगारवर्णनाय विरहोत्कंठि
तायाः राधायाश्चरितानि वर्णयितुं प्रस्तावयति वसंतइत्यादि संभोगापेक्षया विप्रलंभस्योत्कर्षं प्रतिपादकं कारिका॰
संभोगो विप्रलंभेन न विना पुष्टिमश्नुते काषायिते हि वस्त्रादौ भूयान् रागोभिजायत इति श्लोकार्थस्तु काचित्सह
चरी सखी वसंते सरसं यथा स्यादेवं राधां इदं वक्ष्यमाणं उवाच कीदृशीं अवयवैरुपलक्षितां कीदृशैरवयवैः

वसंते वासंतीकुसुमसुकुमारैरवयवैर्भ्रमंतीं कांतारे बहुविहितकृष्णानुसरणां अमंदं कंदर्प
ज्वरजनितचिंताकुलतया चलद्बाधां राधां सरसमिदमूचे सहचरी १

वासंतीकुसुमसुकुमारैः माधवीलतापुष्पवत्कोमलैः पुनः कीदृशीं कांतारे महारण्ये भ्रमंतीं हेतुगर्भं विशेषणमा (ण)
ह बहुविहितेति बहुवारं वारं विहितं कृष्णस्यानुसरणमन्वेषणं यया तादृशीं अत्र हेतुगर्भं विशेषणमाह कं
दर्पज्वरेत्यादि कंदर्पज्वरेण जनिता या चिंता तत्कृता या आकुलता व्याकुलता तया अमंदं अधिकं यथा स्यादेवं च
लद्बाधां प्रवर्द्धमानपीडां अत्र वसंतेति सप्तम्यासित्तापस इति तद्विशेषेण तृतीया वासंती माधवीलते संभ्रमरः
महारण्ये दुर्गपथे कांतारः पुंनपुंसक इति च पीडा बाधा व्यथा दुःखमित्यपि च १

पाट्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छ्वां

कि मूखे सतत्राह ललितेसादि गीतस्यास्य वसंतरागो रूपकतालः तालल‍क्षणं प्रति कोहलः यतितालेल
घुद्वैतोलश्चैति गीतार्थस्तु हे सखि इह सरसवसंते शृंगाररसप्रधाने वसंते हरिः श्रीकृष्णे विहरति क्रीडति क्रीडाप्र
कारमाह नृत्यतीति युवतिजनेनसमं सह नृत्यति कीदृशे वसंते विरहिजनस्य वियोगिनो जनस्य दुरंते दुःखेनां
तः समाप्तिर्यस्य तादृशे निरवधाविहार्थः अयं वसंतो विरहिणां दारुणो ननु युवतिभिः सहक्रीडतः कृष्णस्य र्वे च वि
रहिणी यदि कृष्णानुसरिष्यसि तदायं तवापि दुरंतो भविष्यतीति भावः समं सहेत्यमरः इदं ध्रुवपदं वसंतस्य
सरसता माह ललितेसादि ललितमनोहरा या लवंगलता तस्याः परिशीलनेन संपर्केण कोमलो मृदुलो मलय

वसंतरागे रूपकताले ललितलवंगलतापरिशीलनकोमलमलयसमीरे मधुकरनिकरकरंबितको
किलकूजितकुंजकुटीरे १ विहरति हरिरिह सरसवसंते नृत्यति युवतिजनेन समं सखि विरहिजनस्य दु
रंते ध्रुवपदम् उन्मदमदनमनोरथपथिकवधूजनजनितविलापे अलिकुलसंकुलकुसुमसमूह
निराकुलबकुलकलापे २

समीरो मलयाचलसंबंधी वायुर्यत्र तादृशे पुनः कीदृशे मधुकरनिकरेण भ्रमरसमूहेन करंबिता मिश्रि
ता ये कोकिलास्तैः कूजितः शब्दयुक्तः कृतः कुंज एव कुटीरो ऽल्पा कुटी यत्र तादृशे समीरे मातरि श्वा गंधवाह
समीरणाश्वसमरः मधुव्रतो मधुकरो मधुलिट् मधुपालिन इति च स्तोमौघनिकरव्रातसरससंघात संच
याश्चापि मिश्रिते पिकरंबितमितिशाश्वतः अल्पा कुटी कुटीरः स्यादिति सपि १ वसंतस्य दुरंततामाह
उन्मदेति उन्मदः उद्दामः मदनो यत्र तादृशो मनोरथो येषां तादृशा ये पथिकानां कुजनाः तैर्जनितो विला

क ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनः कीदृशे मृगमदस्य कस्तूरिकायाः यः सौरभरभसः सौरभवेगः तस्य वशंवदे आत्मनि आर्पितत्वात् इति निनवद
लमाला नूतनपत्रपंक्तिर्यस्य तादृशस्तमालो यत्र तादृशे युवजनानां तरुणजनानां हृदयं विदारयतीति युवजनहृदय
विदारणस्तादृशाय मनसिजस्य कामस्य नखस्तेषामिव रुचिर्दीप्तिर्येषां तादृशाय किंशुकाः पलाशकुसुमानि तेषां
जालं समूहो यत्र तादृशे यद्वा तादृशानि किंशुकजालानि पलाशकलिका यत्र तादृशे अत्र पुष्पाशोकोत्र रक्तस्य र
क्तत्वेनारक्तत्वेन च हृदयविदारणात् रुधिरात्कामनसिजनखस्य सादृश्याबाधत्वं मृगनाभि मृगमदकस्तूरी वेत्यम
रः रभसो वेगहर्षयोरिति विश्वप्रकाशः कामः पंचशरस्मरः शंबरारिर्मनसिज इत्यमरः रुचिर्मयूखे शोभायामभि
मृगमदसौरभरभसवशंवदनवदलमालतमाले युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ११
२ मदनमहीपतिकनकदंडरुचिकेसरकुसुमविकासे मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे ४
खं ग्लानि लाभयोरिति विश्वप्रकाशः पलाशे किंशुक इत्यमरः जालं गवाक्ष आनाये कोरके दंभ दंभयोरिति विश्व
प्रकाशः ३ पुनः कीदृशे मदन एव महीपतिः तस्य यः कनकदंडः सुवर्णघटितदंडयुक्तं छत्रं तस्येव रुचिर्यस्य तादृ
शस्य केशरस्य नागकेशरपुष्पस्य विकाशः प्रकाशो यत्र तादृशे पुनः कीदृशे मिलिताः शिलीमुखा भ्रमरा ए
व शिलीमुखा बाणा यस्मिन् तादृशं यत् पाटलिपटलं पाटलापुष्पसमूहस्तेन कृतः स्मरतूणस्य तूणीरस्य विला
सश्चेष्टितं यत्र तादृशे अत्र परमार्थाज्जनकत्वेन भ्रमराणां बाणसाम्यं चापेयः केशरो नागकेशरः कांचनाह्वय
इत्यमरः अलिबाणौ शिलीमुखविति च समूहः पटलं जनेइत्यपि तूणोपासंगतूणीरनिषंगा इत्यपि ४

गी॰टी॰ पुनः कीदृशे ॥ विगलितं गतं लज्जितं लज्जा यस्य तादृशः स्वजगतः प्राणिगणस्य अवलोकितेन दर्शितेन तरुणकरु

१० णैः नवीनकरुणवृक्षैः पुष्पविकाशव्याजेन कृतो हासो यत्र तादृशे वसंते अत्र हास्यरसस्य शुक्लत्वात् पुष्पविकाश

साम्यं ॥ यदाह भरतः ॥ श्वेतो हासः स्मृतः कीर्तित इति ॥ यद्वा ॥ विगलितलज्जितानां विप्रयोगिजनानां अवलोकितेन तरुणैः

अर्द्धितत्र वियोगिभिः करुणं करुणारससहितं यथा स्यादेवं कृतो हासो यत्र तादृशे हा विरहिणो वराकाः कष्टं प्रा

प्नुवंतीति करुणालज्जाहिता विलापंतीति च हासस्तेषामिति भावः वालारसानभिज्ञा एव हृष्टाः परदुःखे पि कृतसंप

रणा अतः तस्योस्फुरत्वं ॥ पुनः कीदृशे वसंते ॥ विरहिणां वियोगिनां निकृंतनाय विदारणाय कुंतमुखाकृतिकु

विगलितलज्जितजगदवलोकिततरुणकरुणकृतहासे विरहिनिकृंतनकुंतमुखाकृतिकेतकदंतुरिताशे ॥५॥

त आयुधविशेषः । तस्य मुखं अग्रभागः तस्येव आकृतिर्यस्य तादृशं यत्केतकं तेन दंतुरिता [redacted]ः व्याप्ता आशा

टी दिशो यस्मिन् तादृशे वसंते । विरहिणां वियोगिनां निकृंतनाय कविलेतकिदंतुरिताशा इति पाठः ॥ स्वमकारो स्त्रीकृतो कृष्ण

ह्रस्वो क्वचिदित्यत्र कविग्रहणस्य लक्ष्यानुरोधार्थत्वात् कृतह्रस्वेन केतकीशब्देन समर्थमीयः ॥ लज्जितेत्यत्र अवलोकि

तेत्यत्र च नपुंसके भाव इत्यनेन भावे क्तः ॥ करुणस्तु रसे वृक्षे कृपायां करुणा मता इति विश्वप्रकाशः ॥ प्राशस्त्यं तुल इत्यस

मरः ॥ निम्नोन्नते तया व्याप्ते दंतुरं कथ्यते बुधैरिति धरणिः ॥ आशा तृष्णा दिशोरिति विश्वप्रकाशः ॥ कृतिच्छेद इति इ स्व १०

वेदनुबंधो प्यस्तीति केचित् तस्य सुदृप्रसयां तस्य निकृंतनमिति ॥ प्रयोगः साधुः ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनः कीदृशे ॥ माधविकाः वासंत्याः परिमलेन सौरभेन लुलिते मनोहरे । पुनः कीदृशे ॥ नवमालिकया नवमालिकापुष्पेण अति सुगंधौ
[illegible] ॥ पुनः कीदृशे [illegible] ॥ पुनः कीदृशे । मुनिमनसामपि मोहनकारि
णि मोहजनके ॥ अन्यत्राणिं वृत्तव्यपि सपिशब्दार्थः । पुनः कीदृशे ॥ तरुणानां विलासियुवजनानां अकारणबंधौ स्वाभाविक
मित्रे ॥ विमर्दे सपरिमलामंधे जनमनोहरे इत्येमरः ॥ ६ ॥ पुनः कीदृशे । स्फुरंती शोभमाना या अतिमुक्तलता वासंतीलतात
स्याः परिरंभणेनालिंगनेन मुकुलितः पुलकितः मुकुलितं मुकुलं तदेव पुलको रोमांचस्तद्युक्तः चूत आम्रो यत्र तादृशे । अत्र च ल
ताकापरिरंभणेन चूतनायकास्यापि रोमांचकथनेन चेतनयोरपि कामान्मः तेन वसंतस्यातिदुरंतत्वं कथितं । अति
शायेन मुक्तानामपि परिरंभणात् मुकनेति अतिमुक्तपदेन ध्वनितं ॥ एतावता वसंतस्य समरसतादुरंतता चोक्ता संप्रति क्रीडायामस्य

माधविका परिमल ललिते नव मालिक जाति सुगंधौ ॥ मुनिमनसामपि मोहनकारिणि तरुणाकारणबंधौ ॥ ६ ॥ स्फुर
दतिमुक्तलतापरिरंभण मुकुलितपुलकितचूते ॥ वृंदावनविपिनपरिसरपरिगतयमुनाजलपूते ॥ ७ ॥ श्रीजयदेव
भणितमिदमुदयति हरिचरणस्मृतिसारं ॥ सरसवसंतसमयवनवर्णनमनुगतमदनविकारं ॥ ८ ॥

न नविशेषमाह ॥ वृंदावनेत्यादि । वृंदावननाम्नि विपिने वने हरिर्विहरतीत्यन्वयः । कीदृशे विपिने परिसरे समीपप्रदेशे परितः त
सर्वतोगतेन यमुनाया जलेन पूते पवित्रे ॥ ७ ॥ अतिमुक्तः स्याद्वासंती माधवीलते समरः ॥ मुकुलं करोतीति तत्तदाचष्टे यती पुरुषे न
ण्यो नातभावे क्ते सति मुकुलितमिति बोध्यं ॥ पश्चात्मुकुलितमेव पुलकः संजातोस्येति तारकादित्वादितच् । आम्रश्चूत इत्य
मरः ॥ पर्यंत भूः परिसर इत्यपि ॥ ७ ॥ संप्रति गीतार्थमुपसंहरन् प्रेक्षावत्प्रवृत्त्यर्थं स्वभणितेरुत्कर्षमाह ॥ श्रीजयदेवेत्या
हरि दि ॥ श्रीजयदेवकवेः इदं भणितं गीतं उदयति । तत्र हेतुः हरिचरणयोः स्मृतिसारेण तेन सारं श्रेष्ठं । यद्वा ॥ हरिचरणस्म
तिरेव सारो यत्र तादृशं । सरसं शृंगाररसप्रधानं वसंतसमयसंबंधिनो वनस्य वर्णनं यत्र तादृशं । अत एवानुपग
तमदनविकारं । अनुगतसंबद्धो मदनस्य विकारो यस्मिन् तादृशं ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰टी॰ ११ पु॰

संप्रतिवसंतकालीनद्वयोरपि विरहिजनसंतापकत्वमाह ॥ दरविदलितेत्यादि । इहहि अस्मिन्नेव वसंते गंधवाहो वायुर्वातो दहति विरहिणीनां । किंकुर्वन् कानना‍नि वनानि वासयन् सुरभीकुर्वन् ॥ कैर्दरः ईषद्विदलिता विकाशिता या मल्लिवल्ली मल्लिका लता तस्याः सकाशात् चंचंतः प्रसरंतः येपरागाः पुष्परेणवः त एव प्रकटिताः पटवासाः पिष्टातकाख्याः । कीदृशो गंधवाहः । केतकीगंधबंधुः । पुनः कीदृशः प्रसरतः प्रतिदिशं संचरतः सुमबाणस्य कामस्य बाणवत् प्राणसदृशः ॥ यद्वा प्रसरता असमबाणेन प्राणवान् शक्तिसंपन्नो यो गंधवाहः इत्येकमेव पदं ईषदर्थे दरो वा भूमिति विश्वप्रकाशः । परागः पुष्परज इति च । पिष्टातः पटवासक इत्यमरः । काननं वनमिति च । प्राणोध्वस्तेषु कीर्तिता इति विश्वप्रकाशः । शक्तिः पराक्रमं प्राण इत्यमरः । गंधवाहानिलाशुगा इत्यमरः ॥ वा संप्रति वसंतदिवसान्वा । अपि दुरंतत्वमाह ॥ उन्मीलदित्यादि ॥ अमी वसंतसंबंधिनो वा

दरविदलितमल्लीवल्लिचंचत्परागप्रकटितपटवासैर्वासयन्काननानि । इहहि दहति चेतः केतकीगंधबंधुः प्रसरदसमबाणप्राणवद्गंधवाहः ॥ ८ ॥ उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ॥ नीयंते पथिकैः कथंकथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥ ९ ॥

सरादिवसाः पथिकैः कथंकथमपि महताकष्टेन नीयंते समाप्यंते । कीदृशा वासराः उद्गीर्णः प्रकटीकृतः कर्णज्वरः श्रोत्रसंतापो येषु तादृशाः ॥ कैः उन्मीलंति प्रकटी भवंति या[illegible]नि मधूनि गंधाश्च । तेषु लुब्धा लोलुपा ये मधुपा भ्रमरास्तैर्व्याधूताः कंपिताये चूतांकुरा आम्रमुकुलानि तेषु क्रीडंतो कोकिलानां याः काकल्यः अव्यक्तमधुरध्वनयः तासां कलकलाः ये कुलकल्लोलैः । केन प्रकारेण नीयंत इत्यत आह ॥ ध्यानेत्यादि । ध्यानस्य प्रियाविंतनेयदवधानं तत्परता तेन क्षणे प्राप्ता यः प्राणासमायाः जीवितत्तुल्यायाः कांतायाः समागमरूपो रसः तस्मादुल्लासोत्साहस्तैरुल्लासाढ्या हर्षतः । काकली तु कले सूक्ष्मध्वनावित्यमरः । कोलाहलः कलकल इति वा ॥ ९ ॥

११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जने केयाचिद् असौ सखी राधिकां पुनराह । पुनः कथितवती किं कुर्वती ॥ आरात् दूरतः समस्तंप्रसन्नं मुमुहुः तिरूपदर्शयंती । कीदृ
शं अनेकनारीणां परिरंभसंभ्रमेण आदरेण स्फुरत येमनो हरीविलासः तस्य लालसः औत्सुक्यं यस्य तादृशं । संभ्रमं
त्वयि इच्छंति मयमुद्गमादरः ॥ लालसो लालसापि स्याद्याच्यात्यभ्यास्तिरेकयोः ॥ औत्सुक्यो ॥ चेति विश्वप्रकाशः ॥ आराद्दूरसमी
पयोः इत्यमरः ॥ १ ॥ ७ ॥ तदेव गीतेन कथयति । चंदनेत्यादि । गीतस्यास्य रामकरी रागः तालश्च रूपकः तल्लक्षणं प्रागेवोक्तं ॥
गीतार्थस्तु । हे विलासिनि । विलासशीले ॥ वृंदावने मुग्धे वधूनिकरे सुंदर वधूनिव प्रेमि हरि विलसति क्रीडां करोति । कीदृशे
कृ वधूनिकरे केलिपरे क्रीडापरायणे । अत्र मुग्धवधूनिकरे हावाद्यनभिज्ञस्त्रीमये केलिपरे सामान्यक्रीडापरे विलसतीति अन्वो
अनेकनारीपरिरंभसंभ्रमं स्फुरन्मनोहारिविलासलालसं मुरारिमारादुपदर्शयंत्यसौ सखी समीक्ष्य पुनराह रा
धिकां ॥ १ ॥ ७ ॥ रामकरीरागरूपकतालो ॥ चंदनचर्चितनीलकलेवरपीतवसनवनमाली ॥ केलिचलन्मणिकुंड
लमंडितगंडयुगस्मितशाली ॥
न्वर्थः ॥ तथाच हावाद्यभिज्ञां तं विलासकलाकलापि ह्यस्यापि हरिर्विलासो शोभामशोभन इति भावः ॥ मुग्धः सुहृदं मूढ यो १
रिति विश्वप्रकाशः । विलासो हावविशेषः । तल्लक्षणं तु भरते ॥ यानस्थानासनेवारू नेत्रवक्त्रादिकर्मणां ॥ उत्पाद्यते विशेषो यः
स विलासस्तु कीर्तितः इति ॥ ध्रुवपदं ॥ कीदृशो हरिः ॥ चंदनचर्चितो अनुलिप्तो नीलकलेवरश्यामशरीरे पीतवसनं पीत व
स्त्रं वनमाला च यस्य तादृशः । पुनः कीदृशः ॥ केलिषु चलंती कंपमाने ये मणिकुंडले ताभ्यां मंडितमलंकृते गंडयुगं
कपोलयुग्मं यस्य तादृशः । पुनः कीदृशो हरिः ॥ स्मितेन ईषत् हास्येन । शाली शोभमानः । अथ कलेवरं गात्रं वपुः संहन
नमित्यमरः ॥ गंडौ कपोलाविद्यपि । स्मितलक्षणं भरते । ईषद्विकसितैर्गंडैः कटाक्षैः सौष्ठवान्वितैः । अलक्षिता द्विजाधी
रमुत्तमानां स्मितं भवेदिति ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी·टी· गोपीनां सौंदर्यविलासेन निजं तं चकथयन्त्रेव दे ढीराह पीनेत्यादि ॥ काचिद्गोपवधूः पीनपयोधरभारभरेण मांस
१२ लस्तनगौरवातिशयेन सरागं सानुरागं यथा स्यादेवं हरिं आलिंग्य उद्दविता ः पंचमास्वरो रागो यथे त्र एवं यथा स्यात्
तथा अनुगायति अनुपश्चात् । हरेर्गानानंतरं गायति । अत्र गोप्याः सौंदर्यं पीनपयोधरेत्यादिना प्रतिपादितं । अवैद
ग्ध्यं तु लक्ष्य परिरंभो यमं विनैव स्वयं प्रथमं परिरंभणात् । अन्योन्यकृतपरिरंभेण शृंगाररसः पुष्टो भवति । तदु
क्तं दशरूपके । रम्यदेशकलाकालवेषभोगादिसेवनैः । प्रमोदात्मा रतिः सैव यूनोरन्योन्यभक्तयोः । अत्र कमाः

हरिरिह मुग्धवधूनिकरे ॥ विलासिनि विलसितकेलिपरे ॥ ध्रुवपदम् ॥ पीनपयोधरभारभरे
ण हरिं परिरभ्य सरागं ॥ गोपवधूरनुगायति काचिदुदंचितपंचमरागं ॥ १ ॥ कापि विलासविलोल
विलोचनखेलनजनितमनोजं ॥ ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजं ॥ २ ॥

प्रक्षप्यमाणः शृंगारी मधुरागं विविचष्टैर्तैरिति ॥ शृंगारे पंचमस्वरो बाहुल्येन भवतीति सर्वे वात्र कथितः ॥ भरतः ॥
१२ मध्यं पंचमभूयिष्ठं हास्यशृंगारयो र्भवेदिति ॥ १ ॥ कापीत्यादि । कापि मुग्धवधूः मधुसूदनस्य वदनसरोजं मुखपद्मं १२
अधिकं यथा स्यात्तथा ध्यायति चिंतयति ॥ कीदृशं । विलासेन विलोलयोश्चंचलयो विलोचनयो र्नयनयोः खेलनं तेन
जनितउत्पादितो मनोजः कामो येन अर्थात् यस्या मेव ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताद्दशं ॥ अत्र प्रस्यस्यापि मधुसूदनवदनस्य ध्यानादेवैदग्ध्यं तस्या वगम्यते। कापि कपोलेत्यादि॥ कापि नितंबवती गोपी दयितं कृष्णं कपोलतले चारु मनोहरं यथा स्यात्तथा चुचुंब चुंबनं कृतवती। कीदृशी। किमपि कार्यं लपितुं मंत्रयितुं श्रुतिमूले मिलिता संलग्ना। कीदृशे। पुलकै रोमांचैः अनुकूले प्रियाभिलाषसूचके॥ औत्सुक्येन स्वहसाकांत मुखचुंबनं सखीजनहास्यकारं भवतीति व्याजेन तया तद्धार्ष्ट्यमिति भावः। अत्र प्रथमं स्वमुखस्पर्शनेन स्वकपोले रोमांचमुत्पाद्य चुंबनेन तस्य। आधीरतं ध्वनितं॥४॥ केलिकलेत्यादि॥ काचिद्गोपी अमुं कृष्णं केलि

कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले ॥ चारु चुचुंब नितंबवती दयितं पुलकैरनुकूले ॥४॥
केलिकलाकुतुकेन न काचिदमुं यमुनाजलकूले ॥ मंजुलवंजुलकुंजगतं विचकर्ष करेण दुकूले ॥५॥

कलाकुतुकेन दुकूलपट्टवस्त्रविषये विचकर्ष आकृष्टवती दुकूलं गृहीत्वा ॥ अमुं कृष्णं विचकर्षेति केचित् योजयंती॥ कीदृशं मंजुलो मनोहरो वंजुलो वेतसो यत्र तादृशः। कुंजः तत्र गतं प्राप्तं। कुत्र विचकर्ष यमुनाजलकूले यमुनाया जलयुक्तो रोधसि। वंजुलकुंजस्थं कृष्णं यमुनाकूलं प्रति क्रीडार्थमाकृष्टवतीति समर्थः। अत्रान्यानुरक्तस्य कृष्णस्य नायकया वस्त्राकर्षणाद धीरतं तस्या व्यंग्यं। कुतुकेऽपि कुतूहलमित्यमरः। मनोज्ञं मंजुलमिति च। वंजुलो वेतसो शोकनिनिशेष्विति विश्वप्रकाशः। दुकूलं तु क्षौमे सूक्ष्मांशुकेऽपि चेति च ॥५॥

म हु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰टी॰ करतले त्यादि। कावित्युवतिर्हरिणा प्रशंसे स्कृता ॥ कीदृशी ॥ रासरसे ॥ गोपानां क्रीडाविशेषस्तत्र सह नृत्यपरा हल्लेन स
१३ हन्हसंती ॥ कीदृशो रासरसे करतलयोस्तालेन पाणिस्परवादेन तरला चंचला या वलयावलिः कंकणपंक्तिः तया कलि
तः मिश्रितः कलस्वनः अव्यक्तमधुरशब्दः सहितो वंशो वेणुर्यत्र तादृशे। अत्र रासरस इत्यादिना गोडुहां क्रीडा स्वव
सास्तत्वानुसकलसंगीतकल्लासितिध्वनितमृदंगुपादकरास्फालतालं तु हरितालकं इति विश्वप्रकाशः ॥ तरल
श्चंचलो तिरिङु हारमध्यमनावपीतिच। वलयं कंकणे वेष्टेपि। आवलिः पंक्तिरित्यमरः। वंशो वेणुकुलेवर्गे पृष्ठस्या
वयवेपि विति विश्वप्रकाशः॥ रासरसस्तु रासस्यादिति विश्वप्रकाशः॥ रासस्तु गोदुहां क्रीडेति हारावली॥६॥ कि

करतलतालतरलवलयावलिकलितकलस्वनवंशे॥ रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशं
का से॥६॥ श्लिष्यति कामपि चुंबति कामपि कामपि रमयति रामां॥ पश्यति सस्मितचारुतरामपरामनुगच्छति वामां
॥७॥ श्रीजयदेवकवेरिदमद्भुतकेशवकेलिरहस्यं॥ वृंदावनविपिने ललितं वितनोतु शुभानि यशस्यं ॥८॥

श्लिष्यतीत्यादि। कामपि रामां क्रीडाशीलां गोपीं श्लिष्यति आलिंगति कामपि चुंबति कामपि रमयति निधुवतसंभोगेन क्रीडयति। सस्मितः मपि
सस्मितेन चारुतरां अतिशयेन मनोहरां अपरां गोपीं पश्यति॥ कांचिद्वामां वामस्वभावां कोपवतीं अनुगच्छति अनुनयार्थं मनु
पा कृतिं करोति। अत्र अहल्ले नात्स्यूहो अपमाणेपि नाभिन्नं ... सिसवेदध्यस्वितेत्युक्तं रोपमणीरामे सम्यक् ॥ विद्यादामाम
पि स्त्रियामितिच ॥७॥ संप्रति गीतं समाप्तो कविः स्वनाम निबध्नन्नेनाशिषं प्रार्थयते। श्रीजयदेवेत्यादि। श्रीजयदेवकवे १३
रिदं ललितं गीतं शुभानि वितनोतु विस्तारयतु। कीदृशं वृंदावनेऽद्भुतकेशवस्य केलिरहस्यं गुप्तक्रीडा यत्र तादृ
शं। अद्भुतं अनेकैर्नर्मन्त्रानेक कामिनीनां कामहरणार। पुनः कीदृशं यशस्यं यशसा सहितं॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु सकलशृंगारकलाभिज्ञः श्रीकृष्णः कथं हावादिभिः स्वभिः गोपीभिः सह केलिं कृतवानित्यत आह ॥ विश्वेषामित्यादि ॥
हे सखि हे राधे मधौ वसंते मुग्धो मनोहरो हरिः क्रीडति ॥ किं कुर्वन् विश्वेषां गोपीजनानां अनुरंजनेन अनुरागजननेन
आनंदं जनयन् पुनः किं कुर्वन् इंदीवराणां नीलकमलानां या श्रेणी पंक्तिस्तद्वत् श्यामलैः नीलैः कोमलैः सुकुमारैः अंगैः
अवयवैः ॥ अनंगस्य कामस्य उत्सवं नैरूप्य उपनयन् उपस्थापयन् ॥ कीदृशो हरिः ॥ अभितः उभयतः ॰ वासेष्ववयवैः
अंतर्गतत्वात्प्रत्यंगं प्रतिस्वच्छंदं यथा स्यात् देवं व्रजसुंदरीभिः आलिंगितः कृत इव मूर्तिमान् शरीरी शृंगाररसः शृंगारस्य

विश्वेषामनुरंजनेन जनयन्नानंदमिंदीवरश्रेणीश्यामलकोमलैरुपनयन्नंगैरनंगोत्सवं ॥

शरीरत्वात् क्रीडानसंभवतीति मूर्त्तिमानित्युक्तं ॥ अत्र शृंगाररसस्य श्यामता ॥ श्रीकृष्णसादृश्यं ॥ तदुक्तं भरते ॥
श्यामो भवति शृंगारः सितो हास्यः प्रकीर्तितः ॥ यथा मुग्धो मनोहरः शृंगारो रसो मधौ वसंते क्रीडति सर्वत्र विलसति ॥
किं कुर्वन् अनुरंजनेन नयनोः परस्परानुरागजननेन विश्वेषां आनंदं जनयन् ॥ पुनः किं कुर्वन् ॥ अंगैः शृंगाररसस्यांगभू-
तैः कटाक्षादिभिरनुभावैः रोमांचादिभिश्च सात्त्विकभावैः संकाशून्यादिभिः संचारिभावैश्च अनंगोत्सवं उपनयन्
न केवलमेतैः विभावैरपीत्याह ॥ इंदीवरेत्यादि ॥ इंदीवरश्रेणीभिः कमलपंक्तिभिः श्यामलैः गाढांधकारैर्नी-
लनिचोलतमालवनादिभिः कोमलैः मृदुशय्यादिभिः ॥

गोपी
१४

अत्र हेतुगर्भविशेषणमाह ॥ स्वच्छंदमित्यादि ॥ स्वच्छंदं यथा स्यात्तथैवं व्रजसुंदरीभिः अंगं अंगप्रति आलिंगितः आश्रितः
शृंगाररसस्य अंगानां विभावादीनां मध्ये कदाचित् तांबूलस्रक्चंदनाद्युद्दीपनविभावरूपकया क्वचित् सस्मितकटाक्षा
द्यनुभावरूपं क्वचित् व्याधिशंकासूयादि सहचारिरूपं क्वचित् विवर्णतास्वेदादि सात्विकभावरूपं शृंगाररसस्य अंग
माश्रितमिति भावः। विभावादीनामंगत्वं प्रतिनुभवतः। विभावैरनुभावैश्च भावैः संचारिसात्विकैः ॥ जनितो वासितस्थायी
तो बुद्धः शृंगार इष्यत इति ॥ विभावकमामान्यलक्षणांतरसरलप्रदीपकायां भावयंति विशेषेण ये रसाद्भिमनो हरति ते विभा
वाः कथ्यंते नाट्यशास्त्रविशारदैः। तत्र शृंगारस्य भवा मरतिनायकाः ऋतुमाल्यालंकारैः प्रियजन गांधर्वकाव्यसे
वाभिः उपवनगमनविहारैः शृंगाररसः समुद्भवंति। अनुभावसामान्यलक्षणं। यथा क्रियंते ये रसाः सम्यक् लोका

स्वच्छंदं व्रजसुंदरीभिरभितः प्रत्यंगमालिंगितः शृंगारः सखिमूर्तिमानिव मधौ मुग्धो हरिः क्रीडति ॥१॥

ननुभववशो वराः। तेनुभावाः प्रकथ्यंते नाट्यशास्त्रविशारदैः ॥ तत्र शृंगारस्यानुभावाः लपननदनप्रसादैः स्मितमधुरवचो
धृतिप्रमोदैश्च ॥ मधुरैः सांगविकारैस्तस्याभिनयः प्रयोक्तव्यः। व्यभिचारिभावमनलक्षणदशरूपके। विशेषादाभिमु
ख्येन चरंतो व्यभिचारिणः। तत्र व्यभिचारिणः। शृंगारतिलके ॥ शंकासूयातथाश्चर्याणि व्याधिश्चिंता स्मृतिर्धृतिः ॥ औत्सुक्यं
विस्मयो हर्षो व्रीडोन्मादो भयं तथा ॥ विषादो जडता निद्रा बहिःसंतापलंमतिः। इतिभावाः प्रयोक्तव्याः शृंगारे व्यभिचारि
णः इति। सात्विकभावाः शृंगारतिलके ॥ स्तंभः स्वेदोथ रोमांचः स्वरभंगोथ वेपथुः ॥ वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विकाः स्मृ
ता इति। एतेषां सर्वांतरलक्षणानि ग्रंथगौरवभयान्नलिख्यंते। अत्र सकलकलागुणितज्ञस्यास्याभिव्रजसुंदरीभिः सह लु
ब्धनाभासेरसतत्वहानुसारेण क्रीडतोपि। लुब्धस्यनरस्य सहानिः तासांतथैवानुरंजनात्। अतएव विशेषामनुरंजने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीं राधां शीघ्रमेव गमयितुं म ऽयानिखादि दुःसहतामाह । अद्युसंगे सादि ॥ श्री खंड शैलानिलो म ऽयपर्वत
संबंधी पवनः ईशावलं ईशस्य महादेवस्य अवलं पर्वतं हिमालयं अनुसरति । कस्मादेव अरेः मलयस्य उत्संगे क्रो
डे वसंतो ये भुजंगाः सर्पास्तेषां कवलेन जनितो यः कृशस्तस्मादिव तहि हिमाद्री कि मिति प्रजतीसते आह । प्राले
येसादि । प्रालेयं तुषारतस्य यत् स्यलं वन मवगाहने तस्येच्छया अत्र सर्पैः कवलितो क्षीणस्य पवनस्य तद्विषसंप
६ ष्का । दृधिकं विरहिणीं संतापकं धनितं । निभे स्वऽपि महमेव दुःसहं वसंते अपरमीमाह । किं वे साह ॥ किं वेति । पि
कानां कोकिलानां कुहूः कुहूसेव रूपाः सर्वत्र उन्मीलंति प्रकटी भवंति । कीदृशाः । फलो त्ताला प क अव्यक्त मधुरा
(स्पृ) ५ अद्यु संग वस कुडंगा कवऽकेशादि वेशावलं प्रालेय प्लवनेच्छयानुसरति श्री खंड शैलानिलः ॥ किं व
स्निग्ध हसाल मौलिमुकुलान्यालोक्य हर्षोदयादुन्मीलंति कुहूः कुहूरीति कलोत्तालाः पिकानां
गिरः ॥ १२ ॥ ॥ इति श्री गीतगोविंदे श्री जयदेवकृतौ सामोद दामोदरो नाम प्रथमः सर्गः ॥ ॥
उत्तालाः उद्भूताः कस्मात् स्निग्धाः ये रसालाः आम्रवृक्षास्तेषां मौलिनभागाः तत्र याति मुकुलान्यालोक्य वीक्ष्य
यो हर्षोदयः आनंदस्य आविर्भावः तस्मात् । अत्र च विदग्धाः संगोपपाः । तत्र वधवसंते इत्सर्थः । तुषारस्ता
हिनं हिमं प्रालेयं हिमिका चैव समाः उत्तालो हेम कुंभस्याद्गर्वे चो कालऽकाले । श्रेष्ठेपि विकरालेपि स्याद्युत्ता
लः प्लवंगमइति विश्वप्रकाशः ॥ १२ ॥ प्रातिभ्रूसपुरा मयि प्रियतमा नीसा नुरागाद हं वे तस्यामपि पुनर्मितिः समम
भवमानादि रक्षापरः । नोजानेकतमैः पुनर्निजगुपोतस्याः सपत्नीन में कांता श्रीरमम जरीयमधुनाचं
तः समाकर्षति ॥ इति श्री महोपाध्याय श्री शंकर मिश्र विरचितायां गीतगोविंद टीकायां रसमंजरी नाम प्रथम सर्गः ॥

गी॰टी॰
१५

तद्वचनैः सख्या प्रबोधितायाः समस्मसमन्यापिः सह क्रीडंतं हरिं द्रष्टुमसहमानाया अत एव क्वचिन्निकुंजां त
र्गतायाराधाया अवस्थां तत्र वर्णयितुमाह ॥ विहरतीमादि राधारहः सखीं इति वक्ष्यमाणं अन्वयेऽकव
ती कीदृशी ॥ ईर्ष्यायां हेतुमाह ॥ विगलितेत्यादि ॥ विगलितो गतो निजः स्वीय उत्कर्षो आह । मेव हरौ रिति प्र
णयनि येवंरूपः तस्मात्त्व कसति ॥ हरौ कलवने विहरति सति ॥ कीदृशे हरौ साधारणे राधायामन्यगोपीग
नासमानः प्रणयः प्रेमा यस्य तादृशे ॥ अत एव दीना दुःखिता ॥ ॥ पुनः कीदृशी ॥ क्वचिदपि लतां कुंजेल

विहरति वने राधा साधारणप्रणये हरौ विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः ॥
क्वचिदपि लताकुंजे गुंजन्मधुव्रतमंडलीमुखरशिखरे लीना दीनाप्युवाच रहः सखीं ॥ १ ॥ ख

ताभिरतिनिबिडकुंजे लीनानि भृतं स्थिता ॥ ~~कीदृशे कुंजे लीनानिभृतं~~ स्थिता । कीदृशे कुंजे गुंजतः शब्दा
यमाना ये मधुव्रता भ्रमरास्तेषां यां मंडली पंक्तिः तया मुखरं वाचालं शिखरमग्रभागो यस्य तादृशे ॥
अत्र कुंजपदेन वल्लताच्छादितगृहप्राप्तौ लतापदमिति निबिडत्वसूचनार्थाय । प्रणयः प्रेमाभिविश्रं १५
भ इति विश्वप्रकाशः । ईर्ष्यामाद्धः समानेषु मानदानादमर्षणं इति च ॥ १३ ॥
र्नै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किमुवाचेत्यत आह॥ संचरदित्यादि। गीतस्यास्य गुर्जरी रागः॥ तालः प्रतिमठः। गीतार्थस्तु॥ मम मनः हरिं स्मरति॥ कीदृशं। रासे गोपक्रीडाविशेषे विहितः कृतो विलासो येन ताद्दृशं॥ एतच्च ध्रुवपदं॥ कीदृशं हरिं। संचरता तानप्रतानक्रमेण स्फुरता अधरेणाधरोष्ठेन सुधाया मधुरध्वनिमुखरितो वादितो मोहनवंशः परमोहकारी वेणुर्येन ताद्दृशं। तद्ध्वनिरवेन मोहितं मे मनः कृतापराधमपि तं स्मरतीति भावः। पुनः कीदृशं॥ चलितः कम्पितो भ्रूविशेषे अकारी कृते तुलमानायघूर्णितो दृगंचलोपांगो यत्र तादृशश्चंचलः स्वयमेव वेणुद्वारा प्रकटीकृतस्वरविशेषस्यान्येनाहे नास्वयमेव परितोषादेतान्दोलायमानो मौलिर्मस्तकं यस्यात एव कपोले विलोलश्चंचलो वतंसः कर्णभूषणं यस्य ताद्दृशः। पीयूषमनृतं सुधेसमरः॥ मौलिः किरीटं केशाश्च संयतामौल्ययस्त्रियरतिवा॥ पुस्तुतसाव

गुर्जरीरागे॥ प्रतिमठतालेन॥ संचरदधरसुधामधुरध्वनिमुखरितमोहनवंशं॥ चलितदृगंचलचंचलमौलिकपोलविलोलवतंसं॥१॥ रासे हरिमिह विहितविलासं॥ स्मरति मनो मम कृतपरिहासं॥ ध्रुवपद॥ चंद्रकचारुमयूरशिखंडकमंडलवलयितकेशं॥ मधुरपुरंदरधनुरनुरंजितमेदुरमुदिरसुवेशं॥२॥

तंसो द्वौ कर्णपूरे च शेषरे। इति च॥ ननु व्यासंगादिना सविस्मार्यतां प्रियत आह॥ चंद्रकेत्यादि। चंद्रकेन विचित्रवर्णचिन्हेन चारुणां मनोहराणां शिखंडकानां मयूरपिच्छानां मंडलेन समूहेन वलयितावेष्टिताः केशा येन ताद्दृशं। तथा वा त्र मयूरादिदर्शनेपितस्येव स्मरणं भवतीति ध्वनितं। पुनः कीदृशं। प्रचुरैर्बहुलैः पुरंदरधनुर्भिरनुरंजितः सवलितो यो मेदुरमुदिरः। सांद्रः स्निग्धो यो मेघः तद्वत् शोभनो वेशश्च कृतिर्यस्य ताद्दृशं। अत्र नानामणिखचितहारकेयूरादीनां इंद्रधनुःसाम्यं॥ श्रीकृष्णस्य च मेघसाम्यं बोध्यं। इयं चाद्भुतोपमा बोध्या। प्रचुरः पुरंदरधनुर्भिरनुरंजनं तस्य मेघस्याप्रसिद्धेः। समौ चंद्रकमेचकौ तिसमरः॥ बर्हिकं च सुपर्णमेचकं चेद्धतेनुधाउति कोसः। शिखंडस्तु पिच्छबर्हे नपुंसके समरः॥ वेष्टितं स्याद्वलयितमिति संपि। मुदिरः कामुके बुदर तिविश्वः॥ वेशो वेश्या गृहे प्रोक्तो नेपथ्ये गृहमात्रके इति॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰टी॰
१८

नन्वेवं चेत् स्मिन्ने रागानुरागि वेतस्त्वमतं कि मिति नानुसरसीत्यत आह ॥ गोपेत्यादि । गोपकदंबस्य आभीरसमूहस्य याः नितंबवत्यः प्रशस्त
नितंबशालिन्यः स्त्रियास्तासां मुखचुंबनेन लंभितः प्रापितो लोभो येन तं । तथा च महदाग्रेणान्यास्वनुरक्तः सद्यः स तावत् च कुत्र नम सहम
नोभिमतमनुसरामीति भावः ॥ यद्वा ॥ नन्वेवं यदि नैव्यं रागरहितो यत्प्रभुः गोपीभिः सह क्रीडतीति तं तदुक्तो ची ते नमयि कि चिं कतो षी मत
आह । गोपकदंबनितंबवतीभिः मुखचुंबनेन लंभितः प्रापितो लोभो यस्य तं ॥ तथा च ॥ तस्य तासु सहजः स्नेहो नास्ति परं तु बलात्का
रेण ताभिस्तथं वनेन लोभः कारितः सहजरक्त प्रणयो मय्येव तस्येति भावः ॥ पुनः कीदृशं । बंधुजीवपुष्पवन्मधुरो मनोहरोऽधरपल्ल
वः पल्लवाग्रे तिरधरो यस्य तं । उल्लसितेन स्मितेन ईषद्धास्येन शोभा यस्य तं । तथा च बंधूककुंदादिदर्शने नापि तदीयाधरहास्यस्मार

गोपकदंबनितंबवतीमुखचुंबनलंभितलोभं । बंधुजीवमधुराधरपल्लवमुल्लसितस्मितशोभं ॥ ध्रु॰ ॥ विपुलपु
लकभुजपल्लववलयितबल्लवयुवतिसहस्रं ॥ करचरणोरसिमणिगणभूषणकिरणविभिन्नतमिस्रं ॥ ४ ॥

केनसखेव स्मार्यत इति भावः ॥ रक्तवर्णबंधूको बंधुजीवकस्तस्य मरः । सुरेणोपि मधुरः प्रोक्तो मधुरोत्यमनोहरोऽसेने कार्ये ॥ ३ ॥ ॥
पुनः कीदृशं । विपुलेत्यादि ॥ विपुलः पुलको रोमांचो यत्र तादृशाभ्यां भुजपल्लवाभ्यां पल्लववत्कोमलाभ्यां बाहुभ्यां वलयि
तं बल्लवयुवतीनां आभीरकांतानां सहस्रं येन तादृशं । अत्र वलयितमित्यनेन आलिंगनमात्रं न तु गाढालिंगनं ॥
रहस्यचुंबनालिंगनादिकं स्वस्यैवेति तस्य स्मरणमुचितमेवेति ध्वनितं । पुनः कीदृशं । करयोश्चरणयोरुरसि च यानि मणि
मयानि भूषणानि तेषां किरणैर्विभिन्नं नाशितं तमिस्रं तमो येन । एतेन प्रथमा मिमा स्वकीयालंकारकिरणैः रुद्धान्तः स्मिति
लज्जयापरावर्तमानानां मोहगादानीयतां चेष्टा कृतवान्ये न लक्षणमपि मन्मनो न विस्मरतीति ध्वनितं । अंधकारो
स्त्रियां ध्वांतं तमिस्रं तिमिरं तमः इत्यमरकोशः ॥ ४ ॥ १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनः कीदृशं ॥ जलदपटले सजलमेघसमूहे वलत् संचरत् । य इंदुश्चंद्रः तस्य निंदकः शोभातिशायी चंदनबिंदुमंडला
कृति तिलकं यत्र तादृशं ललाटं यस्य तादृशं ॥ पुनः कीदृशं ॥ पीनौ मांसलौ यौ पयोधरौ स्तनौ तयोः परिसरस्य पर्य
न्तभागस्य मर्द्दने निर्दयं हृदयकपाटं कपाटवद्विस्तीर्णं हृदयं यस्य तादृशं ॥ ५ ॥ पुनः कीदृशं ॥ मणिमये माणिक्यखचि
ते मकरवन्मनोहरे ये कुंडले ताभ्यां मंडितौ गंडौ कपोलौ यस्य तं । पुनः कीदृशं उदारं [illegible]र्य गुणयुक्तं । अत्र सं रहसि
मया यद्यद्भावितं तत्सर्वं तत्क्षणादेव पूरितवानिति स कथं न स्मर्यत इति ध्वनितं । पुनः कीदृशं । पीतेन वसनेन वस्त्रं

जलदपटलवलदिंदुविनिंदकचंदनतिलकललाटं । पीनपयोधरपरिसरमर्द्दननिर्दयहृदयकपाटं ५
मणिमयमकरमनोहरकुंडलमंडितगंडमुदारं । पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारं ६

यस्य तादृशं ॥ उदार्योपपादकं विशेषणमाह ॥ ॥ अनुगतेत्यादि ॥ अनुगता आश्रिता ये मुनयो नारदादयो । सुराः
प्रह्लादादयः त एव वराः श्रेष्ठाः परिवाराः परिजना यस्य तं । तथा च तैरप्याधिगतस्वाभिमतफलैः सततं सेस
व्यत इति तस्यौदार्यं ख्यातिमेवेति भावः ॥ परिवारः परिजने खड्गकोशे परिच्छदेष्वपि ॥ दानमभ्युपपत्तिश्च
तथा च प्रियभाषणं ॥ स्वजने च परे वापि तदौदार्यमिति स्मृतमिति नायकौदार्यलक्षणं ॥ ६ ॥ ॥ ८२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी·टी·
१७

पुनः कीदृशं ॥ विशदस्य निर्मलस्य कदंबस्य तले मूले मिलितं संलग्नं ॥ मत्संकेतीकृत कदंब तले मदपेक्षया यत एव गत्वा
केवलं मां पश्यंस्तिष्ठति मूर्च्छितारणाप्ययवा । लीयस्थितं हृत्कंमे ॥ मनः स्मरतीत्यर्थः ॥ पुनः कीदृशं ॥ कलिः प्रणयक
लहस्तस्माद्यत्कलुषं चित्ते कश्मलं अहं संकेतु समागता यां न भाते । प्रायशो यं वल्लभो मत्तो भविष्यति परं यदा स्म
तितदा मयानुसंभाषणीय इ सेयं रूपं । कांचिनै कथमप्रतिष्ठामीति च भयं एतद्भयं कदंबमूलादुपेत्य चाटुक्तिभिः
शमयंतं इत्यर्थः ॥ यद्वा ॥ कलेः कलियुगस्य यत्कलुषं पापं तस्माद्भयं शमयंतं इत्यर्थः । पुनः कीदृशं । किमपि निर्वचनी
यं यथा स्यादेवं तरलतरतरंगइत्यात्र अनुवारंवारमुकुलनंगाः कामो यत्र एतादृश्या दृष्ट्वा मनसा च मामपि रमय

विशदकदंबतले मिलितं कलिकलुषभयं शमयंतं ॥ मामपि किमपि तरंगदनंगदृशा मनसा रमयंतं ७
श्रीजयदेवभणितमतिसुंदरमोहनमधुरिपुरूपं ॥ हरिचरणस्मरणं प्रति संप्रति पुण्यवतामनुरूपं ॥ ८ ॥

तमित्यर्थः ॥ मामपीत्यपि शब्देन सा सखीं गोपिका अहमपि हरेः कस्य चिह्नो कातर ॥ एतावत्स्यपात्र मा संनले ताहृश्ये
वैतिध्वनितं ॥ कलिः स्यात्कलहे शूरे कलिरंत्ययुगेयुधीति विश्वप्रकाशः ॥ कलुषं ताविलैनसोरिति च ॥ ७ ॥ श्रीजय
देवेत्यादि । श्रीजयदेवकवेरिदं भणितं पुण्यवतां कृष्णस्मरणानुकूला दृष्टवतो हरिचरणस्मरणप्रीति कर्तॄ अनुरू
पं योग्यं ॥ कीदृशं । अति सुंदरमोहनं गोपवधूमोहकारि मधुरिपोः कृष्णस्य रूपं वर्णनीयं यत्र तादृशम् ॥
कलौ रागिणां एव वहवस्तत्त्वावश्यं गारादि रसास्वाद नापि भवि जयदेववाणी श्रवणे प्रवृत्ता भावनाया सहरिस्मरणं भ
व तीति भावः ॥ ८ ॥ १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षं

ननु हले त्वां विहायान्यगोपीभिः सह विहरति तं किमिति त्वं स्मरसीत्यत आह ॥ गणयतीत्यादि मम मनः हले पुनरपि का
ममभिलाषं करोतीति तत् किं करोमि । कीदृशे हले । युवतिषु बल्लवेषु गोपवधूषु बलं तीव्रं वर्द्धमानं दृष्टं तस्मा यस्य ताद्रृशेऽ
तएव मां विना विहारिणी वारंवारं विहरणशीलेनुतु विहरति ॥ कीदृशं । मनोऽतएव वामं प्रतिकूलं वाम त्वं हे हतं त
रमप्याह गणयतीत्यादि । तस्य गुणानां सौंदर्यादीनां ग्रामसमूहं गणयति परिसंख्याति कामं क्रोधं भ्रमादपि न ह
तेन छिति । दोषं मद्विध कामिन्यवधीरणादिकं दूरतो विमुंचति ॥ तत्र हेतुमाह ॥ वहतीति । परितोषं संतोषं वहति ॥ अ

गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते वहति च परीतोषं दोषं विमुंचति दूरतः ॥ युवतिषु बलत्तृष्णे हले
विहारिणीं मां विनां पुनरपि मनोवामं कामं करोति करोमि किं ॥ १२

त्र विभावनाविशेषोक्ती अलंकारौ ॥ निजानुसारणरूपानुरागहेतुं विना यदनुरागप्रकाशनात् ॥ अन्यांगनासक्तिरूप
वैराग्यहेतुमत्त्वेपि वैराग्याकथनाच्च ॥ तथाच काव्यप्रकाशकारिका ॥ क्रियायाः प्रतिषेधेपि फलव्यक्तिर्विभा
वना ॥ विशेषोक्तिरखंडेषु कारणेषु फलेवचः ॥ एषा च काव्यप्रकाशकृता व्याख्याता । हेतुरूपक्रियाप्रतिषेधेपि फल
प्रकाशानं विभावना । मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिरिति ॥ ग्रामः संवसथे वृंदे शब्दा
दिपूर्वकः ॥ इति विश्वप्रकाशः ॥ कामः क्रोधेरवोदीप्ताविति च ॥ वामं सव्ये प्रतीये चेति च ॥ कामः स्मरे भिलाष
चेत्यपि स एव ॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गीगो
१८

रम.श्री

अथो(त्क)ण्ठिता राधा सखीं स्वमनोरथानाह॥ निभृते सादि। हे सखि मया सह केशिमथनं हठात् रमय। कीदृश्या मया मदनेयु मनोरथ इच्छा तद्युक्तो यो भावो रसः सः मन्मथो यस्यां तादृश्या॥ यद्वा॥ मदनमनोरथेन भावितया प्रा(प्त)मया॥ अनुक्तो वेद समर्थ नैकद्वि न्याया॥ सत आह॥ उदा॥ शुद्धार्थ गुणयुक्तं। न तथा स्वल्पार्थितम वश्यं मदास्य भवति भावः। कीदृशं हे स्खे सविकार विकारामानसो भावस्तत्सहितं। एतदर्थमन्योन्यानुरागपूर्वकत्वेन शृंगाररसपुष्टत्वं॥ अन्यथा रसाभासो भवतीति तात्पर्यं॥ यद्वा॥ सविकारमितिक्रियाविशेषणं विकारस्तनप्रांतादिस्पर्शकरणं तत्सहितं यथास्यात् एवं तं मदनमनोरथभावितया इत्यन्वयः। तदुक्तं रसिकसर्वस्वे॥ नाभीमूलकुचादरप्रकटनं व्याजेन यद्योषितां सा कांक्षामुकुलीक्षणादिसवलिका नीवी निबंधस्य च॥ केशाग्रंशनसंयमो वु कथितो मित्रादिसंदर्शनैः सौभाग्यादिगुणप्रकाशकथनैस्तासां तु रागो इति तानिति॥

गोडमालवरागे। एकतालीताले॥ निभृतनिकुंजगृहं गतया निशि रहसि निलीय वसंतं। चकितविलोकितसकलदिशा रतिरभसरसेन हसंतं॥ सखि हे केशिमथनमुदारं रमय मया सह मदनमनोरथभावितया सविकारं॥ ध्रुवपदं॥

अत्र केशिमथनपदोपादानं सामर्थ्यख्यापनाय तत्संयोजनं च निःशंककेलिप्रतिपादनं। भाविते अत्र प्रथमख्यापनेतारकादिताडितत्वात् द्वितीयपक्षे भावितेवासिते। प्रसादइतिविश्वप्रकाशः॥ ध्रुवपदं॥ पुनः कीदृश्या मया॥ निभृतमेकांतं यन्निकुंजरूपं गृहं तत्रागतया॥ कीदृशं हलं। निशि रात्रौ रहसि एकांते निलीय तिरो[illegible]वसंतं। एवंभूतं मां राधा मा पश्यतु इति कुतुकेन मत्प्रेमगूढता। शा यमं कुचितं मां त्या नं कृत्वा वस्थितं इतिभावः। पुनः कीदृश्या मया। चकितं यथा स्यात् एवं विलोकिताः सकला दिशो यया तादृश्या। कुत्र कृष्णो निलीयतिष्ठतीति कृष्णागमसांतो मां मा कश्चन पश्यत्विति वा चकितं पश्यंतेति भावः। कीदृशं हलं। रतौ यारभसउत्साहस्तत्पुष्कोयो रसः शृंगारास्यस्तेन हसंतं। क्रीडायां कान्ध्र यासाहित्पुतया त्मेत्र

पुनः कीदृश्या मया। प्रथमसमागमवत्ते लज्जितया। एतमवधीर्य्याहमागता संप्रति कथमेतस्याग्रे प्रकटया आत्मानमि
ति लज्जाकारणं॥ कीदृशं हृत्स्थं॥ पटुनायकः प्रसादनसमये यद्चाटुशतं। प्रियवचनशतं तेनानुकूलं॥ पुनः कीदृश्या मया॥
मृदुकोमलं माधुर्यगुणयुक्तं स्मितयुक्तं भाषितं यस्यास्तया। तदीयचाटोक्तिभिः प्रहृतलज्जाया किंचिद्विस्मितं भाषितं यये
त्यर्थः॥ कीदृशं हृत्स्थं॥ शि[illegible]तां शिथिलीकृतं स्मितादिनानुकूलया मां तातो शिथिलीकृते
जघनस्थितं दुकूलपटं रत्नं येन तादृशं॥ अशेषनामकमपि श्रीकृष्णदर्शनेन नष्टं वंधोपि[illegible]नी। स्वयमेव स्त्र

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलम्॥ मृदु
मधुरस्मितभाषितया शिथिलीकृतजघनदुकूलम्॥२॥

लिष्यति ततो मे स्खलांलंबितं जघनास्थितमेव वासस्तेनापहरणमिति जघनेस्फुपातं॥ तदुक्तं रतिरहस्ये॥ ऊ
ष्टाग्रं स्फुरती क्षणेविवलतः कूपोदरे मत्स्यवत् धामिद्धः कुसुमांकुशो विगलति प्राप्नोति वंधं पुनः॥ प्रष्ठनेत्रनत
स्तनो प्रकटतां श्रोणीतटं दृश्यते नीवीव स्खलति स्थितापि सुदृढकामेंगिते योषितामिति॥ चाटुतेरिप्रियोक्तिः
स्यादिति रत्नमाला। जघनं कटेरधोभाग इति हारावली॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰टी॰ पुनः कीदृश्यामया। किशलयशयने पल्लवशय्यायां निवेशितया॥ कीदृशं कृष्णं॥ चिरं बहुकालं व्याप्य ममैव उरसि वक्षसि शयानं॥ स

११ रसं॥ एतेन लिंगन विशेषः स्नीरं नीरं स्यउक्तमस्तदुक्तं पंचसायके॥ गाढोपरि बाहुस्वतत्स्य मध्ये संलीय नेयन्मिथुनं शरीरे॥ कामाभिमानास्त

तचूर्णविष्टं तत् स्नीरनीरास्यमिदं प्रदिष्टमिति। कीदृश्यामया। कृतपरिरंभण चुंबनेन या तादृश्या एवंच जयनोप। श्लेषरूपालिंगनाभि

प्रायेण॥ तदुक्तं॥ धैर्ये न कल्पित कांतास्त्रोणि पुरोपुरिष्टाहृजति यदिह नारि भवत्तु केशाभरीया॥ कामेरस्ते नस्वसे चुंबनं वा विधिस्तु कल्पय

तिश्च यनोप श्लेष मेनं मुनीदं इति॥ चुंबनमपि कृतास मोष्टारसं बोध्यं॥ तदुक्तं पंचसायके॥ व्योष्ठेन वा तस्य मुखे वाहुयुग्मं निःपीडयन्ति

कावित तानुभाग॥ चुंबा सवं रसति च वक्षारिपो मं समो ष्ठ मुनिभिः प्रवीणै रिति॥ कीदृशं कृष्णं। परिरभ्य आलिंग्य कृतं मया अधरपानं य

नतं॥ अनेन लीलारिकमालिंगनमुक्तं॥ तदुक्तं पंचसायके॥ अन्योन्यसंसक्त मुखं कपोलेनवलललाटं हृदयं च बाहुं॥ सानंदभावच्य मभोल्लि

किशलयशयननिवेशितया चिरमुरसि ममैव शयानं॥ कृतपरिरंभणचुंबनया परिरभ्य कृताधरपानं॥ ७॥ सखि

सनिमीलितलोचनया पुलकावलिललितकपोलं॥ श्रमजलसितकलेवरया वरमदनमदादतिलोलं॥ ८॥

तालिंलीलालारिकं तद्विदो वदंति। पल्लवो किशलयमिति समरः॥ ७॥ पुनः कीदृश्यामया॥ अलसे आलस्ययुते। त... लिते मु

द्रितेलोचने नयया तादृश्या॥ अत्र निमीलिते यदि उपादानादव घृष्टारसं चुंबनमुक्तं॥ तदुक्तं पंचसायके॥ हस्ते... दरीमीन्म

भर्त्तुः संमीलिताक्षी वदने स्वजिह्वां॥ निक्षिप्य चक्रीडति। यत्र लोला रव्यात रसे वेर वृष्ट स संसामिति॥ कीदृशं कृष्णं। पुलकावल्या

रोमांचपंक्त्या ललितो मनोहरो कपोलो यस्य तं॥ पुनः कीदृश्यामया मदन चिंताजनितो यः श्रमाविततरवेदस्तज्जनितं यज्जलं प्र

स्वेदस्तेन सकलं पूर्णं कलेवरं मंगं यस्याः श्चावित श्रमजल सिक्त कलेवरयेति पाठः॥ सयुक्त एव॥ कीदृशं कृष्णं। वरउत्कृष्टो १२

योमदनकृतो महोहर्षस्तेनाति शयेन लोलं चंचलं॥ कायेव कलेवरमिति विश्वप्रकाशः॥ ८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनः कीदृश्या मया॥ कोकिलस्य कलो ऽव्यक्तमधुरो यो रवः शब्दः तद्वत्कूजितं शब्दितं यस्यास्तया। अनेन कूजितात्स्वं
बाह्यतरमुक्तं॥ तदुक्तं पंचसायके॥ पिकोऽपि शिखि कलहंसप्रायपक्षिव्रजानां स्वनितमनुकरोति ह्यंगना मन्मथार्त्ता॥ मुखर
शनविवर्त्तात् कवीडैर्वदंति स्तनितमिति समासाच्चित्रसंभोगकाले॥१॥ ननु वात्स्यायनादिशास्त्रे ऽप्येव क्रमतः
तदुक्तं॥ आश्लेषं प्रथमं कुर्यात् द्वितीयं चुंबनं तथा॥ तृतीयं नखदानं च दंष्ट्राघातं चतुर्थकं॥ पंचमं शेषणं प्रोक्तं षष्ठं प्रह
रणं तथा॥ सप्तमं च मे कंठशब्दश्च वक्ष्यते गाष्टं वं रतमिति॥ तथा चात्र कंठशब्दस्य सप्तमं रतस्याग्रे वक्ष्यमाणनखदाना दिर

कोकिलकलरवकूजितया जितमनसिजतंत्रविचारं॥ श्लथकुसुमाकुलकुंतलया नखलिखितघन स्तनभारं

ता ह्याक्रमणे श्रीकृष्णस्य रसिकता भंगः स्यादित्यत आह॥ जितेत्यादि॥ जितो वशीकृतो मनसिजतंत्रस्य कामशास्त्र
विचारो येन तं चतुःषष्टिकलाकुशलस्यापि परमरसिकस्य जगदीश्वरस्यात्रानुकूलो न मनायकासंनिधौ समय
तयाक्रमस्य ग्रहणाभावान्नदोषः॥ तदुक्तं॥ रतिचक्रप्रवृत्तस्य नैव शास्त्रं न च क्रम इति॥ पुनः कीदृश्या मया॥ श्लथाः
केशग्रहणपूर्वकचुंबनादिदानेन शिथिलाः कुसुमैराकुला व्याप्ताश्च कुंतलाः केशकलापा यस्यास्तया॥ कीदृशं
हृष्टं॥ नखेन लिखितस्तत्युक्तः स्तनः स्तनभारो येन तं॥ अत्रालिखितपदोपादानात्संकजपत्राख्यं नखदानमु
क्तं। तदुक्तं पंचसायके॥ असवर्णमेकस्फुरितोद्भ नखाग्रात्प्रादुःस्तत् पंकजपत्रसंज्ञं। दोर्मूलवृक्षस्तनना भिसंधौ च
स्थापयोगं मनुते महेश इति। तंत्रं प्रधानशास्त्रयोरिति विश्वः॥ विकुरः कुंतलो बालः कचः केशः शिरोरुहः इत्यमरः॥

गीं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰टी॰ २०

एतावत्पर्यंतं पंचपंचपद्यानि लिंगनादिसप्तविधं बाह्यरतमुक्तं । संप्रति बंधारब्धमष्टरतमाह । चरणेत्यादि । चरणयोरणि
तौ शब्द्यमानौ मणिखचितौ नूपुरौ यस्याः तया ॥ एते ये भ्रामरकभ्रामविपरीतरतमभिप्रायेणोक्तं ॥ तदुक्तं रतिरहस्ये ॥
चक्रवद्भ्रमति कुंचितांघ्रिका भ्रामरं रुजघनं समुच्छ्रितं इति ॥ कीदृशं रतं ॥ परिपूरितं सुरतवितानं रतिविस्तारो येन तत् ॥
अनेन नायककर्तृकाबंधः कथितः ॥ भ्रामरकबंधः श्रीतां विदित्वा किशलयशयने स्थितां मां स्वयमपि रमइष्य
तीति भावः । पुनः कीदृश्या मया । पूर्वं मुखशब्दायमाना पश्चाद्विस्रंसखला हटितगुणमेखला कांची यस्याः तया ।
अनेन प्रेंखोलितं नाम कं विपरीतरतमुक्तं वात्स्यायनीये पुरुषायितप्रकरणे । सजनमेवदालायमानं सर्वत्र आ

चरणरणितमणिनूपुरया परिपूरितसुरतवितानं ॥ मुखरविस्रंसखलमेखलया सकचग्रहचुंबनदानम् ६

मे यदिति प्रेंखोलितकपिति ॥ ७ ॥ तत्र सर्वत्र शाब्दमनोरमा कारेणाख्यातः ॥ मध्यमशब्दे पश्चिमभागे दक्षिणे
तर भागे वेति रहस्ये ॥ सर्वतः कटितटत्रेमा यदि प्रेंखपूर्वमिदमुक्तं मूर्च्छितमिति ॥ अत्रापि सर्वशब्दार्थः ॥ सए
व ॥ कीदृशं रतं । सकचग्रहं केशग्रहणं सहितं चुंबनदानं यस्य तत् ॥ केशग्रहणपूर्वकं चुंबनं विपरीत एवोक्तं ॥ तदु
क्तं ॥ शृंगारे चुंबनं कार्यं पुंसालिंगनपूर्वकं ॥ विपरीतरते नार्याः सकचग्रहचुंबनमिति ॥ मेखला खडुबं धे
स्यात् कांची शीलनितंबयोः इति विश्वप्रकाशः ॥ ६ ॥ २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनः कीदृश्या मया ॥ इति सुखसमये सुरतसुखप्राप्तकाले चोकोन्तरानुभवका स्पंप्राप्तो यः संभोगशृंगाररस्यो रसस्तेनालसया
मंथरया ॥ कीदृशं कृष्णं ॥ दरईषत् मुकुलिते मुद्रिते नयनसरोजे नेत्रकमले यस्य तं । एतेन युगपदेव द्वयोरानंदावाप्तिः सूचिता ॥
तदुक्तं रतिरहस्ये ॥ मूर्छनामीलनं वा स्यात्सुस्रुतिकालस्खलनमिति । पुनः कथंभूतया मया निःसहा असमर्था जातया ॥ किशल
यशालयशायने निपतिता तनुलतायया तया । अनेन सुरतांतसमय उक्तः ॥ तदुक्तं ॥ खेदः स्वेदः श्वसथुर्लवो वैवशं वक्त्रादिसंवृतिः ॥
ज्ञातेस्मृतिसुखे नार्या विरामे छायाञ्जायते ॥ इति ॥ न वभिसारविघ्नबाहुल्यं कथमेताव क्रियाकपालुः संभवितथ इत आह ॥
मुंघुसूदनमिति । मधुनामा नंदेसंसूदितवान्यस्तस्याभिसारविघ्नान्निवारणाक्रियासौ रि श्रम इति भावः । कीदृशं मधुसूदनं ॥ उरि

रतिसुखसमयरसालसमादरमुकुलितनयनसरोजं ॥ निःसहनिपतिततनुलतयामधुसूदनमुदितमनोजं ॥७॥
श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलं ॥ सुखमुत्कंठितगोपवधूकथितं वितनोतु सलीलं ॥८॥

तस्मिन्काले त्रुटितमुक्ताहारकांचीगुणस्वस्थस्थानपुनःसंघटनसंजातपयोधरश्रोणिपरिसरस्पर्शादिना सल्लज्जास्मितरा
धायां गच्छतोकनादिना वपुनराविर्भावो मनोजः कामो यस्य तं ॥ तदुक्तं वात्स्यायनेन ॥ अथ मानेपि च प्रीतिरूपचारैरुपक्रमेत ॥ सवि
श्रंभकथयोगैरतिं ज्ञनयंतं परामिति । उक्तं ठिताश्चेयं नायिका ॥ तदुक्तं ॥ नैवागतः समुचितेपि वासरेषु प्राणेश्वरः सगुरुकार्य
वशान यस्याः ॥ दुर्वारदत्तविरहज्वरतापितांगी मुत्कंठितां तामादृभरतः कथिं इति ॥७॥ श्रीजयदेव आह ॥ इदं श्रीजयदेव
कविना भणितं वर्णितं यदुक्तं कंठितायां गोपवध्वा राधिकाया ॥ तत्सुखं वितनोतु विस्तारयतु ॥ पवतां श्रृण्वतां च ॥ कीदृशं
मधुरिपोः निधुवनं सुरतक्रीडा शीलयती शील स्वरूपं । अथोत्र निधुवनं सुरतं वरतं संभमित्यमरकोशः ॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰टी॰ २१ स्वमनोरथांतरमाह ॥ हस्तेत्यादि ॥ हे सखि अहं ध्यानेन गोविंदं पश्यामि कदापि तद्गोविंदस्य दर्शनं मम भविष्यतीत्या
शासायां काकुः ॥ अतएव हृष्यामि तद्दर्शनजन्यआनंदामृतमकरंदबिंदुवर्षिणी सत्यपि पुंसः सैव पश्यामि हर्षामीति भ
विष्यता मीप्सेवर्त्तमाना ॥ कीदृशं ॥ व्रजसुंदरीगणवृतं गोपवधूकदंबपरिवृतं । ननु सपत्नीभिः परिवृतं तं दृष्ट्वा कथं तेह
र्षो भविष्यतीत्यत आह ॥ मामिति ॥ मां उद्वीक्ष्य दृष्ट्वा विलज्जितं अन्यवधूभिः परिवृतो हमनया दृष्ट इति हेतो
र्विषादस्मृतवक्रय तस्मितं तदेव सुधांशुपतनाददतिस्पृहणीयत्वाच्चतया मुग्धं मनोहरमाननं मुखं यस्य तं ॥ त

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवीवृंदोत्सारिदृगंतवीक्षितमपि स्वेदार्द्रगंडस्थलं ॥ मामु
द्वीक्ष्य विलज्जितं स्मितसुधामुग्धाननं कानने गोविंदं व्रजसुंदरीगणवृतं पश्यामि हृष्यामि च ॥ १ ॥ ७।७५

था च सुंदरीशतवृतोपि झगिति मां दृष्ट्वा सापराधमात्मानं मन्यमानो मत्तो बिभेतीति हर्षेऽपि तस्येति भावः ॥ पुनः की
दृशं ॥ अनृजुः कुटिला भ्रूवल्लिमूलतायासामेता दृश्यो गोपवध्वस्तासां वृंदमुत्सारयत्युत्सारयतीत्येवं शीलं दृगंतवीक्षि
तं नेत्रं नेत्रांतेनावलोकितं यस्य तं ॥ मय्यागतायां भियादृगंतवेष्ट्या अन्यगोपीर्निःसारयतीत्यर्थः ॥ पुनः कीदृशं ॥
हस्तात्स्खलतो मर्द्दनेन साध्वसवशात्स्खलितो विशालवंशः पृथुः क्रीडावेणुर्यस्य तं । पुनः कीदृशं ॥ अतिशये २१
न स्वेदः प्रस्वेदे गंडस्थले यस्य तं ॥ सर्वत्र मामुद्वीक्ष्येत्यस्य संबंधः ॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सखिधैर्यमवलंबस्व मिलित्प्रियस्य वृत्तांतं हरिरिसाश्वासयंती दूतिमेव रयि तु माह ॥ दुरालोक इति। हे सखि स्तोकोल्पः स्तबको गुच्छो यस्याः
तावत् दृशीयानवि कातिनवा शोकलतिकानुकंपा शोकाशास्यात स्य विकाशस्फुट्टो बोधो दुरालोको दुःखेनालोक्यते शक्यः। नव
वेसत्र इदृश कः लतिके सत्रानुकंपायाकः ॥ मदुक्तपाल्लितात एवानुकंप्याप्यशोकलतिका दुरालोकेति भावः। किंमपरं कासारः सरसी
तत्संबंधी यदुपवनं तत्संबंधी यः पवनो वायुः सोपि व्यथयति दुःखं ददाति। कासारवहनेन वायोः शैत्यं कथितं। उपवनसंबंधीत्वेन
सौगंध्यं माधवं ध्वनितं। यतो वनेन दृष्टो रूपहतगतिस्तेन मंद एव वायुर्भवतीति ॥ यद्वा ॥ स्तोकेत्यादि। वायोरिव विशेषणं तदा स्तोकस्तबक
नवकाशोकलतिको विकाशयतीति स एव भूतः पवनो व्यथयतीत्यन्वयः। नन्वभिमुखमागच्छन्नपवनो वनादि नानिर्गतः तत्राह
दुरालोकः अतींद्रियः इत्यर्थः ॥ तथा च कस्मादेवायं तत्र दृश्यत इति भावः ॥ अपि च ॥ इयं शिखरिणी गोवर्धने पर्वते वर्तमाना चूतानां

दुरालोकस्तोकस्तबकनवकाशोकलतिकाविकाशः कासारोपवनपवनोपि व्यथयति ॥ अपि भ्राम्यद्भृंगीरणित
रमणीया न मुकुलप्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ॥१९॥ इति गीतगोविंदे अक्लेशकेशवो नाम द्वितीयः

भ्राम्यतां मुकुलप्रसूतिरपि कुड्मलोद्गमोपि न सुखयति विकाशदशायां तु को वेद किं करिष्यतीत्यपि क विनासयितं ॥ यद्वा ॥
किंदृशी मुकुलप्रसूतिः। शिखरिणी प्रशस्ता भगवती सर्यः ॥ शिखरिणीति प्रशंसायां इतः ॥ यद्वा ॥ इयं शिखरिणी मल्लिका
न सुखयतीत्यर्थः ॥ किंदृशी भ्राम्यंतीनां भृंगीनां भ्रमरांगनानां रणितैर्गुंजितैररमणीया ॥ शिखरिणो नाम कण्ठे रदनप
तिर्धनितं। लदृशार्णवृत्तस्य स्लोकरे। रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणीति। स्लोकान्ते नातकपि विप्रलम्भः ॥ काकासा
रः सरसी सरसंमरः ॥ क्षीरः मल्लिकायां विप्रोक्ता शिखरिणी बुधैरिति विश्वप्रकाशः ॥१९॥ काव्यशोभन्तुमादिदुर्लभनयस्फीतं प्रसा
दादिभिन्न कमीकांत विलास वर्णनरसत्वाभिज्ञो कार्येर ॥ सर्वं चैवदरन्यरूढिते पद्मावतीभ भेरो वा वंद्मसमं जरीर चयते श्रीशालि
नाथः कृति ॥ ॥ इति शंकरमिश्रविरचितायां गीतगोविंदटीकायां रसमंजर्यां द्वितीयः सर्गः ॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰टी॰ राधायाः कृष्णविषयिणीमनुरक्तिं गतमुक्ता संप्रति कृष्णस्यापि तस्यामनुरक्तिमाह। कंसारिरित्यादि॥ कंसारिरपि कृष्णोपि व्रजसुंदरीस्त
२२ त्याज। त्यागे हेतुगर्भं विशेषणमाह॥ राधामिति॥ राधां हृदये आधाय आरोप्य। सुंदरीसदेशे बहुवचनेन च सौंदार्य्ये रूपि च द्वि वनी
पितसाऽसेति कथनेन च कृष्णस्य राधायामनुरागातिशयो ध्वनितः॥ कीदृशीं राधां॥ संसारविषयिणी या वासना संस्कार
स्तस्य बंधाय शृंखलामिव। अनेनाक्षिप्ता स्वास्थ्या प्रथमावस्था कथिता। तदुक्तं तुंदरारूपके। अभिलाषः स्पृहा
तत्र कान्ये सर्वांगसुंदरे। दृष्टे श्रुते वा तत्रापि विस्मयानंदसाध्वसाइति॥ शृंगारश्चायं स्फारो वस्त्रबंधोपि निगडोपि चेति विश्वप्र
काशः॥१॥ इतस्ततइत्यादि। स माधवः कलिंदनंदिन्या यमुनायास्तटांतकुंडे तीरप्रांतवर्तिलतापिहितोदरगृहे निषसाद नि

कंसारिरपि संसारवासनाबद्धशृंखलां॥ राधामाधाय हृदये तत्याज व्रजसुंदरीः ॥१॥ इतस्ततस्तामनुसृत्य
राधिकामनंगबाणव्रणखिन्नमानसः॥ कृतानुतापः स कलिंदनंदिनीतटांतकुंजे विषसाद माधवः॥२

षण्णः॥ अत्र माधवपतस्याः श्रियोधवः स्वामी यदि रहस्या कुत्र बभूवेति राधायाः सौभाग्याधिक्यं ध्वनितं॥ किं कृत्वा॥ इत
स्ततः तेषु तेषु स्थानेषु तां हृदयनिहितां राधिकां अनुसृत्य अन्विष्य॥ कीदृशः॥ अनंगः कामस्तस्य बाणास्तैर्यद्व्रणं क्षतं
तेन खिन्नं दुःखितं मानसं यस्य सः॥ पुनः कीदृशः॥ कृतानुतापः किमिति मया तस्याः अवधीरणं कृतमिति पश्चात्तापोमे
यः स अनंगबाणोत्सवा नाम्पदे नांकु रित स्मात एवालक्षितगता गतस्य कामस्या रोपदुष्कर मनेनापि कृष्णेन निवारण क २२
र्तुं न शक्यमिति ध्वनितं। अनेन श्लोकेन चिंताख्या द्वितीयावस्था ध्वनिता। तदुक्तं शृंगारतिलके॥ कथं स वल्लभः प्रा
प्यः किं कुर्यां तस्य सिद्धये॥ कथं भवेदसौ वश्या इति चिंता भवेद्यथेति ॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्यानुतापमेव गीतेन कथयति ॥ मामियमित्यादि ॥ गीतस्यास्य गुर्ज्जरीरागः प्रतिमंठतालः ॥ गीतार्थस्तु ॥ हरिहरि हा कष्टं सा राधा हतादरतया न
ष्टबहुमाना तया कुपितेव गता ॥ ध्रुवपदं ॥ ननु सा कुपिता गतेति कथं त्वया ज्ञातमित्यत आह ॥ मामियमित्यादि । मां वधूनिचयेन गोप
वधूसमूहेन वृतं वेष्टितं विलोक्य दृष्ट्वा चलिता प्रस्थिता विलोकिस्य एव हि न पूर्वकाले स्वस्याः प्रसङ्गस्तेन गोपवधूवेष्टितं मां दृष्ट्वा व्य
वहितकाल एव यतश्चलिता ततो ज्ञायते कुपितेति भावः ॥ ननु मा गच्छेति त्वया किमिति न निवारितेत्यत आह ॥ सापराधतयेत्यादि ॥
मयापि भयेन नातिशयित सीमा सा न निवारिता ॥ भयहेतुमाह ॥ सापराधतयेति सापराधां राधां विहायान्यगोपीभिः सह क्रीडा कृ
तयुक्ततया ॥ १ ॥ सा चिरं विरहेण चिरकालीन मद्वियोगेन किं करिष्यति विरहतापशान्त्यर्थं उपायं करिष्यतीत्यर्थः ॥ अथवा किं
वदिष्यति । किं मम कथां वा वदिष्यति दोषान्वा वदिष्यतीत्यर्थः ॥ यद्वा ॥ काकुस्वरेण किं वदिष्यति । मया सह कदाचित् वार्त्तां कथ

॥ गुर्ज्जरी-प्रतिमं- ॥ मामियं चलिता विलोक्य वृतं वधूनिचयेन ॥ सापराधतया मया-न निवारितातिभयेन ॥ १ ॥ हरिहरि
हतादरतया गता सा कुपितेव ॥ ध्रुवपदं ॥ किं करिष्यति किं वदिष्यति सा चिरं विरहेण ॥ किं जनेन धनेन किं मम किं गृहेण
सुखेन २ ॥
इष्यतीत्यर्थः ॥ तया विना मम जनेन नरकिं आश्रितेन परिजनेन किं प्रयोजनमित्यर्थः ॥ ननु परिजनं विना गोध
नादिरक्षा कथं भविष्यतीत्यत आह ॥ धनेनेति ॥ तया विना मम धनेनापि किं ननु धनं विना गृहरक्षा कथं भविष्यतीत्यत आह ॥
मम गृहेन किं । ननु गृहं विना सांसारिकभोगः कथं भविष्यतीत्यत आह ॥ सुखेनेति । तया विना मम सुखेनापि स्रक्चन्दनादि
जन्येन किं प्रयोजनमित्यर्थः ॥ इयं च सप्तसंख्या ततोऽपावस्था ॥ तदुक्तं रसार्णवसुधाकरे ॥ अर्थानामननुभूतानां देशका
लानुवर्त्तिनां ॥ सातत्येन परामर्शो मानसः स्यादनुस्मृतिः ॥ अत्रानुभावा निश्वासो ध्यानं कृत्यांविहस्तादाः ॥ शय्यासनादि
विद्वेषः साध्याः स्मरकल्पिता इति ॥ २ ॥

गी·टी·
२४

कुसुमसायकतेन कामः प्रसिद्धः इमानेव चूतमंजरीरूपान् बाणान् धनुष्यारोप्य मां ताडयष्व ईदृशं कृपा पुनरपि का मायैव दैन्यं करोति मारणाविस्यादिना ॥ हे मनसिज मदन अमुं पुरस्थितं चूतसायकं मामपुष्परूपं पाणौ हस्ते या कुरु ॥ चापं धनुर्मा आरोपयतस्थिकायु तं माकुरु ॥ यद्वा ॥ चूतहस्ते सायकं हस्ते माकुरु ॥ हस्ते पिच करोषि तदा अमुं सायकं चापं आरोपय मास्तं देहीस्यर्थः ॥ अत्र मनसिज पदेन मन्मनसो जातस्य ते मत्संतापकारित्व मनुचितं मिति ध्वनितं ॥ हे क्रीडानिर्जितविश्व क्रीडया लीलया निर्जितं विश्वं जगद्येन तादृशे ॥ मूर्छित मूर्छां प्राप्तस्य जनस्य मादृशस्य आघातेन प्रहारेण तव किं पौरुषं अपि तु न किमपीस्यर्थः ॥ यद्वा ॥ मूर्छिते जनाघातेन तव किं पौरु

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय क्रीडानिर्जितविश्व मूर्छितजनाघातेन किं पौरुषं ॥ तस्या एव मृगीदृशो मनसिजप्रेंखत्कटाक्षाशुगश्रेणीजर्जरितं मनागपि मनो नाद्यापि संधुक्षते ॥ २१ ॥

ष कुत्सित पौरुषमित्यर्थः ॥ मूर्छितत्वे हेतुमाह । तस्या एवेत्यादि ॥ तस्या एव मृगीदृशो हरिणीदृशः प्रेंखतः प्रसर्पतां येकटाक्षास्त एवाशुगा बाणास्तेषां श्रेणिभिः पंक्तिभिः जर्जरितं खंड खंडीकृतं मनो मनागपि स्वल्पमपि न संधुक्षते न स्वस्थं भवति ॥ तथा च ॥ तत्कटाक्षरूप बाणैस्तया हं मूर्छितः ॥ अतः संप्रतिमपि चूतमंजरीरूप सायकप्रहारो मृतमारणाया भवतीति भावः ॥ लीलैव येन विश्वमपि जितं तस्य ते मूर्छितजनेषु प्रहारो यशो हानिकं वरस्यापि ध्वनितं ॥ सायकः शरखड्गयोरिति विश्वप्रकाशः ॥ यथा स्त्रियां धनुश्चापाविस्वमरः । किं पौरुषमित्यत्र द्वितीयव्याख्यानपक्षे किं क्षेपइत्यनेन निंदायां समासः ॥ आशुगौ मारुते बाणे इति विश्वः ॥ २१ ॥ २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न नु नमु राक्षस्मरणा देव तव दुःखं भवति प्राम स्य तत्र को पराध इत्यत आह ॥ भ्रूपल्लवमित्यादि । किमित्याक्षेपे त
स्यां राधायां स्मरेण कामेन अस्त्राणि अर्पितानि स्थापितानि तर्कयामि । न चास्त्राणि वीरेण हस्ते स्थापयितुमु
चितानि न चेयुक्तमत आह ॥ निर्जितेत्यादि ॥ निर्जितानि जगन्ति यैस्तानि ॥ तथा च तैरवास्त्रैर्जगत्त्रयां जित्वा
तत्र स्थापितानीति भावः ॥ तर्ह्यन्यत्र किमिति न स्थापितानीत्यत आह ॥ अनंगेत्यादि ॥ अनंगस्य कामस्य जय
याय जंगमदेवतायां गमनशील देवतायां तथा च तयैव त्रैलोक्यजयाय अस्त्राणि दत्तान्यतो जातप्रयोजनानि मित

भ्रूपल्लवं धनुरपांगतरंगितानि बाणा गुणः श्रवणपालिरिति स्मरेण ॥
तस्यामनंगजयजंगमदेवतायामस्त्राणि निर्जितजगंति किमर्पितानि ॥ २ ॥

त्रैवास्यापि स्थानि तान्यस्त्राणि स्थापितानीति भावः ॥ देवतया यदस्त्रं दीयते तत्केनापि न प्राणिहंतुं शक्यत इत्यपि ध्वनितं ॥
कानि तान्यस्त्राणीत्यत आह । भ्रूपल्लवमित्यादि । भ्रूपल्लवमिव मित्यादि पल्लववत्तदेव धनुः अपांगतरंगितानि क
टाक्षस्य गतागतानि बाणाः श्रवणपालिः कर्णलताप्रांतमेव गुणः प्रत्यंचिका अत्र नीलस्निग्धताद्भ्रुवः पल्लवेन रूप
णं वक्रत्वेन धनुष्ट्वेन रूपणं । अपांगस्य च मर्मभेदकता बाणत्वेन रूपणं कर्णपालिश्च दीर्घता सततविकत्वेन
रूपिता ॥ अपांगमंगहीनस्यान्नेत्रांते तिलकेपि चेति विश्वप्रकाशः ॥ पालिः कर्णलतायां स्त्रीपंक्त्यावंध्याग्रभेद
योरिति च ॥ २ ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संघटितराधांगविन्यासितान्येव स्मरणरूपाणि मां पीडयंति इति तस्या मेऽनपलंभं करोमीत्याशयेन काममुपेक्ष्य भावनया
पुरः स्थितामिव साक्षाद्राधां संबोध्याह ॥ भ्रूचाप इति । भ्रूचापे भ्रूरूपे धनुषि विहितोऽर्पितः कटाक्ष विशिखः कटाक्षरू
पो बाणो मर्म यथा मम वर्मपीडां निर्मातु करोतु धनुष्यारोपितस्य बाणस्य परमर्मपीडनमेव धर्म इति तदुचितमेव । अ
थ च कुटिलो वक्रः श्यामात्मा श्यामः आत्मा स्वरूपं यस्य एतादृशः कबरीभारोऽपि ग्रथितवेणीकेशसंचयोऽपि मा
रोद्यमं मारणाय उद्यमं परा क्रमं करोतु ॥ यद्वा ॥ मारस्य कामस्य उद्यमं करोतु । योऽतमस्तिनः कुटिलश्च भवति सोऽन्यमा
रणाय यतत इति अपि नानुचितं । अथ च हे तन्वि अयं बिंबाधरो बिंबफलतुल्यो अधरो मोहं मूर्छां तनुतां तनोतु ॥

२१ भ्रूचापे विहितः कटाक्षविशिखो निर्मातु मर्मव्यथां श्यामात्मा कुटिलः करोतु कबरीभारोऽपि मारोद्य
मं ॥ मोहं तावदयं च तन्वि तनुतां बिंबाधरो रागवान् सद्वृत्तस्तनमंडलस्तव कथं प्राणैर्मम क्रीडति ॥ २१ ॥

कीदृशो रागवान् रक्तो लौहित्ययुक्तः इदमपि नानुचितं यतो यो रागवान् मात्सर्ययुक्तः स परमोहं अयं तव सद्वृत्तो वर्तुल स्तनमंडलः
कुचविस्तारो मम प्राणैः कथं किमिति क्रीडति ॥ प्राणग्रहणरूपां क्रीडां किमिति करोति ॥ सद्वृत्तस्य सच्चरितस्य परप्राणग्रा
हित्वमनुचितमिति भावः ॥ विरोधनामायमलंकारः । सद्वृत्तत्वरूपगुणस्य परप्राणग्रहणक्रियया विरोधकथनात् ॥
तदुक्तं काव्यप्रकाशे ॥ विरोधः सविरोधोऽपि विरुद्धत्वेन यद्वच इति ॥ विशिखस्तोमरे शरे इति विश्वः । श्यामो निर्दित हलयोगिति
धरणिः ॥ आत्मा देह मनो ब्रह्म स्वभाव धृति बुद्धिषु इति विश्वः । कबरी केशवेशः स्यात् । मारो मृत्यौ विषे नद्यां इति विश्वः ।
बिंबं मूले बिंबिकायाः प्रतिमंडले इति च ॥ रागानुरक्तो मात्सर्ये इति च । चरिते वर्तुले वृत्तमिति शाश्वतः ॥ २२ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु तस्या अपि धाम्मरस्य किंतु तदंगस्पर्शादि विषयालाभाद्यंवलतां चेतस्त्वां दुःखाकरोतीति इत्यतो भावनया पुरःस्थितां मत्वा तानआ
ह ॥ तानीत्यादि । स्पर्शसुखानि तदंगस्पर्शजन्यानि सुखानि इदानीमनुभूयमानानि तान्येव पूर्वानुभूतान्येव ॥ एतेन त्वगिंद्रियवि
षयलाभः कथितः ॥ दृशोर्नेत्रयोश्चंचलौ तरलौ स्निग्धाः स्नेहगर्भा विभ्रमो विलासाः त एवमधुनानुभूता एव । अनेन चक्षुर्विषय
लाभ उक्तः ॥ वक्त्रांबुजसौरभं तस्या मुखपद्मसौरभं तदेव । अनेन घ्राणस्य विषयप्राप्तिरुक्ता ॥ गिरां तद्वचसां सुधास्पंदी सुधाम
मृतं स्यंदते स्रवती सुवंशीव्येव वक्रिमा वक्रतामिश्रितो श्रोत्रेण गृह्यमाणाः त एव पूर्वानुभूत एव ॥ अनेन श्रोत्रेंद्रियविषयसान्निध्य
मुक्तं ॥ बिंबाधरमाधुरीतस्य बिंबफलप्राययोरधरयोरोष्ठयोर्माधुरी मधुरता अधुना मया स्वाद्यमाना सेव पूर्वानुभूतेव । अनेन र
सनेंद्रियस्य विषयलाभः कथितः । इत्थमेवं प्रकारेण विषयासंगेपि तत्तदिंद्रियाणां स्वस्वविषयसंबंधात् मानसे मनसि चेतसि तस्यां

तानि स्पर्शसुखानि ते च तरलाः स्निग्धा दृशोर्विभ्रमास्तद्वक्त्रांबुजसौरभं स च सुधास्पंदी गिरां वक्रिमा ॥ सा बिंबाधरमा
धुरीति विषयासंगेपि चेन्मानसं तस्यां लग्नसमाधि हंत विरहव्याधिः कथं वर्द्धते ॥१३॥ ॥ इति श्रीगीतगोविंदे मुग्धमधु
सूदनो नाम तृतीयः सर्गः

राधायां लग्नसमाधि तदेकाग्रं यदिहं तेति खेदे तत् द्विरहव्याधिः कथं वर्द्धते ॥ अपिशब्दो विरोधाभासालंकारसूचनार्थः ॥
बाह्येंद्रियविषयासंगे रमाधेरसंभावात् ॥ बाह्येंद्रियवृत्तिनिरोधे सति मनस एकाग्रतायाः एव समाधिपदार्थत्वात् ॥ तथा च
तत्तदिंद्रियाणां स्वस्वाभिमतविषयानामलाभ एव विरहः स भवति मम च तत्तदिंद्रियाणां विषयविच्छेदस्याभावान्मनस्तु तस्मि
न्नेकपरत्वात् तथा स हि विश्लेष एव नास्तीति कथं विरहजन्यव्याधिसंभव इति भावः ॥ गंधात्पूर्वं स्पर्शशब्दस्य विषयात्व
मी समरः ॥१३॥ ॥ आयुष्टिर्मगारिकर्मणि लसत्तत्का भुजंगी विषज्वालालीनोटमपि व्यसंनापि सदा सशुद्धक तकोतिकु ॥
मत्रैलोक्यमुरवैरिसद्गुणसुधीसिंधीविहारानुसरत्सम्यक्कुसुमूर्पेयतानमप्युपकृतं किं शालिना यत्नया ॥१॥ ॥ इति श्रीमहा ॥७॥
महोपाध्यायश्रीशंकरमिश्रविरचितायां श्रीगीतगोविंदटीकायां रसमंजरीनामधेयायां तृतीयः सर्गः ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वसर्गे श्रीकृष्णस्य विरहजनितावस्था वर्णिता ॥ अत्र तु राधाया अवस्थामाह ॥ यमुनेत्यादिना ॥ राधिकायाः सखी माधव
कृष्णं प्राह वक्ष्यमाणमुवाच ॥ राधिके सानुकंपा यां कः ॥ कीदृशं माधवं । यमुनायास्तीरे यद्वानीरं सिकुंजे वेत्रलतागृहे वने तत्र मंदं
स्वैरं आस्थितमासीनं । तत्र हेतुगर्भविशेषणमाह ॥ प्रेमेति ॥ प्रेमभरेण राधाविषयकस्नेहाधिक्येन उद्भ्रांतं उद्विग्नं ॥ तथा च ॥ प्रे
मभरेण तद्ध्यानपरं परायत्तं सा श्रांतकृष्णस्तदन्वेषणं विहाय लतासमूहे स्थितमपि इति भावः । अयं वेतसेरथाकृपुष्पनिकुं
शीतवानीरवंजुलाः इति अमरः । मंदः स्खलमंदगते पूर्वं स्वैरिणिहारिणी इति विश्वप्रकाशः ॥२४॥ निंदतीत्यादि । कर्णाटरागे एक
तालीताले गीयते । हे माधव सा राधा तव विरहे तद्विश्लेषे चंदनं निंदति ॥ अथ चंद्रकिरणं अनु चंद्रकिरणं लक्षीकृत्य अ
धीरं अस्य अत्र खेदं दुःखं विंदति प्राप्नोति ॥ मलयसमीरं पवनं तत्संबंधिवातं व्यालनिलयस्य मिलनेन व्यालानां सर्पाणां निलयो

यमुनातीरवानीरनिकुंजे मंदमास्थितं प्राह प्रेमभरोद्भ्रांतं माधवं राधिकासखी ॥२४॥ कर्णाटरागे ॥ एकताली
ताले ॥ ॥ निंदति चंदनमिंदुकिरणमनु विंदति खेदमधीरं ॥ व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरं
॥१॥ सा विरहे तव दीना माधव मनसिजविशिखभयादिव भावनया त्वयि लीना ॥ ॥ध्रुवपदम्॥

निवासश्चंदनवृक्षस्तस्य मिलनेन संसर्गेण गरलमिव विषमिव कलयति मन्यते ॥ चंदनं च स्वस्थितैः पीतोद्गीर्णापतेर्मलयवा
यवः तदेव विषमयः वायुमन्यया शरीरसंपर्कादेव मूर्छा मे अनयंतीति मन्यत इति भावः ॥ कुतस्तथा त्वया मन्यत इत्यतो हेतुग
र्भविशेषणमाह ॥ दीनेति दीना दुःखिता ॥ तथा च दुःखितस्य सुखहेतुर्हेतुरपि दुःखायैव भवतीति भावः ॥ पुनः कीदृशी
भावनया ध्यानेन त्वयि लीना मग्ना । कस्मादिव मनसिजः कामस्तस्य विशिखा बाणास्तद्भयादिव ॥ व्याप्तौ भुजंगमे २६
क्रूरे श्वापदे दुष्टे दंतिनीति विश्वः ॥ गरलं तु विषे तृणोगारलं तत्पापूरके इत्यपि ॥ ध्रुवपदम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा स्वहृदयमर्मणि ॥ स्वस्य हृदयरूपे मर्मस्थाने विशालं सजलनलिनीदलं जालं जलसहितकमलिनीपत्रसमूहं वर्म
कवचं करोति ॥ किमर्थमिव ॥ अविरलं यथा स्यादेवं निपतितो यो मदनशरः कामबाणस्तस्मा द्भवदवनाय त्वद्वतो
रक्षणायेव ॥ तस्या हृदये त्वं सर्वदा तिष्ठसि ॥ अतो विरलनिपतद्भिर्मदनशरैस्त्वत्पीडा माभूदिति पद्मिनीपत्रैरतस
न्नाहमिव सा करोतीति भावः ॥ कविहृद्योदशांव मे अविरलनिपतितमदनशराद्भवनायस्य रक्षणाय प्रवृद्धिव संपद
मीनमवेति व्याकुर्वति ॥ अवमं रक्षणे प्रीतिरिति विश्वप्रकाशः ॥२॥ सा कुसुमशयनीयं पुष्पशय्यां करोति रचयति

अविरलनिपतितमदनशरादिव भवदवनाय विशालं ॥ स्वहृदयमर्मणि वर्म करोति सजलनलिनीदल
जालं ॥२॥ कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयं ॥ व्रतमिव तव परिरंभसुखाय करोति कु
सुमशयनीयं ॥३॥

कीदृशं ॥ अनल्पविलासकलायां कमनीयं कामनीयं दैवस्य गतिर्ज्ञातुं न शक्यते को वेद कस्माद् भवनागच्छती
त्याशया कुसुमशय्यामारभ्य त्वन्मार्गे दत्तदृष्टिरेव तिष्ठतीति भावः ॥ किमेव करोति कुसुमविशिखः कामस्तस्य ये श
राः कुसुमरूपास्तेषां तल्पं शय्याय व्रतं तत्स्वरूपं व्रतमिव परिरंभसुखाय त्वदालिंगनजन्यसुखप्राप्तये करोति ।
तल्पं वशयनीये स्यात्तल्पमट्टकलत्रयोरिति विश्वप्रकाशः ॥ एतैस्त्रिभिः पदैः रुद्रगास्थापंचमावस्था कथिता
॥ तल्लक्षणं प्रागुक्तं प्राक् ॥३॥ जयदेवपद्धावनायो जगन्निवासोऽत्र वसुदेवनंदनः ॥ मत्काव्यस्यानुभावेन तरति भव
सागर ॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वहतीत्यादि ॥ सा उदारं आननकमलं श्रेष्ठं मुखपद्मं वहति धारयति ॥ कीदृशं ॥ वलिततन्मार्गप्रेक्षणाय तिर्यक्प्रसा
रितविलोचनेन नेत्रेण वक्रजलधरो मेघो यत्र तादृशं ॥ अत्र निरंतराश्रुवर्षित्वेन नेत्रयोर्जलधरत्वेन रूपणं ॥ कमिव ॥
विधुमिव चंद्रमिव ॥ किंदृशं विधुं विकटाः करालाः विशालावा । ये विधुंतुदस्य राहोर्दंताः तैः यद्दलनं खंडनं तस्मात्क्लि
ष्टा गलिता प्रच्युता अमृतस्य धारा यत तस्मात्तादृशं ॥ अत्र मुखस्य विधुना नेत्रजलस्य चामृतधारया सादृश्याद्वाक्यार्थोप
मा बोध्या ॥ विकरालसुंदरे प्रोक्तौ विशालौ विकरालयोरिति विश्वप्रकाशः ॥ तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुं
तुद इत्यमरः ॥ अयं चोन्मादाख्या सप्तम्यवस्था ॥ तदुक्तं शृंगारतिलके ॥ श्वासप्ररोदनोत्कम्पसुधावाक्क्षरणैरपि ॥

वहति च वलितविलोचनजलधरमाननकमलमुदारं ॥ विधुमिव विकटविधुंतुददंतदलनगलिता
मृतधारं ॥४॥ विलिखति रहसि कुरंगमदेन भवंतमसमशरभूतम् ॥ प्रणमति मकरमधो विनिधा
य करे च शरं नवचूतं ॥५॥

व्यापारो जायते यत्र स तून्मादः स्मृतो यथेति ॥४॥ किंच रहसि एकांते कुरंगमदेन कस्तूर्या भवंतं लिखति ॥ कीदृशं
असमशरभूतं कामस्वरूपिणं तव करेण नवचूतशरं निधाय तेऽधःप्रासनस्थाने मकरं विनिधाय धृत्वा प्र
णमति कुसुमकरो मकरवाहनो त्वमेवासि येन चूतपुष्परूपशरेण किमिति मां संतापयसीति प्रणमत्यर्थाद्या
चत इति भावः ॥ मृगनाभिर्मृगमदः कस्तूरी गंधधूलिः स्त्र इति हारावल्यां ॥५॥ २७

ध्यानेनाश्लेषयति ॥ ध्यानं चिंतनं लयो विलयोऽस्तसरं तं ॥ तेन अतीव अतिशयेन दुरापं दुःखेन प्राप्यं भवंतं पुरोऽग्रे परिकल्प्य सा
राधा विलपति शठ इय कालं याभिः सह क्रीडां कृतवानसि तत्रैव गच्छेत्याद्युच्चारो रोदिति लाभभयवशादागतोप्यलिनि
मेसना लोचवद्पुनर्गमिष्यतीत्यनुरागप्रकटनाय हसति । पुनश्चातुरस्थितापयं मामालिंगनादिना नासंभवीतीति
विषीदति विषादं प्राप्नोति । पुनः कथमपवस्थः स्यादिति विचार्य रोदितीति ॥ यतो तापकानां नायकस्य पुरतो रोदनं परमोपा
यीकरणोपाय इति । तदुक्तं ॥ रुदितमुदितमस्त्रं योषितो विभ्रतो ऽधिनि । परवेश्मादनेपि बोढास्यमाकृष्य गच्छतीं मामभयम
नुनेष्यती सखि प्रायेणाचंचति स्थानांतरं गच्छति ॥ पश्चाद्व्याजेनैव तत्संगं परिकल्प्य तापं मुंचति ॥ किलिकिंचिताख्यमपि
भाव ॥ तदुक्तं दशरूपके ॥ क्रोधाश्रुहर्षभीत्यादेः संकरः किलकिंचितमिति द्वयमपि उन्मादावस्थाया अलंकारश्च दृष्टदीप

ध्यानलयेन पुरः परिकल्प्य भवंतमतीव दुरापं ॥ विलपति हसति विषीदति रोदिति चंचति मुंचति तापं ॥ ध्रु ॥ प्रति
पदमिदमपि निगदति माधव तव चरणे पतिताहं ॥ त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहं ॥ ७ ॥

कं ॥ तदुक्तं काव्यप्रकाशे ॥ सैव क्रियासु बह्वीषु कारकस्येति दीपकं ॥ अस्यार्थः ॥ बह्वीषु क्रियासु कारकस्यैकस्य सकृद्वृत्तिरे
व दीपकमिति ॥ ६ ॥ प्रतिपदमित्यादि ॥ प्रतिपदं इतस्ततश्चलंतीपदं पदं प्रति इति निगदति । हे माधव तव चरणेहं पतिताऽत्वयि विमु
खे विमुखे सति सुधानिधिरपि अमृतनिधिश्चंद्रोपि तनुदाहं मच्छरीरसंतापं तनुते विस्तारयति । मे मामाप्तोलक्ष्म्याः धवः स्वा
मी चंद्रश्च समुद्रोत्पन्नत्वाल्लक्ष्म्याः सहोदर इति त्वयि निकटस्थिते सति सपत्न्या अपि मे किमपि कर्तुं न शक्नोति त्वयि प्र
तिकूले वसति स्वभगिनीसापत्न्यमपि स्मरन् सुधानिधिरपि मे तनुदाहं तनुते इति माधवपदेन ध्वनितं ॥ सुधानिधेस्तापकारि
त्वं विरुद्धमिति विरोधनामायमलंकारः ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीजयदेवेत्यादि। जयदेवभणितं ज्ञयेष्वकविस्मभवितरा यितमुनि यदि मनसानदनीयं नर्तितयं तदा इदं हरिविरहे राथाकुलाया
बल्लवयुवतिः तस्यायासखीदूतीं तेन प्रेषिता न स्याबवन पठनीयं॥९ यं विरहोत्कंठिता नायिका तल्लक्षणं चोक्तं प्राक्॥५। सा हरिं
विना कुत्रापि न निश्चितं भवतु साहा॥ स्मराशरेत्यादि॥ तस्यास्तव विरहे वासोमंदिरं विपिनायते॥२ स्यमिवाचरति। प्रियसखीमाला
पि प्रियेसखीपंक्तिरपि जालायते आनायवेलाचरति। यथा तद्दुःखेषु दुःखा सखी भूत याजीवितमपिस्यलंकु प्रवृत्ताभवति तदा सखी भिन्न
वायतरमि। स्वहुदंदयवहारवतिबधकं तापोऽपि जालवृद्धो चरतीति भावः॥ अथवतापोपि विरहजनितः संतापोपि स्वसित
न निश्वसितेन निश्वासेन दावदहनः आलनायादावाग्निशिखायाय कलापा। सदृश्याचरति। अपनोपि दावाग्नि वापुनाय चडोभ
वतीतिध्वनितं॥ सापि हरिणीरूपायते हरिणीवचाचरति॥ हा कष्टं कथं कंदर्पोपि कौमोपि परमानंदजनकोपि तव द्विरहे यमायते॥
श्रीजयदेवभणितमिदमधिकं यदि मनसानदनीयं॥ हरिविरहाकुलबल्लवयुवतिसखीवचनं पठनीयं॥ द॥ आवा
सोविपिनायते प्रियसखीमालापि जालायते तापोऽपि श्वसितेन दावदहनज्वालाकलापायते॥ सापि त्वद्वि
रहेणाहं तहरिणीरूपायते हा कथं कंदर्पोपि यमायते विरचयन् शार्दूलविक्रीडितं॥१२॥

गांतइवाचरति॥८॥ किं कुर्वन् शार्दूलस्यव्याघ्रस्यविक्रीडितं क्रीडां कुर्वन्॥ यथा हरिणीव भयभीततः शार्दूलाद्बिभ्य
र्व्लयोद्विग्नाया धेणा त्रासिता च व्याधजालैर्विततं पश्यती दशदिशश्चकितं च कृतं विलोकयन्तीः कापि न निर्वृतिं लभ
ते तथैषापि व्याघ्ररूपेण कामेन त्रासिता सखीधावासेषु कापि निर्वृतिं न लभत इति भावः॥ शार्दूलविक्रीडितं नाम छंदस्त
द्लक्षणं चेदं॥ तदुक्तं वृत्तरत्नाकरे॥ सूर्याश्वैर्मसजस्ततः सगुरवः शार्दूलविक्रीडितं॥ अत्र प्रथमपदे उद्वेगावस्था कथिता
त्वद्वर्णाप्रोक्ता प्राक्। शेषवाक्येषु व्याध्यवस्था कथिता॥ तदुक्तं रसार्णवसुधाकरे॥ अभीष्टसंगमाभावाद्व्याधिःस तीपल
क्षणः अत्र संतापनिश्वासौ शीतवस्तुनिषेवनं॥ नोत्तरं भाषते प्रश्ने समनेनश्रणानि चेति॥ शार्दूल॥ स सांतरव्याध्रे च पशुभेदे वसन्
नमे वोत्तरः स्थित इति विश्वप्रकाशः॥२५॥ २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनरपि व्याधिरूपामष्टमीमवस्थां सप्तपं बंगीतेन कथयति ॥ स्तनेत्यादि ॥ गीतस्यास्य देशाख्यरागः तालश्च रूपकः ॥ गीतार्थस्तु ॥ हे केशव
तव विरहे सा राधिका अनुकंप्या ॥ ध्रुवपदं ॥ राधा स्तनविनिहितमपि स्तनयोरर्पितं हारं तालरवीजनैः सृतमपि उदारं उच्चकं हारं मतिभारं
मनुते ॥ तत्र हेतुगर्भविशेषणमाह ॥ कृशतनुरिति ॥ कृशा तनुरंगं यस्याः सा ॥१॥ किंच सा मलयजपंकं वपुषि देहे सशंकं शंकासहितं य
था स्यात्तथा विषमिव पश्यति ॥ कीदृशं ॥ सरसमसृणमपि आर्द्रं चिक्कणमपि सरसः ॥ पंकयति ॥ कीदृशं कर्दमपापयोरिति विश्वः ॥
मसृणो कर्कशोस्निग्ध इति मेदिनीकरः ॥२॥ किंच सा श्वसितपवनं श्वासवायुं वहति धारयति ॥ कीदृशं ॥ अनुपमपरिणाहं अनुप
मा रहितः परिणाहो दैर्घ्यं यस्य तादृशं ॥ कमिव मदनदहनमिव कामाग्निमिव । कीदृशं सदाहं दाहसहितं ॥ परिणाहो विशा

देशाख्यरागे ॥ रूपकताले ॥ स्तनविनिहितमपि हारमुदारं ॥ सामनुते कृशतनुरतिभारं ॥१॥ राधिका विरहे तव
केशव ॥ ध्रुवपदं ॥ सरसमसृणमपि मलयजपंकं ॥ पश्यति विषमिव वपुषि सशंकं ॥२॥ श्वसितपवनमनुपम
परिणाहं ॥ मदनदहनमिव वहति सदाहं ॥३॥ दिशि दिशि किरति सजलकणजालं ॥ नयननलिनमिव विगलितनालं

ले समर्थः ॥ छ ॥ एतावता व्याध्यवस्था कथिता तल्लक्षणं चोक्तं प्राक् ॥३॥ सा दिशि दिशि नयननलिनेन नेत्रपद्मेन किरति क्षिप
ति ॥ कीदृशं ॥ विगलितनालं विगलितं त्रुटितं नालात् विगलितं नालं यस्येति वा ॥ कीदृशं ॥ सजलकणजालं जलकणजा
लैः अश्रुजलकणिकासमूहैः सहितं । अत्र च राधाया वाक्यालंकारे ॥ अत्र नलिनत्वेन रूपणात् स्तिमितत्वं बोधितं ॥ से
नजडता सा प्रकीर्तिता ॥ अत्र स्पर्शानभिज्ञत्वं वैवर्ण्यं शिथिलांगता ॥ अकांडे दुंदुंलति तं भनिःश्वासकृशतादयः इति ४

गी॰टी॰
२९

किं सता नयनविषयमपि वन्धुर्गोचरमपि किशलयतल्पं नवपल्लवशयनीयं विहितो हुताशनस्याग्नेर्विभ्रमः संशयो यत्र तादृशं कल्पयति । अत्र किशलयेषु ताम्रत्वसंतापकत्वादिसमानधर्मदर्शनादग्निसंशयः । इयं चोद्वेगावस्था तच्च सतामुक्तं ॥५॥ सा सायं सन्ध्यासमये पाणितलेन करतलेन कपोलं नयजति ॥ कीदृशं ॥ अल्लोलं अचंचलं दिवसक्षयथा कथं विनीतो रात्रिरूपयुगाय मामाकथं नेतव्येति कपोले पाणिं कृत्वा सार्यं चिंतयतीति भावः ॥ कमिव बालशशिनमिव द्वितीयचंद्रमिव ॥ मुखस्याह्यस्य करतलच्छन्नतयाईस्य दृश्यमानतया विरहविपांडतया व मुखस्य द्वितीयात्वं इसाम्यं । इयमपि जाडतावस्था ॥६॥ किंच सापि काममतिशयेन हरिरिति हरिरिति जपति किं चाविरहपात्वद्विश्लेषणाविह

नयनविषयमपि किशलयतल्पं । कलयति विहितहुताशनकल्पं ॥५॥ सजनि न पाणितलेन कपोलं ॥ बालशशिनमिव सायमलोलं ॥६॥ हरिरिति हरिरिति जपति सकामं ॥ विरहविहितमरणेव निकामं ॥७॥ श्रीजयदेवभणितमिति गीतं ॥ सुखयतु केशवपदमुपनीतम् ॥८॥

तं विधानुमारब्धमरणं यया सेव कथं यथा स्यात् स कामं साभिलाषं यथा स्यात् ॥७॥ अभिलाषादिषु नवस्वव स्थास्व कैना स्वपितेदोदास्य मालक्ष्य मरणसमयापि दशम्यवस्थायामवश्यं भवितव्यमिति निश्चित्य सप्रयत्नानां क्लेशाहरणा द्वरिरित्युच्यतेति कोवदप्रसङ्गः सत्यस्मिन्नपि जन्मन्यागमस्यमेव क्लेशं हरिष्यति भावः । यानुत्स्यापि अंतेया मतिः सा गतिरिति जन्मांतरेपि स एव वल्लभोस्त्यादितिसाभिलाषमांतरं विहाय हरिरिति सेव जपतीति भावः ॥ विहितसत्रासिकमणिलेः कर्त रित्नः ॥७॥ श्रीजयदेवेत्यादि । इति अमुना प्रकारेण जयदेवेन भणितं उच्चारितं गीतं सुखयतु आनंदयतु श्रोतॄन् कीदृशं । केशवपदमुपनीतं ॥८॥ ७॥ २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा रोमांचवतीत्यादि ॥ सा राधा रोमांचवती स्वं वपयति उद्भ्रमयतीत्यर्थः ॥ यद्वा ॥ रोमांचो अस्यास्तीति अर्शआदित्वादच् प्रस्वेदो
रोमांचः स्वेदवारि निरोमांचवति । यद्वा ॥ रोमांचपदं रोमांचवतीपरं लक्षणया तथा च ॥ रूढा स्त्री वा चरतीत्यर्थः ॥ अने
नाभिलाषः कथितः ॥ सीत्करोति सीत्कारं करोति ॥ अनेन चिन्तास्मृतिकथिता ॥ अथ च विलपति सशब्दं रोदिति उन्मादि
नायकगुणानुविशेषेण विलपति ॥ अनेन गुणकीर्तनमुक्तं ॥ उत्कंपते कथं विरहदुःखं सोढव्यमिति कंपयुक्ता भव
ति ॥ ताम्यति ग्लाना भवति । ध्यायति ध्यानं करोति ॥ एते विशेषणे रूढगावस्था कथिता ॥ उद्भ्रमति क्रीडादिस्थलं निर्दि

सा रोमांचति सीत्करोति विलपत्युत्कंपते ताम्यति ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्छत्यपि ॥ ॥

शति भ्रमति ॥ अनेन प्रलापः कथितः ॥ प्रमीलति ध्यानकल्पितालादालिंगनादिजन्यसुखलाभेन चक्षुषी निमील
यति ॥ अनेनोन्मादः कथितः ॥ पतति कार्श्येन स्थानान्तुमशक्यतया भूमौ पतति पश्चादुद्वेगया ... दृष्ट्वा कथं क
थमपि उद्याति सकंपमुत्थानं करोति । अनेन व्याधिः कथितः ॥ ततो मूर्छति मूर्छां प्राप्नोति ॥ अनेन जडता कथि
ता ॥ क्रियादीपकायमलंकारः ॥ तल्लक्षणं पूर्वं प्राक् ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰टी॰ ७०

न्नुज्वरेतावस्थापर्यंतावस्थायदि जीवेत्तदा किं मद्रेतनेत्यत आह॥ एतादृशीत्यादि स्ववैद्यप्रतिम स्ववैद्यावस्थिनी कुमा
रीतत्प्रतिम सदृश यद एतादृश्य तनुज्वरे अतनोः कामस्य ज्वरे त्वं यदि प्रसीदसि यदासावरतनुः कमनीयदेहा न रसान्वित
वश्रृंगाररसात् किं न जीवेत् अपितु जीवेदेव अन्यथा तं च न प्रसीदसि तदा तन्न यान्तकोपि यमोस्य नो शायरसयंतः।
सप्रतिमूर्छितायास्तस्यावक्रमणारयन्नाह स्तवेषुष्ठेव सखी पुव्यवहाराभवति सापि तयाप्य तव्य इत्यर्थः॥ अन्यत्रापि
ज्वरे ज्वरिणामां वतिशीतादिनारामावलानि वा वरति॥ वेदनया शीतेन वा शीत्कारं करोति किल पतिमोहाय किं विवृदति
उत्कंपते कंपयुक्ता भवति ताम्यति विकलो भवति ध्यायति अहं जीवामि न वेति चिंतयति। उद्भ्रमति छर्दिं करोति॥ निमीलति
अत्यवतया अक्षिणी निमीलयति नंति। शय्याता वेदनया भूमौ पतति॥ उद्घाति वायुवेगाद्द्रवति मूर्छितामूर्छां प्राप्नोति एना

एतादृश्यतनुज्वरे वरतनुर्जीवेन्न किं रेतसात् स्ववैद्यप्रतिम प्रसीदसि यदि त्वन्नोऽन्यथा नांतकः॥२६॥ ॥

दृश्यतनुज्वरे महति सान्निपातकज्वरे॥ कस्यचित्स्ववैद्यप्रतिमस्य प्रसादेनाऽसात्स्वादितोऽवरीकिंन जीवेत् अपितु जीवेदेव॥
तनुत सान्निपातिकज्वरे सहसाऽसदानंवरकादिभिर्निषिद्धमित्यत आह॥ अन्यथेति॥ अन्यथा अन्यप्रकारेण सहि
ता मार्गेण हस्तकः वैद्यकानां हस्तप्रक्रियाविशेषो हतत्वदीतिलोकप्रसिद्धस्संतः॥ सहितात्प्रक्रियया तपवा रसनविशेष
प्राप्ते रसदानमुचितमेवेति भावः॥ क्वचित्त्वन्नोन्यथा नांतक इति पाठः॥ तदान्यथायदि न प्रसीदसि तदा हे तु स्तवापेक्षया
तकोन अपितु त्वमेवांतक इत्यर्थः॥ रोमांचतीति सत्रह्विती व्याख्यानेऽपि प्रत्यये तल्लोपश्चेत्यायलोपः॥ रसोगंध ७०
रसेस्वादे क्लितादौ विषरागयोः॥ श्रृंगारादौ द्रवे वीर्ये देहधात्वं तु पारदे इति विश्वप्रकाशः॥ २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मरातुरामपि स्मारि॥ हे दैवतवैद्यहृद्य देवतानां यो वैद्यावश्विनीकुमारौ तद्वत् हृद्य मनोज्ञ॥ स्मरातुरां स्मरणेन कामेन आतुरां उग्रां त्व
दंगसंग एव यद् अमृतं तन्मात्रसाध्यां राधां विमुक्तबाध्यं स्वस्थां पीडां न कुरुषे न करोति॥ अतो हे उपेंद्र त्वं वज्रादपि कुलिशादपि दा
रुणोसि कठिणोसि॥ यतो वज्रमिंद्रेणाक्षिप्तं मदंगसंबंधाद्व्यथयति त्वत्तु विश्लेषे सत्येव व्यथयसीति वज्रापेक्षयापि तेदा
रुणत्वमिति भावः॥ उपेंद्रवज्रा नाम वृत्तं वेदछंदस्तल्लक्षणं तु वृत्तरत्नाकरे॥ उपेंद्रवज्रा जतजास्ततो गौ इति॥ २७॥ ननु शीतो
पचारैर्वा तज्ज्वरशांतिर्भविष्यतीति किमर्थं संतप्यत आह॥ कंदर्पेत्यादि। अहो आश्चर्यं अस्याश्चित्रं चित्तं। चंदनं चंद्रमा कमलि
नी चिंता चंदनचंद्रमापद्मिनीवार्तास्वपि सखीभिः क्रियमाणासु संताम्यति ग्लानिं प्राप्नोति॥ कीदृश्याः॥ कंदर्पज्वरेण कामज्व

स्मरातुरां दैवतवैद्यहृद्य त्वदंगसंगामृतमात्रसाध्यां॥ विमुक्तबाधां कुरुषे न राधामुपेंद्र वज्रादपि दारुणोसि॥२७॥
कंदर्पज्वरसंज्वरातुरतनोराश्चर्यमस्याश्चिरं चेतश्चंदनचंद्रमाकमलिनीचिंतासु संताम्यति॥ किंतु क्लांतिवशे
न शीतलतनुं त्वामेकमेव प्रियं ध्यायंती रहसि स्थिता कथमपि क्षीणा क्षणं प्राणिति॥२८॥

रेणायः संज्वरः संतापस्तेनातुरतनो रुग्णदेहायाः॥ विरोधोयमलंकारस्तल्लक्षणमुक्तं प्राक्॥ नन्वेवमीदृशि संतापे कथं जीव
ती सत आह। किंत्विति। हे इनप्रभो तां एकमिव प्रियं शीतलतनुं शीतलगात्रं ध्यायंती सती क्षणं प्राणिति जीवति॥ की
दृशी॥ उत्क्रांतिवशात् उत्क्रांतिः प्राणोत्क्रमणं तस्य न शाम्यंतीति च हेतुगर्भं विशेषणमाह॥ क्षीणा कृशा पुनस्तथा च शीत
लत्वात् त्वदंगस्पर्शं प्राप्स्यतीति संप्रति जीवतीति त्वया त्वरितं गंतव्यं पुनस्तद्दस्या दर्शनमपि हे तु दुर्लभं भावीति भावः॥ संता
पः संज्वरः समाविति अमरः॥ इनः सूर्ये नृपे पत्यौ स्वामिनीति विश्वप्रकाशः॥ २८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वियन्तं कालं यथा जीवितं तथाग्रेपि जीविष्यतीत्यत आह॥ क्षणमपीति॥ अनया राधया ते विरहः पुरा बहुसंगदशायां भ
वन्तमपि न सेहे न सोढः॥ कीदृश्या॥ नयननिमीलनं निमेषः तेनापि खिन्नतया दुःखितया॥ किमिति धात्रा च क्षुद्रो निमेषः
सृष्टो यत् सामपि जगदीश्वरमुखारविंददर्शनप्रत्यूहो भवतीति खेदयुक्तयेति भावः॥ अस्मो राधा विरहेणाद्य संप्रति किं
सि ध्यति जीविष्यतीत्यर्थः॥ किंभूतायां पुष्पितायां पुष्पित मग्रभागो यस्यास्ताट्शी रसाल शिखा विलोक्य दृष्ट्वा अपि
वीसत्र भविष्यत्सामीप्येवर्तमाना छंदोपि वेदं पुष्पिताग्रानाम कमिति ध्वनितं॥ तल्लक्षणं तु वृत्तरत्नाकरे॥ ६७॥ ॥

क्षणमपि विरहः पुरा न सेहे नयननिमीलनखिन्नतया भवत्या॥ श्वसिति कथमसौ रसालशाखां चि
रविरहेण विलोक्य पुष्पिताग्रां॥ २०॥ ॥इति श्रीगीतगोविंदे विरहवर्णनो नाम चतुर्थः सर्गः॥ ॥

असुजिनयुगरेफतो यकारो युजिच नजौ जरगाश्च दुःखितायै इति स्निग्धा राधा विरहकथा श्रवणेन स्नेहवान्माध
वो यत्र तादृशः॥ २१॥ ॥यः सर्वशास्त्रार्थविचारचातुरीं कुर्वन्टीकाव्यसने हि नव्ययः॥ तं श्रीपिपिल्लनसम
रणोप्सवो बलाद्विधातुमस्माद्व्यवसाय यस्मदः॥ ४॥ ॥इति श्रीशंकरमिश्रविरचितायां श्रीशाण्डिलाय
नायां रसमंजरी नामधेयायां गीतगोविंद टीकायां चतुर्थः सर्गः॥ ॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहमिहेत्यादि ॥ मधुरिपुणा इति एवं प्रकारेण नियुक्ता आज्ञप्ता सखी स्वयं एस आगस राधां प्रदं वक्ष्यमाणं जगाद उवाच ॥ इ
ति किं तं राधायाहि गच्छ मद्वचनेन वर्ता अनुनय । हता पराधेन मया साक्षाद्वक्तुं न शक्यते ऽ तो माधवे नैव मेवमुक्तं इत्युक्ता त्वम
नुनयेतिभावः । तां च मृदति क्रमानये सर्थः । ननु कुत्र मूपानेये सत आह । अहमिति ॥ अहं इह निवसामि इह वकुंजे । तां प्रति
क्षमाणस्तोष्टामी सर्थः ॥ ५ ॥ यहसखी उगादत्त देवगीतेन । कथयति । वहतीत्यादि । गीतस्यास्य देशीयवराडीरागे ॥
रूपकताले ॥ ताललक्षणमुक्तं प्राक् ॥ गीतार्थस्त्वः । हे सखी तव विरहे वनमाली हल्लः सीदति ॥ अवसन्नो भवति ॥ ध्रुवं ॥

अहमिहनिवसामि याहि राधामनुनयमद्वचनेन चानयेथाः ॥ इति मधुरिपुणा सखी नियुक्ता स्वयमिदमेत्य
पुनर्जगाद राधां १० वराडीरागे ॥ रूपकताले ॥ वहति मलयसमीरे मदनमुपनिधाय ॥ स्फुटति कुसुम
निकरे विरहिहृदयदलनाय ॥ १ ॥ तव विरहे वनमाली सखि सीदति ॥ ध्रुवपदं ॥ दहति शिशिरमयूखे मरण
मनुकरोति ॥ पतति मदनविशिखे विलपति विकलतरोति ॥ २ ॥

द्यसति ॥ मलयसमीरे मत्तया वल्लसंबंधिगाते वहति सति । कुसुमनिकरे पुष्पसमूहे विरहिणां हृदयस्य दलनाय विदारणा
य स्फुटति विकसति सति ॥ किं कृत्वा मदने कामं उपनिधाय समीपवर्त्तिनं तं । तथापि च कुसुमनिकरे रेव बाणैरत्र सन्निहि
तेन कामेन विरहिणां हृदयं विदारणीयमिति भावः ॥ १ ॥ किं च शिशिरमयूखे हिमकरे दहति सति । मरणं मरणावस्थां
अनुकरोति । मरणावस्थायां यादृशी मूर्छादिरूपा चेष्टा तां स्वीकरोति । अथ च मदनविशिखे कामबाणे पतति स
ति । विकलतरोति विह्वलतरो ति विलपति विलापं करोति । अतिशयेन विलापं करोति ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच मधुपसमूहे भ्रमरसमूहे ध्वनति सति गुंजति सति श्रवणं श्रोत्रं हस्ताभ्यां अपिदधाति। मुद्रयति॥ अथ च निशि निशि रात्रौ
मनसि चित्ते रुजं पीडां उपयाति प्राप्नोति॥ कीदृशे मनसि वलिते उद्भूतो विरहो यत्र तादृशो॥७॥ किंच स विपिनविताने व
सति तिष्ठसि। ललितं। मनोहरं। धाम मंदिरं त्यजति। किंच धरणिशयने भृशं यथा स्यात्तथा लुठति तव नाम हे प्राणप्रिये हे प्रिये हे
राधे इत्येवं बहुवारंवारं विलपति विशेषेण जल्पति॥ धाम देहे गृहे आत्मनि रश्मौ स्थाने जन्मप्रभावयोरिति विश्वः

ध्वनति मधुपसमूहे श्रवणमपिदधाति॥ मनसि वलितविरहे निशि निशि रुजमुपयाति॥७॥ वस
ति विपिनविताने त्यजति ललितधाम॥ लुठति धरणिशयने बहु विलपति तव नाम॥८॥ भणति क
वि जयदेवे विरहिविलसितेन मनसि रभसविभवे हरिरुदयतु सुकृतेन॥९॥

कासः॥८॥ श्रीजयदेवकवौ भणति कथयति सति यत्सूक्तं पुण्यं जातं तेन मनसि अर्थाज्जायते तां प्रत्येवं तां च हरिः कृष्णः उद
यतु आविर्भवतु॥ कीदृशे। मनसि रभसस्य कृष्णकीर्तनविषयकोत्सहस्य विभवः प्राचुर्यं यत्र तादृशे॥ कीदृशो हरिः॥
विरहिविलसितेन विरहिणां विलसितेन विलासेन उपलक्षितः॥ वस्तुतः गत्या तस्य भक्तौ तर्यामिरूपतया स्थित
स्य न केनापि सह विश्लेषोपि तु लीलया तस्य विरहविलासमात्रमिति भावः॥ विरहिविलसितेन सह च विशेष
णाइति सूत्रेण तृतीया॥९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनः श्रीकृष्णस्य राधाविषयिणीमुत्कंठां श्लोकेनाह ॥ पूर्वं यत्रेत्यादि ॥ हे सखि माधवः कृष्णः भूयः पुनः हृदयो यो मे कुंभाविव कुचौ स्तनौ
तयोर्निर्भरं गाढं यः परिरंभ आलिंगनं तदेवामृतं मोक्षस्तं वांछति ॥ सांद्रानंदं दृश्यं हा हा विप्रविजन कृतेमतत्कुचकुंभपरिरंभस्य भो स्व
तेन रूपणं ॥ वेदांतिनां बाधनां व परमानंदावासेरेव मोक्षत्वात् ॥ किं कुर्वन् । तस्मिन्नेव निकुंजरूपे मन्मथस्य कामस्याधिष्ठा
ने पूते महातीर्थे अनिशं निरंतरं रत्ना मे वरं श्रेष्ठं देवतां ध्यायन् ॥ तवैव आलापाः त एव मंत्रास्तेषां आवली पंक्तिं जपन् ॥ महातीर्थ सेहतु
गर्भं विशेषणमाह ॥ पूर्वमिति ॥ पूर्वं पुरा यत्र तया सममं तया सह रतिपतेः कामस्य चुंबनालिंगनादिरूपाः सिद्धय आसादिता माध
वेन प्राप्ताः । तथा बच्छादि तिवांछित फलप्रदत्वेन महातीर्थं तदिति बोद्धव्यं ॥ अन्योपि साधकोमृतं मोक्षं वांछन् यत्र सिद्धिः पूर्वं

पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धयस् तस्मिन्नेव निकुंजमन्मथ महातीर्थे पुनर्माधवः ॥ ध्यायंस्त्वा
मनिशं जपन्नपि तवैवालापमंत्रावली भूयस्त्वत्कुचकुंभनिर्भरपरीरंभामृतं वांछति ॥ ७१ ॥

प्राप्नोति तत्रैव सिद्धेर्निकुंजादिमहातीर्थकल्पाधिष्ठि देवता या मंत्रावली जपति ॥ तामेव देवतां ध्यायति ॥ अत्रावलीपदो
पादानात् मालामंत्रत्वमस्य प्रतिपादितं ॥ छात्रता योजनश्वास सिद्धसुद्धिवादि ऋणाधनादिशोधनमंतरेणैव फ
लसामर्थ्यं प्रतिपादनं ॥ तदुक्तं योगरत्नावल्यां ॥ स्वप्नप्राप्तोपदिष्टादत्तेमालामंत्रे तथैव च ॥ वेदिकेदिषु सर्वेषु सिद्धादी
नैव शोधयेदिति ॥ निकुंजे इत्यनेन निकुंजादि महातीर्थे मंत्रमये झटिति फलसिद्धिर्भवतीति ध्वनितं ॥ तदुक्तं मंत्र
मंजूषायां गृहगोष्ठवनारामनदीनगसुरालये ॥ समीपवा गुरोः सिद्धिः शीघ्रं स्यादुत्तरोत्तरमिति ॥ मुक्तिः कैवल्यं
निर्वाणं श्रेयो निःश्रेयसामृतमित्यमरः ॥ ७१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰टी
३३

किं च अत्र मदोन्मुखीं राधां दृष्ट्वा संकेतगमनाय त्वरयितुमाह ॥ धीरसमीर इत्यादि ॥ गीतस्यास्य गुर्जरी रागः ॥ एकताली तालः ॥ गीतार्थस्तु ॥
हे नितंबिनि प्रशस्तनितंबवति हृदयेश्वरं हरिं अनुसर गच्छ ॥ गमनविलंबनं गमने कालक्षेपं न कुरु ॥ कीदृशं तं अभिसारे अभिसरण
स्थानं गतं प्राप्तं ॥ कीदृशेभिसारे ॥ रतिसुखं सुरतसुखं सारं मुख्यं यत्र तादृशे । पुनः कीदृशं हरिं । मदनस्य कामस्येव मनोहरः श्रि
तं हरणक्षमो वेशो वस्त्राकारो यस्य तं । वेशो वेश्यागृहे प्रोक्तो नेपथ्ये गृहमात्रक इति विश्वप्रकाशः ॥ अभिसारस्थलं पृच्छति ॥ धीरसमीर
इत्यादि ॥ यमुनायास्तीरे वने वनमाली वनमालाशाली कृष्णो वसति ॥ कीदृशे वने ॥ धीरो वायुर्यत्र तादृशे ॥ अत्र धीरसमीरेण वायोर्मंदत्वं
यमुनातीरे इत्यनेन शैत्यं । वन इत्यनेन सौगंध्यं कथितं ॥ कीदृशो वनमाली ॥ गोपीनां पीनपयोधरपरिमर्दनस्य मोचकस्तनप्रांतस्य मर्दनं
पक्षे युगच्छेदस्तनयुगच्छेदनेन शालिनौ शीलं यस्य तादृशः ॥ शीतो मंदः सुगंधश्च त्रिविधं वायुलक्षणमिति च ॥ समीरमारुतमरुज्जगत्प्राण समी

गुर्जरीरागे ॥ एकतालीताले ॥ रतिसुखसारे गतमभिसारे मदनमनोहरवेशं ॥ न कुरु नितंबिनि गमनविलंबनम[illegible]रतं हृदये
शं ॥१॥ धीरसमीरे यमुनातीरे वसति वने वनमाली ॥ गोपीपीनपयोधरमर्दनचंचलकरयुगशाली ॥१॥ ध्रुवपदं ॥ नामसमे
तं कृतसंकेतं वादयते मृदुवेणुं ॥ बहु मनुते ननु ते तनुसंगतपवनचलितमपि रेणुं ॥२॥

रण इत्यमरः ॥ धीरः पंडितमंदयोरिति धरणिः ॥ ध्रुवपदं ॥ यदि मद्वचनेन प्रमेषि तत्तदा कोमलेन वाद्यमानं वेणुमेवाकर्णये[illegible]समेतं
यथा स्यात् तथा मामास्व रससहितं यथा स्यात् एवं मृदुवेणुं वादयते । हे राधे प्राणेश्वरि इत्येवं कोमलेन वाद्यमानाद्वेणोः स्वरः आवि[illegible]र्थः ॥ की
दृशं वेणुं । कृतसंकेतं पदाय त्वमया वेणुर्वादयिते तत्र तया राधनेयमेव कृतः संकेतो यत्र तादृशं ॥ यद्वा ॥ मया कृतो यः संकेतस्तं नामस
मेतं तव नाम समेतेन तन्नामाक्षरसहितं वेणुं वादयते । अहं मन्ये तस्मिन् त्रिकुंजनिविष्टाभिराधे त्वरितमेहीति कोमलेन वाद्यमाने वेणुर्वदतीत्य
र्थः ॥ किं च न केवलं सांकेतिकसंबोधनेनैव संमानं करोति अपि तु धीरः पवनो वायुस्तेन चलितमागतमपि रेणुं धूलिं बहु मनुते अधिकं यथा स्या
देवं आद्रियते । अयं रेणुर्धन्यो यदस्य संगमस्तेन आगिना मनुते स्पृष्टस्तेनाहमपि धन्योयस्तनरजस्तामस्पृशमेवं बहु मनुत इति भावः ॥ रेणुर्द्वयोः ३३
स्त्रियां धूलिः पांशुर्ना रज इत्यमरः ॥

किं च श्रीहरिः शयनं शय्यां रचयति॥ कथं यथा स्यात् पतत्रे पक्षिणि पतति दृष्ट्वा आगच्छतीति शंकितं तर्कितं भवदुपा
यनं समीपं आगमनं यत्र एवं यथा स्यात्तथा॥ कीदृशे पतत्रे॥ विचलितं पत्रं यत्र तस्मात् तत्र॥ अविदितवलति पत्र इति पाठः॥
सुगम एव। तत एवं सचकितनयनं यथा स्यात् चकितनयनसहितं यथा स्यात्॥ एवं तव पंथानं पश्यति विलोकयति॥ पतत्र
पक्षः पक्षिणो रिति धरणिः॥ भवदुपयानमित्यत्र सर्वनाम्नो वृत्तिमात्रे इति पुंवद्भावः॥३॥ मुखरमित्यादि॥ हे सखि मंजी

पतति पतत्रे विचलति पत्रे शंकितभवदुपयानं॥ रचयति शयनं सचकितनयनं पश्यति तव पंथानम्॥
॥ मुखरमधीरं त्यज मंजीरं रिपुमिव केलिसुलोलं॥ चल सखि कुंजं सतिमिरपुंजं शीलय नीलनिचोलं॥४॥

रं नूपुरं त्यज॥ कीदृशं॥ केलौ सुष्ठु लोलं चंचलं॥ अत एव अधीरं मंदं यथा स्यात् एवं मुखरं शब्दायमानं॥ कमिव॥ रिपुमिव
शत्रुमिव॥ रिपुरपि अधीरः तरलो मुखरो वाचालः केलौ सुलोलः भवतीति मंजीरे रेतत्साम्यं॥ हे सखि सतिमिरपुंजे
अंधकारसमूहेन सहितं कुंजं चल गच्छ॥ नीलनिचोलं प्रच्छदपटं शीलय परिधेहि॥ मंजीरो नूपुरः स्त्रियामित्य
मरः॥ निचोलः प्रच्छदपट इति च॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰टी॰
३५

राधाया अस्वस्थं तं ज्ञनयितुमाह॥ उरसीत्यादि।हे पीते गौरांगी पुनः कीदृशे सुकृतविपाके सुकृतस्य पुण्यस्य विपाकः परिणामो यस्या
स्तादृशे॥ पुनः कीदृशे॥ उपहितआरोपितो हारो यया तादृशे॥ रतिविपरीते रतौ सुरते विपरीते वैपरीत्ये पुंभावना प्रव
र्ते मुरारेरुरसि हृदये राजसि जलधुन्नेव राजिष्यसि॥ राजसी सत्र भविष्यत्सामीप्ये वर्त्तमाना प्रत्ययः॥ सुकृतविपाके उपहितहारइ
ति द्वय मप्युरसी सस्येव विशेषणं।तदा तु सुकृतस्य विपाकस्य रूपे उपहितोहारो यत्र तादृशे उरसी सर्थः॥ किंवत् तडिदिव विद्यु
या उपमानात नेघस्य सजलस्येव विभूषितं॥ तदुक्तं पीनावर्णा यविद्युत्ति॥ अत्र कृष्ण हृदयस्य श्यामत्वेन सजलमेघस्य साम्यं॥ राधा
याश्वं वल्लहारस्य चंचलबलाकावकपंक्तिसाम्यं॥ राधाया अत हानी तरलतया पीततया पीतविद्युत्साम्यं।अत्र यद्यपि बलाका
उरसि मुरारेरुपहितहारे घनइव तरलबलाके॥ तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके॥ ५॥
पंक्ति विशिष्ट मेघोपरि स्थित तडिन्नेवा विरुध्यते यापि मेघोपरि बकपंक्तिर्यदि भवति तदुपरि च विद्युत्ततत्वे तादृशारा
धाया उपमानं भवतीसमस्तोपमा बोध्या।तदुक्तं।गोडिना॥ सर्वपमत्र भासारः समस्तं तद्द्विवक्षितं।नवाननन्दीभातीति गामनुभू
तोपमा विद्युदिति।यद्वा॥ तरलबलाके इत्यपि राधाया विशेषणं॥ तथा च।हे तरलबलाके चंचला कामुकी सर्थः॥ तस्मि
न्कोटिकृद पल्लावजप हृष्टेत मेव कामुकीमनोपुराषारतमाचरिष्यसीति भावः।बलाका बकपंक्तौ स्यात्कामुकावि
षकंठिका॥ बलाका कामुकी प्रोक्ता बलाकाश्च बकोमत इति शाश्वतः॥ ५॥ ७८

पुलकायितमुखो लहं [illegible] काराभिसारसंप्रति नायककर्तृकरणोत्कंठां जनयन्नाह ॥ विगलितमित्यादि ॥ हे पंकजनयने पद्मनयने राधे किसलयशयने पल्लवशय्यायां छलेन रविनाम्यां जघनं घटय आरोपय ॥ कीदृशं जघनं ॥ विगलितं कटिवंद पल्लवणप्रीहत्य दर्शनेन स्वयमेवास्खलितं वसनं यस्य तत् ॥ अत एवापिधानं पिधानमावरणं न इहितं ॥ पुनः कीदृशं ॥ परिहृता दुरीकृता रसना क्षुद्रघंटिका येन तादृशं ॥ पुनः कीदृशं हर्षस्य आनंदस्य निधानं गृहं ॥ कमिव ॥ निधिमिव ॥ रसनाकांचिजिन्वयोरिति विश्वप्रकाशः ॥ ६ ॥ हरिरभिमानीत्यादि ॥ हरिः कृष्णः अभिमानी मनस्वी तथा वरनायकला । दैन्य नापि गृहमयमा । तदि कोवेदा दास्य मक्य रे दिति भावः ॥ इयं रजनीरपि रात्रिरपि इदानीं विरामं अवसानं याति ॥ तया मम वचनं वच्मि साक्षि कुंडमित्यादि ॥ मदाकृत्य कुरु ॥ वि

विगलितवसनं परिहृतरसनं घटय जघनमपिधानं किशलयशयने पंकजनयने निधिमिव हर्षनिधानं ॥ ६ ॥
हरिरभिमानी रजनिरिदानीमियमपि याति विरामं ॥ कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामं ॥ ७ ॥ श्रीजयदेवे कृतहरिसेवे ॥ भणति परमरमणीयं ॥ प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयं ॥ ८ ॥

दृशं ॥ सत्वरं त्वरासहितं गमनं रचयतीति सत्वररचनं ॥ ७ ॥ मधुरिपोः श्रीकृष्णस्य कामं वांछां पूरय ॥ नायका वा या अभिसारिका वर्णनीया । तल्लक्षणं च रसार्णवे । मदनात्मनसंतमाया अभिसारयति प्रियं ॥ ज्यो हो तु मस्विनीयाता योषा वा स्वविभूषणा ॥ स्वयं वाभिसरेया तु सा भवेदभिसारिकेति ॥ ७ ॥ श्रीजयदेवेत्यादि ॥ श्रीजयदेवे कृता हरेः कृष्णस्य सेवा येन तादृशे ॥ परमरमणीयं यथा स्यादेवं भणति सति । हे जनाः हरिं कृष्णं नमत प्रणमत कथं यथा स्यात् ॥ प्रमुदितमानंदयुक्तं हृदयं यस्य तादृशं हरिं । सदयं दयासहितं । पुनः कीदृशं सुकृतकमनीयं सुकृतेन पुण्येन कमनीयं वांछनीयं ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰टी॰ [illegible]पि नायकस्योक्तिमाह ॥ विकिरतीत्यादि । हे कांते तव प्रियो मदनकदनक्लांतः मदनः कामः तज्जनितं कद
३५ नं दुःखं तेन क्लांतो ग्लानो वर्त्तते। मुहुर्मुहुर्वारं वारं श्वासान् विकिरति क्षिपति। नासापुरो नासाग्रे मुहुर्वारं वारमीक्षते ॥ ध्या
नेनापि प्रियां पश्यामीति ॥ नासाग्रं वीक्षमाणस्त्वां ध्यायतीति भावः। नासाग्रवीक्षणेन मनस एकाग्र्यं भवतीति
नासापुर इत्यनेन ॥ क्वचिन्नासासानाशामिति तालव्यशकारवान्पाठस्तदा श्वासान्विकिरति ॥ अथ च ॥ पुर आ
शां पुरोभागस्थां दिशां अनेन वर्तमाना आगमिष्यतीत्याशयेन मुहुरीक्षत इत्यर्थः। मुहुः वारंवारं कुं[illegible]
कीदृशं कुंजं ॥ गुंजन् भ्रमरशब्दं कुर्वन् ॥ कदाचिदन्येन वर्त्मना आगमनिलीयतिष्ठती सा शयेन [illegible]

विकिरति मुहुः श्वासान्नासापुरो मुहुरीक्षते प्रविशति मुहुः कुंजं गुंजन्मुहुर्बहु ताम्यति ॥ रच[illegible]
ति मुहुः शय्यां पर्याकुलं मुहुरीक्षते मदनकदनक्लांतः कांते प्रियस्तव वर्त्तते ॥ ३२ ॥

क्ष्वा केळण वा कुंजं प्रविशतीत्यर्थः ॥ मुहुर्वारं वारं बहु अधिकं यथा स्यात्तथा ताम्यति ग्लानो भवति। ध्याने विच्छेदत्वात्ता[illegible]
म्यतीति भावः ॥ क्वचित्कुंजं मुहुर्बहु ताम्यतीति पाठः। तदा कुंजमन्त्रान्ते नादं कुर्वन् ताम्यतीत्यर्थः ॥ मुहुः वारं वारं शय्यां र
चयति ॥ एतावत्कालं गुरुजनदृष्टिभीत्या नायातः परमायास्यतीति विचार्य शय्यां रचयतीति भावः ॥ मुहुर्वारं वारं
परितः आकुलं यथा स्यात्तथा ईक्षते। नासा तु नासिकायां स्यात् इति विश्वः ॥ आशा तु स्याद्दिशि प्रोक्ता लिपि ॥ ३२ ॥ ३५

पुनरपि त्वरयितुमाह ॥ तद्वाक्येनेति ॥ हे मुग्धे असौ अभिसारक्षणः अभिसारयोग्यः क्षणो रम्यः ततो दिवसेवलंबितफलं नि
फलं ॥ रम्यत्वे हेतुमाह ॥ तद्वाक्येन त्वदीयनेत्रजलेन सह तिग्मांशुः सूर्यः समग्रं यथा स्यात्तथा अस्तं गतः त्वदीयं बाष्पमप्य
स्तं गतं सूर्यपक्षे अस्तं गत इत्यर्थः ॥ क्वचित्तद्वाक्येन सममिति पाठस्तदा तद्वाक्येन त्वदीयवचनेन समं तिग्मांशुरस्तंगतः
मधिगमनाय त्वरयस्य मुत्तरमत्रय छध्वास्तु वाक्यं मुक्ता त्वोपलभ्यतस्त्वसौ नोपलभ्यत इत्यर्थः ॥ तमस्तिमिरं गोविंदस्य
मनोरथेन समं वांछया सह सांद्रतां निबिडतां प्राप्तं गतं ॥ गोविंदस्य मनोरथो वकारान्निबिडो जात इत्यर्थः ॥ कोकानां

तद्वाक्येन समं समग्रमधुना तिग्मांशुरस्तंगतो गोविंदस्य मनोरथेन च समं प्राप्तं तमः सांद्रतां ॥
कोकानां करुणास्वनेन सदृशी दीर्घा मदभ्यर्थना तन्मुग्धे विफलं विलंबनमसौ रम्योभिसारक्षणः ॥ ४४

चक्रवाकानां करुणस्वनेन रसगर्भेण स्वनेन सदृशी दीर्घा विस्तीर्णा मदभ्यर्थना ममयाञ्चा यथा कोकानां करु
णस्वनो नानाप्रकारः श्रूयते एवं मदीयाः काकूक्तयोपि सा प्रति तत्र श्रूयंत इति भावः । अयं सहोक्तिनामालंकारः ॥
तदुक्तं दंडिना ॥ सहोक्तिः सहभावस्य कथनं गुणकर्मणोरिति ॥ कोपकषायितचक्षुषं राधिकां प्रत्याह ॥ हे सरसम
३२

ग्री॰टी॰
७६

पुनःपुनरप्यंधकारस्याति नैविड्यं कथनेनाभिसारकरणस्यातिरम्यतामेवाह ॥ आश्लेषादित्यादि ॥ इह तमसि दंपत्योर्जायापत्योः को वा
नव्रीडाविमिश्रो लज्जासमन्वितो रसः आविर्भवतीत्यर्थः ॥ कीदृशोः दंपत्योः ॥ अन्यार्थं गतयोः अन्यां नायिकां अन्यनायकं चो
द्दिश्य गतयोः पश्चादकस्मात् मिलितयोः ॥ आश्लेषात् आलिंगनादनु पश्चाच्चुंबनं तदनु पश्चान्नखोल्लेखः तदनु स्वांतजस्य का
मस्य प्रोद्बोधः उद्रेकस्तदनु यः संभ्रमः संभोगादरः कामाद्वेगश्च तदनु यो रतारंभः सुरतारंभस्तदनु प्रीतयोः आनंदयोः
संभाषणैः जानतोः अन्यनायकाना मयाद्य हे पत्न्या आलापैः कथं ममोद्यं पतिरितः कथं मीयमपत्नीति स्वरविशेषेण
जानतोरित्यर्थः ॥ रतारंभानंतरं परस्परं ज्ञानेपि तुल्यापराधतापरस्परदोषोद्भावनं ॥ किं तुल्लज्जासहितः ॥ शृंगाररस
एवाविर्भवतीति भावः ॥ अत्र प्रथममाश्लेषस्ततश्चुंबनं ततो नखक्षतं ततः संभ्रमस्ततो रतं ततः प्रीतिस्ततो रसभावन

आश्लेषादनु चुंबनादनु नखोल्लेखादनु स्वांतजप्रोद्बोधादनु संभ्रमादनु रतारंभादनु प्रीतयोः ॥ अन्या
र्थं गतयोर्भ्रमान्मिलितयोः संभाषणैर्जानतोर्दंपत्योर्निशि को न को न तमसि व्रीडाविमिश्रो रसः ॥ ७४

मिति कामशास्त्रसिद्धः क्रमोपि कथितः ॥ तदुक्तं भरते ॥ आश्लेषचुंबननखक्षतकामबोधशीघ्रत्वमैथुनमनंतसुखप्रबोधं
प्रीतिस्ततोपि रसभावनमेककार्यमेवं नितांतचतुराः सुचिरं रमंत इति ॥ नवाष्टविधादि सुरतमप्युक्तं कामशास्त्रे ॥ तत्र
वदंतस्तत्र वृजिनकेशग्रहणादिकमप्युक्तं ॥ तथाच ॥ कथं कामशास्त्रोक्तक्रमरक्षेति वाच्यम् । तस्य निःशंककेलित्व
माभिधायकत्वात् ॥ इह तु परपुरुषपरा नारी चोद्दिश्य गतयोः शंकाकलुषितत्वात्सा हि पूर्वोक्तक्रमेणैव सुरतारंभ
वित इति भावः ॥ तदाहर्तुं ईर्ष्याकुलस्त्रीषु न नायकस्य निःशंककेलिः पराभानस्थितिः तस्मात् तादृशो मार्गाद्धकाका
रे तागमनविलंबनेमनुवितमिति भावः ॥ दंपती जंपती भार्यापती जायापती त्रेतामित्यमरकोशः ॥ ७२ ॥ ॥ ७६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनरपि तु रपि तुं स्खलत्येतां त्वमाह ॥ सभये त्यादि ॥ हे सुमुखि सुभगः शोभनः श्रीकृष्णः तां पश्यन् कृतार्थतां उपेतु प्राप्नोतु ॥ की
दृशीं ॥ तिमिरे अंधकारे सति पथि वर्त्मनि सभयं च चकितं भयसहितं चकितं च यथा स्यादेवं दृशं नेत्रं विन्यस्यंती मर्पयंती ॥ पु
नः कीदृशीं ॥ तां प्रति तरुतरु प्रति मुहुः पुनः स्थित्वा मंदं यथा स्यादेवं पदानि वितन्वंती विस्तारयंतीति विस्तारयंती ॥ गाढां
धकारे तमालविटपेषु कोवेदा चैव कृष्णः स्थितो भविष्यतीत्याशयेन वायमेव कृष्ण इति भ्रमादेतिकमुपेत्य पश्चाद्विशेषद
र्शने सति तत उत्थाय पुनरन्यत्र तथैवं प्रतितरु स्थित्वा स्थित्वा गच्छतीति भावः ॥ किंदृशीं ॥ कथमपि शनैश्शनैश्च रागासेपारिना

सभयचकितं विन्यस्यंतीं दृशं तिमिरे पथि प्रतितरु मुहुः स्थित्वा मंदं पदानि वितन्वतीं ॥ कथमपि रहः
प्राप्तामंगैरनंगतरंगिभिः सुमुखि सुभगः पश्यन्स त्वामुपैतु कृतार्थताम् ॥१५॥ ॥ इति श्री गीतगो
विंदे जयदेवकृतौ साकांक्षपुंडरीकाक्षो नाम पंचमः सर्गः ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

रह एकांतस्थलं प्राप्तां ॥ पुनः कीदृशीं ॥ अनंगतरंगिभिः अनंगस्य कामस्य यस्तरंगः पुनः पुनः स्फुरद्धर्षस्तद्युक्तैः अंगैरुप
लक्षितां ॥ अंगैरित्यत्र विशेषणे तृतीया ॥१५॥ नो भूपाः कति संति तेषु विरला विद्गुणग्राहिणस्तन्मध्येपि नैव प्रबंधध
वनानिर्बंधिनो दुर्लभाः ॥ द्वित्रास्तेष्वपि केचिद्विदुषि दृढप्रेमानुबंधाश्रिता चैतेषां धुरमेकमेव वहति श्रीशालिनाथः प्र
भुः ॥१५॥ ॥ इति श्रीमहामहोपाध्यायश्रीशंकरमिश्रविरचितायां गीतगोविंदटीकायां श्रीशालिनाथकारितायां
रसमंजरीनामधेयायां पंचमः सर्गः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰टी॰ (३७)

जयेत्यादि ॥ अथ अथानंतरं सखी तच्चरितं तस्या राधायाः श्चरितं गोविंदविषयीकृत्य प्राह उवाच ॥ कीदृशे गोविंदे ॥ मनसिजे
कामेन मंदे मंदीकृते ॥ किं कृत्वा ॥ तां राधां लतागृहे कथंचिन्मृदुपदिक्षं बहुकालं व्याप्य अनुरक्तां दृष्ट्वा ॥ अस्मिन्नेव लतागृहे वे
लिः कर्तव्येति चिरकालीनं तस्यानुरागं तात्रे सखी ॥ पुनः कीदृशीं । तां तु अशक्तां कल्पातिकं प्रयातुमसमर्थां ॥ मंदः स्वबलेन
दगातमर्षे स्वरे लम्ब रागिणोरिति विश्वप्रकाशः ॥२७॥ भाषया युद्धबाध्यते कीर्तनं कथयति ॥ पश्यतीत्यादि ॥ गीतस्यास्य गुण
करीरागः ॥ तालश्च रूपकः ॥ गीतार्थश्च ॥ हे नाथ हे हरे राधावासगृहे लीलागृहे त्वत् भवतः सकाशात् सीदति ॥ आद्यसत्राप

अथ तां गंतुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा ॥ तच्चरितं गोविंदे मनसिजमंदे सखि प्राह ॥ २८ ॥ पश्य
ति दिशि दिशि रहसि भवंतं ॥ तदधरमधुरमधूनि पिबंतं ॥ १ ॥ ॥ नाथ हरे नाथ हरे ॥ सीदति राधा वास
गृहे ॥ ॥ गुणकरीरागेन गीयते ॥ ७ ॥ रूपकताले ॥ न ॥ ध्रुवपदं ॥

वति ध्रुवपदं ॥ विश्लेषत्वं भवतस्त्या अवसादकारणमिति ॥ रहसि येकांते दिशि दिशि भवंतं पश्यति ॥ कीदृशं भवंतं पश्य
ति ॥ कीदृशं भवंतं ॥ सुधा मधुर मधूनि तदीयाधररूपाणि मधुर मधु पिबंत मास्वादयंतं भावनया स्वकीयाधर ॥ पानं
कुर्वंतं ॥ तामेव दिशि दिशि पश्यतीति भावः ॥ यद्वा ॥ तं छब्दान्युवाचकः ॥ तथाच ॥ तदधरमधुरमधूनि तदन्यस्यान्नायिकाया
अधरमधुर मधूनि पिबंतं ॥ तां दिशि दिशि दिशि पश्यतीत्यर्थः ॥ त्वच्छब्दस्तकारांतोन्यपर्यायः सर्वनाम गणव्याख्यानावस
रे प्रक्रियाप्रसादे त्वत् शब्दोय मन्यवाची द्विपठितः स्वरभेदाद्दकेउ दात्तोन्यानुदात्त इति काशिकाकारमतं ॥ ग्रंथ ३७
कारमतं तु एकोपारांतो द्वावप्यनुदात्तादिति ॥ भोगावासो वासगृहमिति हारावली ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु किमिति सीदति अत्रैव ॥ कमिति नायामोध्यन आह ॥ त्वदभिसरणे तवाभिसारे योरभसउत्साहस्तेन वलंती प्रसाधनोद्योगा
त्प्रियमाणा कियंति पदानि व्रजति विह्वलादानि चलंती तदंतिकमागंतुं चलंती व्याप्तिस्वलंति ॥ तथाच ॥ सहिरहसं तथा त्वदंति
कमागंतुमसमर्थे सर्थः ॥ २ ॥ नन्वेवं चेदसक्ता तर्हि कथं जीवतीत्यत आह ॥ विहितेत्यादि ॥ सा पुनः केवलं तवरतिकल्ल याप्र
वानुस्मृततवरतेरावकल्लेन जीवति ॥ किं दृशी ॥ विहिता विशदे निर्मले विशदे मृणाले किशलये नवपल्लवे पल्लवच्छया कं कण
नि निययासा ॥ कलनाकालयोः कलंतिविधप्रकाशाः । वलयः कंकणानि वे सया ॥ ३ ॥ पुनः कीदृशी मुहुर्वारंवारं अवलोकि
तावीक्षिता मंडने मुकुटकुंडलेवनमालादिभिर्लीला या नानुकृती मयातादृशी ॥ पुनः कीदृशी ॥ अहं मधुरिपुः इति भावन

त्वदभिसरणरभसेन वलंती ॥ पतति पदानि कियंति चलंती ॥ २ ॥ विहितविशदबिसकिशलयवलया ॥ जीवति परमि
ह तव रतिकलया ॥ ३ ॥ मुहुरवलोकितमंडनलीला ॥ मधुरिपुरहमिति भावनशीला ॥ ४ ॥ त्वरितमुपैति न कथमभ
भिसारं हरिरिति वदति सखीमनुवारं ॥ ५ ॥ श्लिष्यति चुंबति जलधरकल्पं ॥ हरिरुपगत इति तिमिरमनल्पं ॥ ६ ॥

लीला इति चित्तेन पर ॥ रहसितवेशं विधाय अहं मधुरिपुरिति चिंतयतीति भावः ॥ लीलावहाविशेषः ॥ तदाह वात्स्यायनः ॥
प्रयोजनस्य चेष्टाया अनुरागातिशायेनया ॥ रूपते नु कृतिः सेयं लीलेत्युक्ता मुनिसत्तमैरिति ॥ ४ ॥ हरिस्त्वरितं अभिसारं अ
भिसारकुंजं न उपैति आगच्छति इति सखीमनुवारं मा वदति ॥ किं च सा हरिः इह आगत इति बुध्या अनल्पमधिकं तिमि
रं अंधकारं श्लिष्यति आलिंगति चुंबति च ॥ कीदृशं तिमिरं जलधरकल्पं सुपायमेघसदृशं । यदा पदोत्थाय तिष्ठति चं त
र्कितन्दा तदा निकुंजगृहे पुंजीभूतमंधकारं दृष्ट्वा तदुमातत्ये वालिंगने चुंबनादिमानरतीत्यागंतुमेष न पारयतीति
भावः ॥ आलिमाभयमबुकारस्तत्रैव गणपासे प्राकृ ॥ ६ ॥

गी·टी·
३८

पश्चाद्विशेषदर्शने सति भवति हपि विलंबिनि विलंबं कुर्वति सति विगलितलज्जा सा वासकसज्जा सा वासकसज्जा वासके लीला गृहे कांताभिरमणाय सज्जा संभृत सकलकेलोपकरणा विलपति द्वलिः गृहकृत्य मेतद्विदीदास्यंतमु यिलया चेरतिमार्गविलार्पं करोति ॥ रोदिति रोदनं करोति ॥ वासकसज्जालक्षणांच रसार्णव सुधाकरे ॥ भरताद्ये रपिदधु स्त्रीणां वासकस्ता वासकः ॥ स्ववासकवशात्कांते समेष्यति गृहं प्रति ॥ सज्जीकरोति चात्मानं या सा वासकसज्जेति ॥ शृंगारतिलकेपि ॥ ७ ॥ भवेद्वासकसज्जासौ सज्जिता गारतलिया ॥ निश्चियागमने भर्तुर्द्वारेक्षण परायणेति ॥

भवति विलंबिनि विगलितलज्जा ॥ विलपति रोदिति वासकसज्जा ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥
श्रीजयदेवकविरिदमुदितम् ॥ रसिकजनं तनुतामतिमुदितम् ॥ ८ ॥ ७ ॥ ७ ॥ ७ ॥

तदुक्तं पंचसायकेपि ॥ स्मर्तुं चंदनास्रवविभूषित विभूषितांगी यावल्लभागमनमार्गनिबद्धदृष्टिः ॥ तल्पंगतारतिरवासगृहे वसेत सा भक्तिर्विता डागतिर्वासकसज्जकेति ॥ ७ ॥ श्रीजयदेवेत्यादि ॥ श्रीजयदेवकवेरिदमुदितं ॥ कथितंगीतं रंजिकजनं शृंगाररसास्या देवपुरःसर भगवद्भक्तिरूपरसास्वादग्रहितमति शायेनामंदं ते तनुतां वि स्तारयतु ॥ ८ ॥ ॥ ७५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विपुलेत्यादि ॥ हे कितव धूर्त सा मृगाक्षी रसजलधौ शृंगाररससमुद्रे निमग्ना आस्ते। तत्र हेतुगर्भं विशेषणमाह ॥ ध्यानलग्नेत्यादि ॥ ध्या
नेन तव चिंतनेन लग्ना एकाग्रचित्ता ॥ तथा च ॥ निरंतरं तव चिंतनवशात् त्वां पुरःस्थितमिव मत्वा रससमुद्रमग्ना भातीति भावः ॥ किं कृत्वा ॥ अ
मंदा अनल्पा या कंदर्पचिंता कामविषयिणी चिंता कथं प्रियमिलिष्यति मिलितापि प्रसादं करिष्यति ॥ न वेत्यादि कां तां तव विधा
य तथा च तदंतिकं न रया यदि न यास्यसि तदा तव वा निष्ठं सा तु निरंतरं रसमग्ना आस्ते इति भावः ॥ यद्वा ॥ तव अनंतकंदर्पचिंतां न छिद्य
यिनी कथं रुकृष्यामि लीष्यती या अमंदकंदर्पचिंतां विधाय तथापि तव चेत्तु मिलिष्यसि तदा तव ध्यानमेवाचरंती स्थिता ॥ कीदृशी ॥ विपु
ला प्रचुरा पुलकपालिः रोमांचपंक्तिर्यस्याः सा ध्यानकल्पित नवकरस्पर्शोद्भूतरोमांचवती सती ॥ किं कुर्वती काकु व्याकुलं
यथा स्यात् तथा ध्वनिविकारविशेषेण व्याकुलं यथा स्यात् एवं व्याहरंती ध्यानेन कृतवक्त्रेण वीवीबंधेनात्मावनाशक्कं परिक

विपुलपुलकपालिः स्फीतसीत्कारमंतर्जनितजडिमकाकुव्याकुलं व्याहरंति ॥ तव कित
व विधायामंदकंदर्पचिंतां रसजलनिधिनिमग्ना ध्यानलग्ना मृगाक्षी ॥ ११ ॥

त्वाकुद्दृमिता रम्य ॥ हा च मा अश्रिता मुंच मुंच न मम मामेत्यादि निषेधकं वाक्यं कथयंतीति भावः ॥ पुनः कथं यथा स्यात् स्फीतः
प्रवृद्धः सीत्कारो यत्र एवं यथा स्यात् ध्याने नैव नदंतनखक्षतादिकं परिकल्प्य सीत्कारं करोतीति भावः ॥ पुनः कथं यथा
स्यात् अंतश्चित्ते जनितो जडिमा जाड्यं यत्र एवं यथा स्यात् ध्यानकल्पित तत्वालापादि समये सम्भाष्य सा त्विति भावयतीति
भावः ॥ अन्यस्यापि गंधमदनस्य जाड्यं शीतज्वरात् सीत्कारो व्याकुलं वृहणं यथा स्यादेवं भाषणं च भवतीति ध्वनिः इयं च
जडतास्या नवमी अवस्थात् प्रसणो वेत्यं शाक ॥ बुद्धमित लक्षणं रक्षार्णं कृतधाकुर ॥ केशाधरादिग्रहणो मोद मानापि मानस
दुःखिते च बहिः कुप्यत्र कुट्टमितं तदिहोक्तं तथेष्टप्रतिष्ठानदिति शृंगारदीपिका ॥ काकुः स्त्रियां विकारोपः शोकभीत्या
दिभिध्वनौ इत्यमरः ॥ ११ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी०टी०
३९

पुनः स्वस्वं तु रयत मह॥ श्रीगोविंदचरणं पिमादि॥ हे सखि एषा वरतनुः सुंदरांगी त्वया विना निशां रतिं न नेष्यति न त्र गातं प्रापइष्यति॥
कृष्ण शरीर मनेन प्रकारेण आकल्पोल्लेख कायः विकल्पस्तु मनशंका तल्पशय्या तद्वनात संकल्प हृदिय संगादिध्यानं इत्यादि
लीलाय त्या याशंकापि तत्र घ्यासं गोपितुं संगा भिल्लारिहन्या रत्तस्यानु कुत्रापि मनो रमत इति भावः॥ उक्तं का सादि ध्यासं ग्रामध्या
ह॥ ओं गोविंदेत्यादि॥ श्रीगोविंदचरणं करोतीति भावः॥ अनेना कल्प युक्तं॥ अथ बहुशो वारं वारं पुत्रेपि संवादिति पश्यादि वर
णाद्यातेन वल्लि समिरां ग्राम मागतं परीशं को॥ अनेन विकल्पः कथित॥ अथ वश याया शयनेन वितनुत विस्तार लिंग्यति॥
अनेनेत भ्रमर वनाउक्ता॥ अथ बनि वहुत कालं यापयतां ध्यायति विनतयति॥ अनेन संकल्प उक्तं॥ तथा च तवागमन प्रत्या

श्रीगोविंदचरणं करोति बहुशः पुत्रेपि संवादिति ग्रामे तांपरिवृं को विनतनुते शय्यां चिरं ध्यायति॥ इत्याकल्पविकल्पत
ल्परचनासंकल्पलीलाशतव्याशाकापि विनातया वरतनुर्नैषा निशां नेष्यति॥ ३ त्वंकिं विलम्बसे लंपट गोविंद
नेमंदार भूमीरुहे प्रातर्यासि न दृश्यगोचरमितः आनंदनंदास्पदं॥ राधा यावत्वनेत दधपुरुषानंदं तिवे वनं गोविं
दस्य अयंति साय मतिथेः प्राशाकग मंगिरः॥ ३९॥ ॥ इति श्रीगीतगोविंदे श्रीजयदेवकृतो वासकसज्जावर्णने कुंद
को नाम ष: सर्गः

शय: एते व्यापारेः संप्रतिकालं नयति यदि च त्वया सर्वथा न्यां तव्यं तदा प्राणं निराशा सति रात्रिं नेतुं
नशक्ष्यतीति भावः॥ अन्यतास्थायें हावो वर्णितः॥ तदुक्तं॥ अन्यतासानुका त्वेवा प्रियस्यागमने सति॥ दिदृक्षा संभ्रमेण सत्योत्सव
त संसंभ्रम मर्म कृतिरिति॥ आकल्पवेशानेपथ्ये समरः॥ तल्पो विकल्प शंका च॥ तल्प संवशनीय स्यात तल्प पदृकलत्रयो
रिति विश्वः॥ संकल्पकर्ममानसमिति अमरः॥ ३ वा गुणेनु एदोष इत्यः परेषांक्रम स्वदो वाचरणाय किं नात॥ खलनः पि भाष्य
ति मम त्वद्दोषात् संत खलनस्तानपि किं ब्रवीमि॥ ६॥ ॥ इति श्रीमन्महामहोपाध्याय श्रीशंकर मिश्र विरचितायां गीतगोविंदटी
कायां श्रीप्रद्युम्ननाथ कारितायां रसमंजरी नामधेयायां षष्ठः सर्गः॥ ॥ श्रीगोविंदाय नमः॥ ॥ ॥ ३९

अत्रांतर इति अत्रांतरे अस्मिन्नवसरे इंदुश्चंद्रः अंशुजालैः किरणसमूहैः वृंदावनांतरं वृंदावनमध्यं अ
दीपयत् प्रकाशितवान् ॥ कीदृशः दिक्पूर्वादिक् सैव सुंदरी कामिनी तस्या वदनस्य मुखस्य चंदनबिं
दुमंडलाकारचंदनतिलकं अत्र पूर्णचंद्रो वर्णपत्वेन बोध्यः । खंडचंद्रे चंदनबिंदुसादृश्याभावात् । पुनः
कीदृशः । स्फुटा प्रकटीभूता लांछनस्य कलंकवास्य श्रीः शोभा यत्र तादृशः । कुलटाकुलस्य अभिसारिणीस
अत्रांतरे च कुलटाकुलवर्त्मघातं संजातपातक इव स्फुटलांछनश्रीः ॥ वृंदावनांतरमदीपयदंशु
जालैर्दिक्सुंदरीवदनचंदनबिंदुरिंदुः ॥ ३ ॥ प्रसरति शशधरबिंबे विहितविलंबे माधवे विधुरा ॥
विरचितविविधविलापं सा परितापं चकारोच्चैः ॥ ४ ॥ गोडामालवरागे । प्रतिमाठताले ॥ कथि
तसमयेपि हरिरहह न ययौ वनं ॥ मम विफलमिदममलरूपमपि यौवनं ॥ १ ॥ यामि हे कमिह
शरणं सखीजनवचनवंचिता ॥ इदं ध्रुवपदम्
मूहस्य पापो वर्त्मघातः संकेतस्थलामार्गप्रतिरोधस्तेन संजातं कंयस्य स इव । अपरस्यापि कृतपापस्य
कलंकस्फुटी भवतीति ध्वनिः ॥ ३ ॥ प्रसरतीत्यादि । शशधरबिंबे चंद्रबिंबे चंद्रबिंबे प्रसरति सति माध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेल्लद्विलंबिते विलंबे कृतकालक्षेपे सति विधुरा दुःखिता राधा उच्चैः परितापं चकार कथं यथा स्यात् ॥ पूर्वं तदा
गमनं शंकारणाः सीच्चं वेदिते । निःसारिणी कुसंवार इति तदागमनं प्रति निराशाधिकं विललापेति भावः
॥ विविधविलापमेव गीतेन कथयति । कथितसमयेपीत्यादि । गीतस्यास्य गौडरागः । प्रतिमठताळः । गीतार्थ
स्तु ॥ अइह विपिने कं जनं शरणं यामि ॥ पदः ॥ ध्रुवं जलमग्निं यमं वा शरणं यामि तेन विना जलप्रवेशमग्निप्रवे
शं यमगृहं वा यामीसर्थः ॥ कीदृशी । सखीजनानां वचनेन वंचिता प्रतारिता ॥ मयाहरिरानीयत एवेति स
खीवचनेन प्रतारितेसर्थः ॥ सख्योपि वंचकतारिकास्तदा कोन्यो विश्वासपात्रं भवेदिति भावः ॥ कोत्र ह्यालसा
निळार्केषु शमने सवनास्तिव ॥ पावके च मयूरे च सुखशीर्षजलेषु च ॥ मिति विश्वप्रकाशः । शरणगृहर
क्षित्रोरिसमरः ॥ ध्रुपदं ॥ सखीवचनमेवाह ॥ कथितसमयेपीति ॥ हरिः कथितसमयेपि सख्याग्रे स्वय
मेव कथितो यः समयः कालो स्मिन्नवसरे मया संकेतस्थळमागंतव्यमिति ॥ यद्वा ॥ सख्यामदग्रेयः
समयः कथितः तदपि वनसंकेतनिकुंजं न वयौवनगतवान् । इदमारूढमेव मे यौवनं तारुण्यममम
ल रूपमपि निर्मळसौंदर्यमपि विफलं ॥ पूर्वं तदागमनप्रत्याशया स्थितं संप्रत्यवधिलंघने निर
वधि दुःखोपभोगासमर्था शरीरं त्रसहप्याम्यवसमुन्नमे यौवनं पास्यतीति भावः ॥ १ ॥ ७ ॥ ७ ॥ ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदिति ॥ यत् तस्य कृष्णस्यानुगमनायानुसरणाय निशि रात्रौ गहनमपि वनमपि शीलितं तेन कृष्णेन निमित्त
भूतेन मे मम हृदयं अशयशरेण कामेन कीलितं विद्धं ॥२॥ ममेत्यादि ॥ मम मरणमेव वरमुत्कृष्टं ॥ त
त्र हेतुमाह ॥ इह वने अचेतनामूर्छया ॥ यद्वा ॥ अचेतनामूर्छया ज्ञानरहिता ॥ यद्वा ॥ यत्र कृष्णस्तत्र चेतना
बुद्धिर्यस्यास्तादृशी ॥ विरहानलं विरहाग्निं किं किमिति विषहामि सहे ॥ तथा च ॥ इह मम दुःखस्य कोपि

यदनुगमनाय निशि गहनमपि शीलितं ॥ तेन मम हृदयमिदमसमशरकीलितं ॥२॥ मम मरण
मेव वरमतिवितथकेतना ॥३॥ मामहह विधुरयति मधुरमधुयामिनी ॥ कापि हरिमनुभवति
कृतसुकृतकामिनी ॥४॥ अहह कलयामि वलयादिमणिभूषणं ॥ हरिविरहदहनवहनेन
बहुदूषणं ॥५॥

दातापिने मनुदितं किमिसोवरामीति भावः ॥ कीदृशी अहं ॥ अतिवितथकेतना अतिशयेन वि
तथं मिथ्याभूतं केतनं गृहं ॥ यस्यास्तादृशी ॥ तस्मिन्निमिलिते यद्वा ॥ अतिवितथं केतनं इयं स्वयं निवि
हाय अन्यपुरुषमभिसरतु वतीत्येवं रूपं लांछनं यस्यास्तादृशी । तस्मिन्निमिलिते लांछनमपीदं न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेदुःखा यस्मात् संप्रति तन्मृगाङ्कलांछनमात्रमेदुःखदमिति भावः। केतनं लांछने काये गेहे वोपनिमं
त्रणे इति विश्वप्रकाशः॥ ॥महमृषणाइति चतुराघतरगणेषु गायस्मै पदीविकल्पान्नतः पठितस्त
स्य इन्द्रस्य याभावपक्षे विषहांमीति प्रयोगः॥३॥ मामित्यादि॥ अहेहेति खेदे द्वयं मधुरा मनोह
रा मधुयामिनीव संततरात्रिर्मां विधुरयति विकलयति॥ कापि कृतं सुकृतं पुण्यं यया एतादृशी
कामिनी हरिं कृष्णं अनुभवति केलिसमये पश्यति॥ विधुरं स्यात् प्रियविश्लेषे विधुरो विकल
न्यवदिति विश्वप्रकाशः॥ मधुरं सरसं ज्ञेयं स्वादुन्यपि मनोहरे इति धरणिः। स्याद्धर्ममस्त्रि
यां पुण्यश्रेयसि सुकृतं वृषइत्यमरः॥४॥ अहहेति॥ अहा हतेति उद्धृते वलयादि मणिभूष
णं कटकादि मणिरवचितमळेकाः हारि विरहदहनवहनेन हेतुना विरहाग्निधारणेन बहुद
षणं॥ अनेकदोषपश्यामि स्त्रीणां प्रियाणां भरणानि वनितान्यधुना भारभूतानी ४१
सङ्कुतमिति भावः॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुसुमेत्यादि। स्रगपि पुष्पमालापि अतनुशरलीलया अतनुः कामः तस्य ये शरास्तल्लीलया मां हृदि हंति ताडयति॥ कामबाणा अपि पुष्पाण्येव स्रगपि पुष्पमापीति तल्लीलयाहं तीति भावः॥ कीदृश्या॥ अतनुशर लीलया॥ अतिविषमशीलया अतिशयेन विषमं शीलं स्वभावो यस्यास्तादृश्या॥ अन्यबाणा हि द्विमाः सुत मुत्ताय घ्नंति कामबाणास्तु हृदि संगता एव क्षतमकृत्वैव ताडयंतीति विषमशीलेति भावः॥ कीदृशीमां

कुसुमसुकुमारतनुमतनुशरलीलया॥ स्रगपि हृदि हंति मामतिविषमशीलया॥६॥ अहमिह निवसामि न गणितवनवेतसा॥ स्मरति मधुसूदनो मामपि चेतसा॥७॥ हरिचरणशरण जयदेवकविभारती॥ वसतु हृदि युवतिरिव कोमलाकलावती॥८॥ इति त्रयोदशप्रबंधः॥

कुसुमसुकुमारतनुं पुष्पकोमलांगी॥६॥ अहमिहेत्यादि॥ अहं इह निकुंजे निवसामि॥ कीदृशी॥ न गणिताः न संभाविताः वनवेतसा विपिनस्य वेत्रलताययासा मधुसूदनः कृष्णो मां चेतसा स्मर त्यपि न। चेतो मां त्रसाध्यं स्वयं स्मरणामपि न करोति अन्यस्य का वार्त्तेति चेतसे अनेन ध्वनितं॥ अन्यथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मरणस्य चेतोजन्यत्वेन चेतससत्सौ सत्यपि वैयर्थ्यापत्तेः॥ नगणितेत्यत्र नशब्देन निषेधवाचकेन
समासो ननुमुशब्देन समासेह्निनस्य तत्पुरुषे लोप इति नलोपे अगणितेति स्यात्॥ यद्वा॥ जनेनाप
मसमकालास्मरश्रान्तेन तथा च गणिताः प्रतिलंतं कुलमन्वेषयसा परिसंख्याता वनचेतसा यथा सा
त्र्यहं इह वने निं जनं निवसामि अपि तु निवसाम्येव शेषं पूर्ववत् विप्रलब्धा चेयं नायिकालक्षणां तु
रसार्णव सुधाकरे॥ कृत्वा संकेतमप्राप्ते दयिते व्यथितान्तरा॥ विप्रलब्धेति सा प्रोक्ता बुधैरस्यास्तु
विक्रिया॥ निर्वेद चिंता खेदाश्रु मूर्छा निःश्वसितादय इति॥ ७॥ हरिचरणेति॥ हरेश्चरणयोः स्मर
णायस्य एतादृशो यो जयदेवकविस्तस्य भारती वाणी हृदये वसतु अर्थात् कृष्णभक्तानां। कीदृशी
भारती॥ कोमलनिष्कुरपश्चैर्नर्प कलावती कविलकलायुता। करिवयुवतिरिव। कीदृशी कोमला
मृदंगी कलावति चतुःषष्टि कलाकुशाली॥ ८॥ ॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ४२

तत्किमित्यादि ॥ कांतः कृष्णः संकेतीकृतो यो मंजुर्मनोहरो वंजुललताकुंजो वेत्रलतागृहं तत्रापि
यत् यतोहेतो र्भृगीस्तत् । कामपि कामिनीं किं अभिसृतः । अन्यस्याः कस्याश्चिद् अभिसारभूमिं प्राप्त
इति किमु इत्यर्थः ॥ यद्वा ॥ बंधुभिर्गोपालैः बहुकल्लिभिः कौतुककलापमिश्रैर्बद्धा नियंत्रितः किमु ॥
यद्वा ॥ अंधकारिणि वनतरतरुच्छायया निबिडांधकारवति वनोपांते संकेतीकृताविपिनसमीपे
तस्मिं कामपि कामिनी मभिसृतः किं वा फल्ला केलिभिः बद्धो बंधुभिरंधकारिणि वनोपां
ते किमु भ्राम्यति ॥ कांतः क्लांतमनाः मनागपि पथि प्रस्थातुमेवाक्षमः संकेतीकृत मंजु
वंजुललताकुंजेपि यन्नागतः ४६ अथागतां माधवमंतरेण सखीमियं वीक्ष्य विषाद
मूकं ॥ विशंकमाना रमितं कयापि जनार्दनं दृष्टवदेतदाह ४७
संकेतस्थलमप्राप्य भ्राम्यति परिभ्रमणं किमकरोत् ॥ संशयांतरमाह ॥ क्लांतमना इति ॥ प्राक्तन
किमुशब्दे अपि संबध्यते तथा च क्लांत मद्विश्लेषदुःखेनोपतप्तं मनो यस्य एतादृशः ॥ प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यातुमेवा समरत्त वथ्वलितमेवासमर्थइतिविमुध्स्यर्थः॥उक्तावेयंनायिका॥ तदुक्तंशृंगारति
लके॥उक्ता भवंति सा यस्याः संकेतं नागतप्रियः तस्यानागमनेहेतुं चिंतयंसाकुलायर्येति॥ ४१॥
अथेसादि॥रामकृष्ण अथ अथानंतरं इयं॥राधाएतवृ स्यमाणं दृष्ट्वदाह उक्तवती।यथासाक्षा
तदृष्टः कस्यचिद्वृत्तांतः केनचित्कथ्यते तद्वदित्यर्थः॥किंकृत्वा॥सखीं माधवमंतरेण कृष्णं
विना आगतं वीक्ष्य दृष्ट्वा॥अतएव विषादेन मूका कृतमौना॥कीदृशी॥जनार्दनं श्रीकृष्णं
कयाचितनायकया सार्धं रमितं विशंकमाना तर्कयंती।जनार्दनमिति विचित्रयदापत्त्यासत त
थाचजनानां मर्दनत्वभावोयस्तस्य ममतायजनकत्वमुचितमेवेति भावः॥५२॥॥

५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेव गीतेन कथयति ॥ स्मरसमरेत्यादि ॥ गीतस्यास्य वसंतरागः ॥ एकतालीतालः । गीतस्यार्थस्तु ।
कापि युवतिर्मधुरिपुणा श्रीकृष्णेन विलसति रमते अत एवाधिकगुणा अधिकः सौंदर्यादि रू
पो गुणो यस्याः ॥ सामन्तं केतामगनो सुखमपि कृष्णं गुण रूपहस्य रमिति पतीति मत्ताधिकगुणेति

वसंतरागे ॥ एकतालीताले ॥ स्मरसमरोचितविरचितवेशा ॥ गलितकुसुमदलविलुलि
तकेशा ॥ १ ॥ कापि मधुरिपुणा विलसति युवतिरधिकगुणा ॥ ध्रुवपदं ॥ हरिप
रिरंभणवलितविकारा ॥ कुचकलशोपरि तरलितहारा ॥ २ ॥ विचलदलकललि
ताननचंद्रा ॥ तदधरपानरभसकृततंद्रा ॥ ३ ॥ चंचलकुंडलललितकपोला ॥ मुखरि
तरशानजघनगतिलोला ॥ ४ ॥

भावः ॥ युवतिर्विलसतीत्यनेन नायकाकर्तृविलासकथनाद्विपरीतरतमुक्तं ॥ ध्रुवपदम् ॥
कीदृशी । स्मरसमरः कामसंग्रामः सुरतमिति यावत् । तत्रोचितो योग्यो विरचितः ।

रुतो वेशा आभरणं यया सा ॥ पुनः कीदृशी ॥ विगलितः कुसुमभरो येभ्यस्तादृशा विलुलिताः स्खलेन
वाचग्रहपूर्वकं चुंबनदानेन स्रस्ताः केशा यस्याः सैषा सा ॥ विपरीतेव नसिकायाः केशाग्रहणपूर्व
कमेव चुंबनं कार्यमिति सूचकं प्राक् ॥ स्त्रियां समुरानीकरणाडंबरः ॥ वेश्या वेश्यागृहे प्रोक्तो ने
पथ्ये गृहमात्रके इति विश्वप्रकाशः ॥ २ ॥ पुनः कीदृशी ॥ हरेः परिरंभणेन आलिंगनेन चलिता जा
तो रोमांचादि यस्याः सा ॥ पुनः कीदृशी ॥ कलशाविव ययोः कुचयोस्तत्र तरलितश्चंचलो हारो यस्याः सा
॥ ३ ॥ पुनः कीदृशी ॥ विचलद्भिश्चंचलैरलकैः श्रेणी कुंतलैर्ललितो मनोहरः आननेन चंद्रो मुखचं
द्रो यस्याः सा ॥ लालिसेवालकानां कलंकसादृश्यात् मुखचलत्वेन चंद्रमास्य प्रतीतिः ॥
पुनः कीदृशी । तस्य कृष्णस्याधरपानरभसेन अधरस्यानोत्साहेन कृता च वस्तु निमीलनेन मा निःकृ
तांतं द्वारति सुखानुभव जनितानि ध्यायामास ॥ ५ ॥ पुनः कीदृशी । चंचलाभ्यां कुंडलाभ्यां दष्टि
तौ मर्दितौ कपोलौ यस्याः सा । हारकुंडलयोश्चांचल्यं पुरुषायितेन सकलकलायिता तनु चांच
ल्यद्भवे सेव । पुनः कीदृशी । मुखरिता शब्दायमाना क्षुद्रघंटिका यत्र तादृशी यस्य जघनस्य तस्मि ४८
सागतागतेन लोलीचंचला ॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनः कीदृशी ॥ दयितस्य कृष्णस्य विलोकितेन वीक्षणेन लज्जितहसिते लज्जाहास्ये यस्याः सा ॥ यद्वा ॥ दयितविलोकितेन लज्जिता लज्जावती हास्ययुक्ता चेत्यर्थः ॥ पुरुषायमाणया ति यातया अधःस्थितस्य कृष्णस्य दर्शनात् नूनं लज्जा हास्यं च तस्या अभूदिति भावः । लज्जितहसिते अत्र प्रथमव्याख्यानेन पुंसके भावे क्तः । द्वितीयपक्षे लज्जा धातोर्हास्यवाचकस्य हसधातोश्चाकर्मकत्वात्कर्तरि क्त मेयादि

दयितविलोकितलज्जितहसिता ॥ बहुविधकूजितरतिरसरसिता ॥ विपुलपुलकपृथुवेपथुभंगा ॥ श्वसितनिमीलितविकसदनंगा ॥ ६ ॥

नात्क्तः ॥ पुनः कीदृशी ॥ बहुविधं पिकशिखीकलहंसादीनामिव नानाप्रकारकूजितं शब्दितं यत्र यादृशो यो रतिरसः सुरतरसस्तेन रसितहृष्टा ॥ यद्वा ॥ बहुविधं नानाप्रकारं पारावतादीनां यत् कूजितं तन्नद्यत्र रतिरसे रसितं शब्दितं यस्याः सा ॥ रसितं शब्दिते हृष्टे इति कोशः ॥ ५ ॥ पुनः की

दृशी। विपुलप्रचुरोये पुलकारोमांचास्तेषां पृथुर्महान्योवे पृथुः कस्यस्तस्य भंगस्तरंगोयस्याःसा।
रोमांचकंपयारत्नरोत्तरोमत्स्योतरंगसागरस्तरंगोतुर्ये दे भंगोजय विपर्यये इतिविश्वप्रकाशः॥ पु
नः कीदृशी॥ स्वसितंसुरतायासजनितानिश्वासः निमीलितं परमानंदावाप्तिजनितेनेत्र निमी
लितं ताभ्यां विकसत्प्रकटीभवत॥ अनंगःकामोयस्यासाः॥ स्वसितेसनेनानंदावाप्तिसान्निध्यं
कथितं॥ तदुक्तं रतिरहस्ये। मुहुःस्वजघनाश्लेषसीत्कारावीतसज्जातं हुंकारोच्छ्वसितंनार्याबीजस
न्निध्यसूचकमिति॥ निमीलितेन्नयनेनवसुतिकाच्छः कथितः॥ तदुक्तं॥ तत्रैवमूर्छना। मीलनं
चाक्षणोःसुतिकालस्यलक्षणमिति॥ ॥छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥

५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनः कीदृशी ॥ श्रमजलकणभरेण सुरतायासजनितप्रस्वेदबिंदुसमूहेन सुभगं मनोहरं शरीरं यस्याः
सा । त्वरितहारोपि वक्षसि स्वेदबिंदुभिर्मुक्ताहारशोभाजननात् सुभगशरीरेति भावः ॥ पुनः की
दृशी । उरसि ह्रत्पीनवक्षसि परिपतिता । पुनः कीदृशी । रतिरणे सुरतसंग्राममध्ये धीरा पंडिता । अनेन सु
श्रमजलकणभरसुभगशरीरा । परिपतितोरसि रतिरणधीरा ७ श्रीजयदेवभणि
तहरिरमितं ॥ कलिकलुषं जनयतु परिशमितं ॥ ध्रु ॥ विरहपांडुमुरारिमुखांबुजद्यु
तिरयं तिरयन्नपि वेदनां ॥ विधुरतीव तनोति मनोभुवः सुहृदये हृदये मदनव्यथां ॥ ४७
रतांतकालः कथितः । तदुक्तं रतिरहस्ये ॥ अंगे स्वेदः श्लथत्वं च केशवस्त्रादिसंयतिः । जाते त्वाति सु
खेन नार्या विराममिच्छा च जायते इति । बंधश्चायं हंसलीलकः ॥ तदुक्तं रतिरहस्ये ॥ नारीपादद्वयं दत्वा
कांतस्योरुगतोपरि । कटिं मांदोलयेद्दोर्भ्यां बंधः किं विहंसलीलक इति । श्रमजलेशकणा यावद्र
मरः ॥ ७ ॥ श्रीजयदेवेति ॥ श्रीजयदेवभणितं कथितं यत् हरेः हरिरमितं क्रीडितं तदिते

कले; कलियुगस्य कलुषं पापं अर्थाच्छ्रोतॄणां पाठकानां च परिशमितं जयतु नष्टं करोतु ॥५॥ संप्र
तिचन्द्रो पद्यमधिकतरं व्यथयतीत्याह ॥ विरहपाण्डुरिति । अये इति विषादे । अयं दृश्यमान विधुश्चं
द्रो मम हृदयमदनव्यथां कामपीडामतिबाधिकां यथा स्यात्तथा तनोति विस्तारयति ॥ कीदृशः ॥ विर
हेण मद्विरहेण पाण्डु धूसरं यन्मुरारेः कृष्णस्य मुखाम्बुजमाननपद्मं तद्वत् द्युतिर्यस्य सः तथा च ॥ तादृशं
कृष्णमुखाम्बुजसदृशाच्चन्द्रबिम्बदर्शनेन तथाविधेकोन्मूलनं भवति येन कृतापराधमपि तमेव मनः
स्मरतीति भावः आधिं कुर्वन् । वेदनामपि ज्ञानमपि तिरयन् तिरोहितं कुर्वन् । तथा च । चन्द्रबिम्बदर्शने
न तथाविधेकोन्मूलनं भवति येन कृतापराधमपि तमेव मम मनः स्मरतीति भावः । अथाजनकत्वे हेतुग
र्भं विशेषणमाह ॥ मनोभुव इति । मनोभुव इति । मनोभुवः कामस्य सुहृत्सन्मित्रं ॥ तथा च ॥ निकट
स्थितस्यापि कृष्णस्यानुसरणे मया न कृतेति निमित्ताल्लब्धनावकाशो मम वैरी जातः स खलु तस्य
सहाय्यं चिकीर्षिता चन्द्रेण मयि व्यथा जन्यत इति भावः । चन्द्रस्य कृष्णमनोजन्यत्वेन कामस्य च म
नसिजत्वेनैव प्रसिद्धे सोदरत्वेन कामचन्द्रयोः सौहार्दं । अत एवात्र मनोभूपदेन कामस्यो ४६
पादानं ॥ तथा च श्रुतिः । चन्द्रमा मनसो जातश्चक्षोः सूर्योऽजायतेति । वेदनाज्ञानदुःखयोः ॥
अये क्रोधे विषादे च संभ्रमे मरणेपि च ॥ इति विश्वप्रकाशः । तिरोहितान्तर्हितं गच्छ इति ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वंगीतेन कस्याश्चित् विपरीतमुक्तं। अधुना कस्याश्चित् विपरीतमुक्तं स्वाधीनभर्तृकाया नायकवर्त्तृकी
क्रीडामाह। समुदिते सादि॥ गीतस्यास्य गुर्जरी रागः॥ एकताली तालः॥ गीतार्थस्तु। विजयी जयशीलो
मुरारिः कृष्णो यमुनापुलिनवने यमुनायाः सैकतेयाद्धनं तत्र रमते क्रीडते। निःशंक केलिप्रतिपादनाय

गुर्जरी रागे॥ एकतालीताले॥ समुदितवदने रमणीवदने चुंबनवलिताधरे॥ मृगमद
तिलकं लिखति सपुलकं मृगमिव रजनीकरे॥१॥ विजई मुरारिरधुना। रमते यमुनापु
लिनेवने॥ ध्रुवपद॥ घनचयरुचिरे रचयति चिकुरे तरलित तरुणानने॥ कुरुबक
कुसुमं चपलासुसमं रतिपति मृगकानने॥२॥

विजई युक्तं॥ ध्रुवपदं॥ क्रीडामवाह॥ समुदितेति। रमणीय वदने कामिनी मुखे सुपुलकं सरोमांच
यथास्यादेवं मृगमदतिलकं कस्तूरीतिलकं लिखति। कीदृशे। चुंबनाय वलितः समुखीकृत
संकोचितो अधरो यत्र तादृशे॥ कुत्र कमिव॥ रजनीकरे चंद्रे मृगमिव॥ कीदृशे। समुदितः स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म्यगुदितो मदनो यस्मात्तादृशे ॥ पूर्णचंद्रस्य कामोद्दीपकत्वादिति भावः ॥ पुनः कीदृशे चंद्रे । चुंबना
यवलितः संमुखीकृतस्तो धरो यस्मात्तादृशे । चंद्रदर्शनानंतरं चुंबनादौ प्रवृत्तेः अत्र मुखस्या
ह्लादकारित्वादिना चंद्रसाम्यं बोध्यं ॥ ॥ कल्पांतरमाह ॥ घनचये सति ॥ चिकुरे तस्याः केशपाशे कु
रबककुसुमं शोणम्लानपुष्पं अरुणझिंटीपुष्पं रचयति यथाविन्यासमर्पयतीत्यर्थः ॥ कीदृशे चि
कुरे ॥ घनचये घनो मेघसमूहवद्रुचिरे मनोहरे ॥ पुनः कीदृशे । तरलितानि स्वावलोकनयचंचली
कृतानि तरुणानां यूनां मानसानि येन तादृशे ॥ कीदृशं कुसुमं ॥ चपलायाइव रक्तविद्युत इव
सुषुमा अतिशयितो शोभा यस्य तादृशं ॥ युद्धा ॥ चपलावत् सुषुमं चारु अत्र विरहतापशमक
तया चलोदितविद्युत्साम्यं । चिकुरः कुंतलो वालः कचः केशः शिरोरुहः इत्यमरः । स्मृतः कुरक
कः शोणम्लानझिंटीप्रभेदयोरिति विश्वप्रकाशः ॥ कुसुमं पुष्पफलयोरित्यपि च ॥ चपला
कपिला विद्युतश्चलीपिप्पलीषु चेत्यपि । सुषुमं चारु समयोः सुषुमा परमा द्युतावितिच ॥ ४ ॥ ४८

कल्मांतरमाह॥ घटयतीत्यादि।कुचयुगगगनमिवव्यक्ततात्॥ तत्र अमलं निर्मलं मणिसरं मुक्ताहारं तदेव तारकपटलं तारकासमूहं घटयति योजयति। कीदृशे कुचयुगगगने॥ सुष्ठु अतिशयेन घने विरलत्वो यत्र तादृशे। पुनः कीदृशे। मृगमदस्य कस्तूर्या रुच्या दीप्त्या रूषिते व्याप्ते।पुनः कीदृशे। नखपदं नखाङ्केन शशीति नभूषिते ऽलंकृते।नखक्षतं चेदं मेघंदुसंक्रमिते समासात्॥

घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते मणिसरममलं तारकपटलं नखपदशशिभूषिते॥३॥ जितबिसशकले मृदुभुजयुगले करतलनलिनीदले॥ मरकतवलयं मधुकरनिचयं वितरति हिमशीतले॥४॥

कृष्णा नितंबस्तनपार्श्वकंठे दत्तव्यमेव करजेस्सदैवेति। अत एव नृशनिका पदमर्द्धचंद्रपदं बोध्यं इणा चंद्रस्य तत्सादृश्याभावात्॥ अत्र कुचयुगस्य निरंतरोणिलालकस्तूरीकापाशामलतान्यया कसमं चंद्रकलाघगमनं तेन रूपणं॥ गगनस्यापि कविसंप्रदाये श्यामत्वेनैव प्रसिद्धः। अत एव सुघनत्वत्यादिभिस्त्रिभिर्विशेषणैः गगनत्वरूपणं पथिकविशेषणं पादानां सांगमेव तद्रूपकं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घनः सांद्र दृढे दार्ढ्ये। विस्तारे विस्तता हृ मुद्गर इति विश्वप्रकाशः॥ गुणित रूषिते इत्यमरः॥ एतद्व्याख्यान
समये क्षीरस्वामिनाउक्तं। रूषितो किरणोघ्याप्तः सर्वः॥ तथांतगिरि रेणु भूषित इति नक्षत्रे चाक्षिमध्येच
तारकेता तारकापि चेति हंविनत शाश्वतः॥ ग्गा किं विम्रुभुजयुगले। तस्याः कोमलबाहुयुगे मरकतव
लयं इंद्रनील मणिकंकणं तमेव मधुकर निचयं भ्रमर समूहं वितरति अर्पइति कीदृशो भुजयुगळे जितं
निजमार्दवेन शैत्येन च अभि मूलबिस शकलं मृणाल खंड येन तादृशो। पुनः कीदृशे॥ करतलमेव
नलिनीदळं पद्मपत्रं यत्र तादृशे॥ यद्वा॥ करतलमेव नलिनीदलं पत्रं यत्र तादृशे॥ पुनः कीदृशे। हि
मवत् शीतले। अत्र यद्यपि करतलस्य कविसंप्रदाये कापि पद्मिनी पत्रत्वेन वर्णनं नास्ति तथापि
भुजस्य बिशशकलरूपणोपपत्तये तलस्य पद्मिनी पत्रत्व रूपणं न विरुद्धमिति॥ अत्र द्वितीय व्या
ख्याने मरकत वलयस्य भ्रमरसमूहत्वेन रूपणं करस्य पद्मत्व रूपणं मासेपल भ्यमिसेकदेश विवर्ति
तद्रूपकं॥ तदुक्तं काव्यप्रकाशे॥ श्रौता आर्थाश्रितेयस्मिन्नेकदेश विवर्तितत्॥ अस्या अर्थः॥ केव
नपदार्थाः श्रोताः श्रुतितः ज्ञाताः सा सातुशब्दपाठनाः केवनअर्थस्तदन्यथानुपपत्ति गम्याय ४८
च रूपके तदेकदेश विवर्तीति। नलिनी पद्मिनी पद्मव्योमसिंधुसरोवरे इति विश्वप्रकाशः॥ मरकतो
नीलमणिरिति कोशः॥

किंवरते: शृंगाररसस्य गेहे जघने मणिमय रसनं मुक्तामयीं मेखलां किंकिरति क्षिपति ॥ अत्र किरीटी
यनेन कांचीबंधनसमये श्रोणीस्पर्शजनितसाध्वसावशात्कंपमानकर: क्षिपति बध्नातीति ध्वनितं । कीदृशे ।
विपुलापघने विपुलो विस्तीर्णो ऽपघनो अवयवो यस्य तादृशे । अतिमांसल इत्यर्थः ॥ पुनः कीदृशे । मन
सिजकनकासने मनसिजस्य कामस्य कनकनिर्मितासिंहासनइवविस्तीर्णतादिति गौरत्वाच्च जघ

रतिगृह जघने विपुलापघने मनसिजकनकासने ॥ मणिमयरसनं तो
रणाहसनं विकिरति क्षत्तवासने ॥५॥

नस्य कनकासनसाम्यं ॥ अत्र जघनस्य कनकासनत्वरूपणमनुपपद्यमानं मनसिजस्य महाराजत्व
पाक्षिपती सेवदेशविवर्त्तादं तु रूपकमिति । कीदृशं मणिमयरशनं । तोरणस्य मांगल्यस्रजो हसनमुपहा
सोयस्मात्तादृशं ॥ अन्योपि सदासिंहासन उपविशति तदा तत्रपरिजनैः वंदनमालिका बध्यते तन्तो
मनसिज सिंहासनीभूते तस्य जघने क्षुद्रघंटिकारूपमांगल्यस्रजमयं बध्नातीति भावः ॥ पुनः कीदृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शेजघने ॥ कृतं वासनं वस्त्रम मः सापि कांचीव भाति कृष्णेतिलज्ञया नापि कया कृतं साटकादि रूपं वस्त्रं यत्रे
सर्थः ॥ यद्वा ॥ कृतं वासनं श्रीकृष्णवशीकरणाय धूपविशेषो यत्र तादृशे ॥ अत एव वतया वसीकृतः सन्
मामव धूपतया सह रमत इति भावः ॥ धूपविशेषश्च देहे नायकवशीकरणायकर्तव्य काम शास्त्रे
क्तं ॥ तदुक्तं रतिरहस्ये ॥ युवती मलयो सूक्ष्मैलासर्ज कुष्टसिद्धार्थैः । सर्वांगोनो धूपः सद्य ग नानांव
शीकरणं इति ॥ यद्वा ॥ कृतातात्कापि तिदर्शनात् कृष्णेन वासनाभोगेछा यत्र तादृशे ॥ यद्वा कृ
तं वासनं अर्थात् । कामिन स्थानं यत्र तादृशे । यद्यपि मनसिज प्रकासन इत्यनेनैव कामस्थानत्वं
प्राप्तं तथापि निसं तासां निध्य सूचनाय तदुक्तं ॥ अंगे प्रतीको वयवो जघनो कथ कल्ठवरद्व्यमरः
सिंहासनं तु ते द्वे ममि मपि । रसनं स्वादने घ्राने रसनं कांचि जिह्वयोरिति विश्वः ॥ मांगल्यस्त्र क्षोर
णाद्य भवेद्वन मालिवे तिहीर स्वामिलिखित ॥ कोषवसनं वसने वाथ स्थाने माने च धूप
नेइति विश्वः ॥५॥

४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच सावरणे किसलये चरणे एव किशलयमानाग्रहा कोमलत्वाच्च तत्र पावकभरणं जनयति ॥ कीदृशे कम
लायाः श्रियो निलये आश्रये । पुनः कीदृशे ॥ नखा एव ये मणिगणा मपि समूहा स्तैः पूजिते ऽलंकृते ॥ कीदृशं
यावकभरणं । बहिरपवरणं बहिर्भूतं द्वारीभूतमपवरणं यस्य तादृशं सार्द्रमित्यर्थः ॥ पुनः कीदृशे । हृदि स्वहृदये
योजिते तु रागातिशयात्स्थापिते । स्वहृदये तव चरणकिशलयं कृत्वा यावकं रचयतीत्यर्थः ॥ यद्वा । हृदि इत्यस्यैव

चरणकिशलये कमलानिलये नखमणिगणपूजिते बहिरपवरणं यावकभरणं जनयति हृदि
योजिते ॥ ६ ॥ दमयति सुभृशं कामपि सुदृशं खलहलधरसोदरे ॥ विमम फलमवसं विधिमिह वि(र)
सं वद सखि विटपोदरे ॥ ७ ॥ इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके ॥ कलियुगचरि
तं न वसतु दुरितं कविनृपजयदेवके ॥ ८ ॥

विशेषणं ॥ कीदृशे ॥ हृदि कमलायां लक्ष्म्या निलये आश्रये लक्ष्म्या कृष्णवक्षस्येव सर्वदा स्थितेः । पुनः कीदृ
शे नखा एव मणिगणा स्तैर्भूषिते ॥ लक्ष्म्याश्रयि गृहे तदीयं चरणकिशलयं ददातीति तस्याः सौभाग्याति
शयो ध्वनितः ॥ अत्र चरणकिशलये नखमणिगणपूजिते इत्यत्र रूपमानयोः किशलयत्व मणिग
णत्वयोः किशलयत्वमणिगणत्वयोः परस्परमयोगादसंयुक्तं । नाम रूपकं । तदुक्तं दंडिना । इदं मंदस्थितं ज्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्ना स्निग्धनेत्रे सलं मुख । इति ज्ञो स्नो मलायोगाद युक्तं नाम रूपकमिति । कमला स्त्रियोऽरिति विश्वः ॥
ला स्याल्लर स्याज्जानुकीबे यावल्ले कैडुमाल्ययुक्समर ॥६॥ रमयती त्यादि ॥ एवं स्वयमेव तत्तदा स्मरणं विधायप॥
मपि सहर्षा शो भनेद्दशाने त्रेय स्याली सखेऽर्जुनो याह ले धरसोदरो हे धरो ग्राम्यं स्त्रलोदरो ऽ अयमपि तथैव भविष्य
तीति मल भद्रस्त स्यसोदरो आनां छुल स्तस्मिन्नु भृशमतिशयेन रमयति सति हे सखि वद कथय रहविटपोद्र
कुंजमध्ये विरसं रसयन्त्यं यथास्वाद्दवं अत एवापत्यं यथास्यादेवं विहर बहुकालं व्याप्य किं किं निमित्त वसस्थि
तास्मीत्यर्थः ॥ अत्र हल धरत्वेन हल स्यापादान हल धरो ग्राम्यं स्तसोदरो ऽ अयमपि तथैव भविष्यतीति तस्य मां
विहाय याकयाविज्ञापिकया सह केलिकरणं मुचितमेवेति सख्वनामं ॥ विटपः पल्लवे शृंगे विस्तारे स्तम्भ शाख
योरिति विश्वप्रकाशः । अवसामिति वसनिवावसनिवास इसस्य धातोहीस्तन्यु त्तमपुरुषैक वचने प्रयोगः ॥
स्वाधीन भर्तृका वेयं नायिका ॥ तदुक्तं शृंगार तिलके ॥ यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुंचति । विचित्र वि
भ्रमाशक्ता स्वाधीन भर्तृका यथेति ॥७॥ इहेत्यादि ॥ इह एतत्काव्यं कर्त्तरि कवि नृपमयदेवके कवीनां नृ
पेईश्वरे जयदेवके । कलियुगे चरित मायरितं कतंद्धरि तं नवस तु नति छ तु ॥ कीदृशो ॥ रसस्य छल विष
य शृंगार रस स्य भणनं कथनं यस्य ताद्दशो । अत एव क्षातं हरि गुणानबंधे येन ताद्दशः । तत्र हेतुमाह । म ५०
धुरिपोः छल स्य पदसेवके ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वमन्यस्याः कस्याश्चित् वल्लभेन सह केलिं मुखेश्यसख्याः अग्रे वर्णितवती संप्रति दूतीमुखवल्लभेनापमुक्तां शंकमान
चेतस्या दूती प्रत्याह ॥ नायातः इत्यादिना ॥ हे सखि दूती दूत्यकर्मकुशले सनिर्दयो दयारहितः तएव सदः हतमूढमद
पराधे यदि नायातस्तदापि दूयसे किमिति दुःखिता भवसि । ननु शठो न भवति किं तु ष्टः स्वच्छंदमेव रमते ॥ अ
तो दूयइसत आह । स्वच्छंदा मिति । सकलो बहुवल्लभः नेकनायकप्रियो तएव स्वच्छंदं निःशंकं रमते यस्मात्क
याचिद्वापिकया सह केलिं करोति । तत्रार्थे तेतव दूषणं अपि वा अयं पश्यति प्रियस्य वल्लभस्य संगमाय मिल

नायातः सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे स्वच्छंदं बहुवल्लभः स रमतां किं तत्र ते दूषणं ॥ पश्या
द्य प्रियसंगमाय दयितस्याकृष्यमाणं गुणैः रुत्कंठार्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति ॥ ७४ ॥

नाय इदं मम चेतोंतःकरणं यास्यति गमिष्यति । कीदृशं दयितस्य गुणैः सौंदर्यादिभिराकृष्यमाणं वलात्कारे
णनीयमानं । अपरमपि गुणैरज्जुभिराकृष्यमाणमन्यत्रानीयत इति ध्वनिः ॥ कीदृशं चेतः । उत्कंठार्ति
भरादिव स्फुटत् उत्कंठा औत्सुक्यं आर्तिः पीडा तयोर्यो नरोतिशय तस्मादिव वहिर्भवत् ॥ अपरमपि न
पिरस्तंतरं कुंभस्थाने स्थितं वस्तु सा कर्यांद्वहिर्भवतीति ध्वनिः । तया वातः पं विरहदुःखं सोढं मया क
यातद्गुणानेव स्मरस्या प्राण एव सा आत्तेतोते यामति सागतिरिति स्वयमेव चेतस्तत्र यास्यतीति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किमतः परं तव तत्र गतागतायासेनेति भावः ॥ अथ च वक्तुर्विशेषणाद्दृष्टमिति विशेषणात् । शठादियपदाद्ध
न्योयमर्थः ॥ हे दूती यदि स मया तस्यादरेण किं दूष्यसे तदनागमेन मे मैव पतये युज्यते । ननु न च । हंत तत्संभोगे
कृतार्थ्यापास्रवीरपि लोकं गमाह ॥ समीचीनं न सख्यमाविष्कृतमिति भावः ॥ यदि च निर्दयः कृतोपमर्दन गाढा
लिंगनादिनीत ज्ञात्रपीडन दयारहितस्तदापि त्वं किं दूष्यसे नाय तस्य पत्नादृशं त्वया राहित्यं नायिकायाभाग्येन ल
भ्यत इति भावः ॥ यदि च शठस्तदपि त्वं किं दूष्यसे शठत्वे नैव मद्वचनं कृतवानाते न त्वमुपभुक्ते तवैष्टतेवेति भावः ।
यदि बहुवल्लभः स्वच्छंदं रमते तदापि किं ते दूषणं किंचित्प्रियं च कीषु वल्लभासु मध्ये मं प्रति त्व मप्येका जाते
ति भावः । पक्षेयोधेत्यादि तथा च सवादृशीमुपभोगामात्रमुद्दिश्यमिति तस्य बहुवल्लभत्वेपि न हानि । मन्नत
प्रथमानुरागसमयप्रभार भ्यप्रिये नान्या मम स्यापि स्वप्नेपि तदन्यो नेच्छाविषयोभूदधुना तु विधिव
शाद्वैपरीत्ये प्राणान्नैव संरक्ष्यामीति भावः ॥ अत्र प्रथमपदे शठो नायक उक्तः ॥ स्वच्छंदमित्यादिनाछ
ष्टस्तद्भयलक्षणं रसार्णवसुधाकरे । अनुकूल एकजानिः शठो गूढापराधकृत् । धृष्टो व्यक्तानु
युवतिस्तो गलज्जस्यापि निर्भय इति ॥ ५८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुप्रतिकूलेन सह रममाणाया: सौभाग्यसुखं तद्विरहिताया(श्च) संतापमष्टपद्या कथयति । अनिलेत्यादि ॥
गीतस्यास्य देशाखरागः । तालश्च रूपकः ॥ गीतार्थस्तु । हे सखि या वनमालिना छलेन रमिता क्रीडिता ॥ ध्रुपदम्
किसलयशयनेन नवपल्लवशय्यया न तपति नोपतप्ता भवति ॥ छद्मागसंगेन सुखमेव भवतीति भावः ।
कीदृशेन वनमालिना ॥ अनिलेन वायुना तरले अनिलेबद्धातरले चंचले ये कुवलये तद्वन्नयने यस्य तेन ।

देशाखरागे ॥ रूपकताले ॥ अनिलतरलकुवलयनयनेन ॥ तपति न सा किसलयशयनेन ॥१॥
रखि या रमिता वनमालिना ॥ ध्रुवपदम् ॥ विकसितसरसिजललितमुखेन स्फुटति न सा मनसि
जविशिखेन ॥२॥ अमृतमधुरमृदुतरवचनेन । ज्वलति न सा मलयजपवनेन ॥३॥

नायकासन्निधौ साध्वसवशात्त्वं वल्लभेत्रे सर्थः । अथवा या रमिते सत्र न अश्लेषस्तथा च या वनमालिना
रमिता सा किसलयशयनेन न तपतीति न अपितु तपत्येव नह्ययेन प्रकृतस्थेवार्थस्य प्राप्तेः ॥ यद्वा ॥ किसल
यशयनेनेति तृतीयैव नत्विशिष्टानिलेन ॥ तथा वाक्यमर्थः ॥ या वनमालिना अरमिता सा किसलय
शयनेन तपति अपितु तपत्येवेति ध्वा वल्लभेति । अनिलो वसुवातयोरिति विश्वप्रकाशः ॥१॥ अथ च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥या वनवें मालिना स रमिता सा मनसिज विशिखेन कामबाणेन न स्फुटयति न द्विधा भवति ॥ कीदृशेन
वनमालिना ॥ विकसितं पुष्पितं यत् सरसिजपद्मं तद्वल्ललितं मनोहरं मुखं ॥ यस्य तेन मुखस्य हास्यवत्त्वेन वि
कासितपद्मसाम्यं बोध्यं ॥ अथवा ॥ या विकसितसरसिजललितमुखेन वनमालिना रमिता सा मनसि
जविशिखेन न स्फुटति ॥ अपितु स्फुटत्येवेति पूर्ववत् ॥ ४ ॥ अथवा ॥ या वनमालिना रमिता सा मलयजप
वनजातेन पवनेन वातेन न ज्वलति न दीप्यते ॥ कीदृशेन वनमालिना ॥ अमृतादपि मधुरं मृदुतर
मतिशयेन कोमलं वचनं यस्य तेन अमृतेनाघूर्णितविशेषणोभय यासाः ॥ अमृतसेकेन न कज्वल
नाभावस्योचितत्वात् अथवा ॥ अमृतमधुतर मृदुवचनेन वनमालिना या रमिता सा मलयजपव
नेन ज्वलति अपितु ज्वलत्येवेति ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं च यावनमालिना रमिता सा हिमकरस्य चंद्रस्य किरणेन लुठति न पृथिव्यामितस्ततः परिवर्तिता भवति। कीदृशेन वनमालिना ॥ स्थलोद्भवं जलरुहं कमलं तद्वद्रुचिर्यया स्तादृशो करो वर्णो यस्य तेन ॥४॥ अथ च ॥ यावनमालिना रमिता सा विरहाधिक्येन हृदि हृदयेन दलति न दीर्यते ॥ कीदृशेन वनमालिना सजललोज्वलसहितो यो जलदो मेघस्तत्समुदयवद्रुचिरेण मनोहरेण ॥ अथ च यावनमालिना रमिता सा वि

स्थलजलरुहरुचिकरचरणेन ॥ लुठति न सा हिमकरकिरणेन ॥४॥ सजलजलदसमुदयरुचिरेण ॥ दलति न सा हृदि विरहभरेण ॥५॥ कनकनिषकरुचिशुचिवसनेन ६ सकलभुवनजनवरतरुणेन ॥ वहति न सा रुजमतिकरुणेन ॥ श्रीजयदेवभणितमिल्लनेन न
प्रविशतु हरिमपि हृदयमनेन ॥७॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ छ॥

रहभरेण हृदि न दलति अपि तु दलसेवे सर्थः ॥५॥ यावनमालिना रमिता सा परिजनानां हसनेन रस्य मलज्ञारोदिनी स्यादि परिजनहास्येन ॥ यद्वा ॥ परितः सर्वतो जनानां हास्येन न स्वसिति निःसंतापनिःश्वासं सजति ॥ कीदृशेन वनमालिना ॥ कनकनिषकः सुवर्णकषपट्टिका तस्येव रुचिर्दीप्तिर्यस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतादृशं शुच्युपहतं वसनं वस्त्रं यस्य तेन ॥ अत्र कनकपदेनैव पीतत्वे प्राप्तेपि निगधत्व प्राप्तये निकष
कपदोपादानं ॥ अथ यावनमालिना रमिता सा परिजनहसनेन न नश्वसिति । अपितु श्वसित्येवेत्यर्थः
निकषः कषपट्टकेति हारावली ॥ शुचिः शुद्धेऽनुपहते इति विश्वप्रकाशः ॥ ६ ॥ स्थलजलरुहरुचिकर
चरणेन ॥ लुठति न सा हिमकरकिरणेन ॥ २ ॥ यावनमालिना रमिता साऽतिकरुणेन । अतिशयित
करुणरसेनोपलक्षिता सती रुजं तद्विश्लेषेण जन्यां व्याध्यवस्थां न वहति न धारयति ॥ कीदृशेन वनमालिना ॥ सकलभुवने समस्तलोके ये जनास्तेभ्योपि वरतरेण श्रेष्ठतरेण ॥ अथवा ॥ यावन
मालिना रमिता सा अतिकरुणेनोपलक्षिता रुजं न वहति अपितु वहत्येवेत्यर्थः ॥ अस्मिन्पक्षे
अतिकरुणेनेति कृष्णस्यैव नाविशेषणं तदा । अतिक्रांता करुणा दया ॥ यस्य तादृशेन निर्दयेनेत्यर्थः
करुणरसे पक्षे रूपायां करुणा मतेति ॥ ७ ॥ श्रीजयदेवेत्यादि । अनेन श्रीजयदेवभणितमिलि
तेन श्रीजयदेवेन वनिना वर्णितं भणितं यन्मिलितं कृष्णस्य कामिन्या सह सर्वस्वम् । तेन हरि
रपि कृष्णोपि हृदयमर्थात्प्रार्तरणां गाढं प्रविशति । यद्वा ॥ श्रीजयदेवभणितस्य यन्मिल ५७
नं संबंधस्तस्मिन् यन्न गानरूपं स्तेन हरिरपि हृदयं प्रविशतीत्यर्थः ॥ ८ ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संप्रति अनिलमेव संतापपदं मत्वा पालभते ।मनोभवेत्यादि ।हे चंदनानिल चंदनसंबंधिवायो मेम म प्रसीद प्रसादं कुरु ॥हे दक्षिण सर्वेषां विलासिनामनुकूलस्व भावमेवमतां प्रतिकूलतां मुंच ॥अत्र चंदनसंसर्गिणस्तेसत्संगगुणेः तस्य वामत्वं नोचितमिति चंदनानिल दक्षिणपादाभ्यां ध्वनितं॥ वामत्वे हेतुगर्भविशेषणमाह॥ मनोभवेति ।मनोभव काम मानंदयसीति मनोभवानंदन ॥तथा स्व च

मनोभवानंद चंदनानिलं प्रसीद मे दक्षिणमुंच वामतां क्षणं जगत्प्राण निधाय माधवं पुरो मम प्राणहरो भविष्यसि ४५ रिपुरिव सखीसंवासोयं शिखीव हिमानिलो विषमिव सुधारश्मि यस्मिन्नु दुनोति मनोगते ४६ हृदयमदये तस्मिन्नेवं पुनर्वलते बलात्कुवलयदृशां वामः कामो निकृंतकुशाः॥४६॥

मम वैरी कामस्तं यदानंदयसि तदेव मम हंति कृष्ण मा वर्त्तसीति भावः ।यदि त्वं वामतां न मुंचसि तदा माधवं कृष्णं क्षणं मम पुरो निधाय कृत्वा पश्चात् दर्शनि कृतार्थयाम प्राणहरः प्राणानां हर्त्ता भविष्यसि ।यथा विरहिणां व्यथयसि तथा मया विरहित तेमपि संतापय मनमदतिकं सञ्जायातीति भावः ॥कीदृशः ।जगत्प्राण जगतां प्राणभूत ।अनेन कृत्स्यानमनेन प्राणहरणस्य वायोः सामर्थ्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नितं ॥ यद्वा ॥ चंदनानिललक्ष्मणं वा मृतां मुंच माधवं पुरो निधाय पश्चान्माम प्राणहरो भविष्यती
त्यन्वयः ॥ शेषं पूर्ववत् ॥ वामे सव्ये प्रतीपे च द्रविणे वा ॥ निसुंदरे ॥ इति विश्वप्रकाशः ॥ दक्षिणः शरला
वामपरच्छेदानुवर्त्तिष्विति च ॥ ५ ॥ अधुना मम नायमपराधो नान्यस्येत्याह ॥ रिपुरिवेति ॥ यस्मिन् हृष्ट
मनोगाने सति स्मृते सति अयं सखीसंवाहः सखीभिः सह अवस्थानं रिपुरिव शत्रुरिव दुनोति उपतापय
ति सखीर्दृष्ट्वा न ऌमालंकारः खेनापि हासवासभवनपरिकारादिस्मरणेनानाधिकतर उपतापो
भवतीति भावः ॥ अयं हि मानिलो हि मृगनाभ्यो पि निलो नाभ्युः शिखीव अग्निरिव दुनोति ॥ अयं सुधा
रश्मिश्चंद्रो विषमिव दुनोति ॥ तस्मिन्नेव हृष्टे अदयदया रहिते हृदयं पुनर्भूयोपि बलात् हठा
द्बलेन निवार्यमानमपि तत्रैव गच्छतीत्यर्थः ॥ अतः कुवलयसदृशा कमलनयनां कामानिकाम
इत्यर्थं निरंकुशत्यक्तमर्याद अत एव वामः प्रतिकूलः ॥ अन्योन्यानुरागो हि कामो मनोहरो
भवति ॥ अत्र तु समयनीयगण्याः केवलं ममैव चेतस्तत्र धावतीति वामता कामस्येति भावः ॥ अ
त्र सखी नारिपुवत् ॥ हिमानिलस्य वह्निवत् सुधारश्मेर्विषवत् उपतापकत्वं विरुद्धमिति विरोधा ५४
लंकारः ॥ शिखि नो वह्नि वर्हिणौ इति विश्वप्रकाशः ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संप्रतिविरहदुःखमेवमसहमाना मलयानिलादीन्प्रार्थयति ॥ बाधामित्यादि ॥ हे मलया
निल हे मलयसंबंधिवायो बाधां पीडां विधेहि कुरु ॥ अत्र मलयचंदनाश्रयत्वेन मृदुत्वश्रेयोऽ
तस्त्वदाश्रितस्य ते याचकप्रत्याख्यानेनोचितमिति सूचनाय मलयानिलोपदानं ॥ हे पंचबा
ण मम प्राणान्गृहाण पंचभिर्बाणैः पंचानामपि प्राणानां कामस्योचितमिति सूचनाय पंच

बाधां विधेहि मलयानिल पंचबाण प्राणान्गृहाण न गृहं पुनराश्रयिष्ये ॥ किं ते कृ
तांतभगिनि क्षमया तरंगैरंगानि सिंच मम शाम्यतु देहदाहः ॥ ४७ ॥ ॥ इति श्री
गीतगोविंदे विप्रलब्धावर्णने नागरनारायणो नाम सप्तमः सर्गः ॥ ७ ॥ ॥ ७ ॥ ७ ॥

बाणपदोपादानं ॥ ननु कृष्णेन यदुपेक्षितासि तदा गृहमेव किमिति न गच्छसीत्यत आह ॥ न गृह
मिति ॥ न गृहं पुनराश्रयिष्ये तेन विना गृहमपि संतापजनकमेव भविष्यतीति इत्यभावः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।हे कृतांत। भगिनि ते क्षमया सहिष्णुतया किं किं प्रयोजनमिति सर्वथः॥ ॥तरंगै रूर्म्मिभि मम अंगानि
सिंच। आप्लावय॥ देहदाहो विरहानिलजन्यो देहदाहः शाम्यतु निवर्ततां कृतांतो निर्दय त्वद्भ
गिन्या स्वेपि दयानयुक्तोपीति ख्यापनाय। कृतांते कथा भगिनी त्वसेत्यमरः॥ कामबाणाः संमोह
नशोषनश्च दहनः शोषणस्तथा॥ उन्मादनश्च कामस्य बाणाः पंच प्रकीर्त्तिता इति॥ ९७॥
अंतस्तमांसि नुदती नितरां मनस्वल्म स्नेहानुवर्त्ति रतिनर्म्म विभावयंती॥ गूढात्म दार्थनिचया
न्न स्फुटतां नयंती दीपप्रभोवरुचिरा रसमंजरीयं॥७॥ ॥इति श्रीमहामहोपाध्याय श्रीशंकर
मिश्रविरचितायां श्रीशालिनाथकारितायां गीतगोविंदटीकायां रसमंजरीनामधेयायां स
प्तमः सर्गः॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यथेत्यादि ॥ अथ अर्थानंतरं सा राधा प्रभाते प्रातः प्रियं कृष्णं साभ्यसूयं सासूयं अभ्यसूया सहितं यथा स्यात्तथैव माह एवमुक्तवती किं कृत्वा ॥ यामिनीं रात्रिं कथमपि कष्टसृष्ट्या विनीय नीत्वा ॥ अत्र यामिनीपदेन प्रियविरहे अतिदीर्घयामवत्त्वं ध्वनितं दुःखवती कृत्येति विवरः ॥ कीदृशी ॥ स्मरशरजर्जरितापि ॥ कामबाण पीडितापि ॥ अन्यनायिकानखांकादिदर्शनजनितमहादुःखाविस्मृतविरहदुःखाउवान्वेसर्थः ॥

अथ कथ यामिनीं विनीय स्मरशरजर्जरितापि सा प्रभाते अनुनयवचनं वदंतमग्रे प्रणामतिप्रियमाह साभ्यसूयं ॥ ८७ ॥ ॥ भैरवीरागः ॥ ॥ रूपकतालः ॥ हरिहरियाहि केशव याहि माधव मावद कैतववादं ॥ तामनुसर सरसीरुहलोचन या तव हरति विषादं ॥ ध्रुवपदं ॥

कीदृशं प्रियं ॥ अनुनयाय स्वापराधजनितकोपशांतये विनयं ज्ञातं तज्ज्ञाते भूयो न दृशमाचरामीत्यादि विनययुक्तवाक्यं वदंतं । पुनः कीदृशं । प्रणतमपि नम्रमपि । रजनी यामिनी तमिस्रमरः ॥ ८८ ॥ तदेव गीतेन कथयति ॥ रजनीत्यादि ॥ गीतस्यास्य भैरवीरागः ॥ रूपकतालः ॥ गीतार्थस्तु ॥ ॥ हरिहरीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खेदे॥ हे माधव हे केशव या हि इतो प्रसराल्लक्ष्मीर्यं बला स्तडू तु रत्ते पि ताद्दृशी षेवानुरागा युज्यते
स्थिरानुरागानां मादृशीं ते किं प्रयोजनमिति माधवपदेन ध्वनितं॥ केतवं वादं छलं वा कथं मा
कृदमांक थयननु तदनुसरणा ये वेत स्तता भ्रमनो मे बिंबं बीजा तद्दस्तत आह॥ तामिति। हे सर
सीरुह लोचन लक कमलदल नयनां तां नायिकामनुसर अनुगच्छ यान तव विषादं दुःखं हरति॥ अहं
तु स्वयमेव संतमा ते विषादं कथमपनेष्यामी तीति भावः॥ अत्र पद्मं प्रभाते यथा हो ह्युध मई
मुकुलितं भवति तद्वत्ते नयनं रात्रिजागर — स्यान्मुकुलं भवद्धलांत या प्रसार्यमानमस्तीत्य
निद्रवशात् यहिं वि खबलसीति सरसीरुहलोचने सनेन ध्वनितं॥ यद्वा॥ सरसीरुहं यथा रा
त्रौ मुकुलितं तिष्टति प्रभाते प्रसरति। तथा तदीय नयनं रात्रौ मद्विषये निमीलितमासी दिदानीं
त्वया प्रसारितमिति तेन पदेन ध्वनितं। कैतवं तुच्छके छूतइति विश्वप्रकाशः॥ इदं ध्रुवपदं॥ ५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुनममत्वत्तोन्याप्रेयसी अत आह ॥रजनीत्यादि ॥हेहरे तवनयनंनेत्रंतदनुरागमिववहति
धारयति ॥कीदृशंनयनं ।रजनिजनितो रात्रिजनितोगुरुर्महान्योजागरस्तज्जनितो योरागोरक्तता तेद्
वद्रागोरंजनद्रव्यंतेनकषायितमीषल्लोहितं ।ततएवालससंनिवेशं ॥अलसोमंथरोनिमेषःपक्ष्म
विन्यासोयस्यतादृशम् ॥अन्योपियःकिंविद्धस्तस्य हृतिसोप्यलसोभवतीतिध्वनिः ।अतएवस्फुटं

रजनिजनितगुरुजागररागकषायितमलसनिवेशं ।वहतिनयनमनुरागमिवस्फुटमु
दितरसाभिनिवेशं ॥१॥ कज्जलमलिनविलोचनचुंबनविरचितनीलिमरूपं ॥दशन
वसनमरुणंतवकृष्णतनोतितनोरनुरूपं ॥२॥

यथास्यादेवंउद्दितः कथितोरसस्यान्यकामिनीविषयकशृंगाररसस्याभिनिवेशस्तत्परतायेनतादृ
शं ॥अत्रवराधाकेलिसाक्षिणामेकृष्णेनयस्याः कस्याश्चिद्गोपिकायाः वेणीविन्यासंगेनवृथाजागरः
कारितइतिरागेनक्रोधेनकषायितस्यनयनस्यराधाया अन्यनायकागुप्तरसाभिनिवेशप्रका

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

शानमुचितमेवेतिध्वनिः॥ गुरुर्महत्तिवान्यावदितिविश्वः॥ रागोनुरक्तौमात्सर्येक्लेशादौ लोहितादिषु
गांधाराद्यौरूपेरागइतिविश्वः॥ कषायोरसभेदस्याःदंगरागविलेपने॥ निर्यासेचकषायेथसुरभौलो
हितोदिषुगांधारादौ न्यग्वदितिवान्यवेषः॥ शिबिरोद्दाहविन्यासेतुप्रकाशाकशितइत्यपिहरिहरेति
ननुतदन्यवेषणार्थपर्यटनजनितश्रमजनितगाराराग्नोनत्रयो लोहितमितस्य दुःखशाकवृये सत
आह॥ कज्जलेत्यादि॥ हेकृष्णअरुणामपितवदर्शनवसनमधरस्तवतनोःशरीरस्यअनुरूपेयोग्यं
रूपकांतिं तनोतिविस्तारयति॥ तनुरपिवेश्यामाश्रघेपाधुत्तातेश्यामइतिभावः॥ कीदृशी॥ कज्ज
लेमांजनीभूतेनमलिनेयेविलोचनेनेत्रेतयोश्चुंबनंनविरमितंनीलिमानीलत्वंयत्रतादृशी॥ त
थाचुंबनसमयेलग्नतन्नेत्रांजनेनश्यामीभूतस्त्वदधरएवस्फुटत्वंधूर्ततांप्रकटयतीतिभा
वः॥ नेत्रयोरपिचुंबनमुक्तंकामशास्त्रे॥ गंडेनेत्रेललाटेचचुंबनंपरिकीर्तितमिति॥ ओ
ष्ठाधरौतुवदनछेदौरदनवाससीसमरः॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच भवदधरगतं दशनपदं तवाधरस्थितं कस्याश्चिदंतःक्षतं मम चेतसि खेदं दुःखं जनयति ॥ एतत
त्ववपुरधुना मयापि सह कथमभेदं कथयति अन्यशरीरे तस्यान्यत्र यथाजनकत्वं संभवात् पुंषो भेदो
ज्ञायत इति भावः ॥ अधुनाप्ययं तं भेदं तव वपुरभेदो नोचित इति काव्यं व्यते। प्रसिद्धाभेदकारणनिषेधो भेद
कारणस्य विभाव्यमानत्वाद्विभावनालंकारस्तदुक्तं दंडिना। प्रसिद्धहेतुव्यावृत्त्या यत्किंचित्कारणांत

दशनपदं भवदधरगतं मम जनयति चेतसि खेदं ॥ कथयति कथमधुनापि मया सह तव
वपुरेतदभेदं ॥५॥ बहिरिव मलिनतरं तव कृष्ण मनोपि भविष्यति नूनं ॥ कथमथ वंचयसे जनमनुगतं मसमशरज्वरदूनं ॥ ६ ॥

रं। यत्र स्याभाविकत्वं वा विभाव्यं सा विभावनेति ॥५॥ ननु तवोपायनार्थकमस्त्रं कादयति मयि
पुष्पकोशादपताम्रमरेण ममाधरोदृष्टेन तु दशनक्षतमिदमित्यत आह। बहिरित्यादि। हे कृष्ण
तेदूनमिसत्वक्षायां तव मनोपि पवित्रमपि शरीरमिव मलिनतरं अतिशयेन मलिनम

विष्यति॥ तथा च॥ यथा तव वपुः श्यामं भवीष्यतीत्यर्थ॥ ननु मम मनोमालिन्यं त्वया कथं ज्ञातमित्य
त आह॥ कथमित्यादि॥ अथेति संप्रश्ने त्वमेव संप्रष्ठत्ये पृच्छित त्वां त मलिनं तदा अश्याम शरज्वर
दूनं अश्याम शरो विषमशरः कामस्तज्जनितेन ज्वरेण दूनं दुःखितं त्वत एवानुगतं त्वामनुद्भुतमा
दृशं जनं कथं वंचयसे प्रतारयसि॥ तथा च॥ शरणागतजनवंचनमंतर्मालिन्यमंतरेण न संभव
तीति भावः॥ तथा च॥ व्याजेन दर्शनस्मितादि गोपनेपि॥ प्रसन्नं जनं वंचनं कथं त्वया गोपनीय
मिति भावः॥ अथो अथ च संप्रश्ने मंगलानंतरयोरिति विश्वः॥ नूनमिति शब्दोपादानादुत्प्रेक्षा ना
मायकलंकारः॥ तदुक्तं दंडिना॥ मन्ये शंके ध्रुवं प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दै
रिव शब्दोपि तादृश इति॥ ६॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

५९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वपुरित्यादि ॥ हे कृष्ण स्मरस्य कामस्य संगरे संग्रामे खराणां तीक्ष्णानां क्षतस्य रेषा यत्र एतादृशं तव
वपुः मरकतशकलैः नीलमणिखंडैः कलितानि निर्मितानि याः कलधौतलिपिः सुवर्णाद्वाक्षरविन्यासस्त
स्याः इव रतिजयलेखं सुरतिविजयप्रशस्तिलिखनपत्रं अनुहरति सदृशीकरोति ॥ अत्र कृष्णवपुषो नी
लत्वान्मरकतशकलसौम्यं सुवर्णस्य वाचि संप्रदाय आरक्ते नैव वर्णनीयता अत्र खक्षतस्य सुवर्ण

वपुरनुहरति तव स्मरसंगरखरनखरक्षतरेखं ॥ मरकतशकलकलितकलधौत
लिपेरिव रतिजयलेखं ॥३॥ चरणकमलगदलक्तकसिक्तमिदं तव हृदयमुदारं ॥
दर्शनीयतीव बहिर्मदनद्रुमनवकिशलयपरिवारं ॥४॥

लिपिसाम्यं ॥ संगरोन्हीहूतो युधीति विश्वप्रकाशः ॥ पुनर्भवः करुरुहो नखोस्त्रियामित्यमरः ॥
गारुत्मतं मरकतहेमगर्भं । हरिन्मणिरिति च । भित्तं शकलखंडे वा पुंसीति च ॥ कलधौतं रूप
हेम्नोः कलधौतं कलेध्वनावित्यपि विश्वप्रकाशः ॥ वर्णाहूतः स्वचक्रिमुखोल्लेखो वाचि नहारकर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिहारावलिः ॥७३॥ मनुमार्गं विस्मृत्य सकंटकादि छतां वर्त्मनागच्छतीमेव पुषि कंटकच्छितं दृश्यते ननु
न खांकुमि स्यत आह ॥ चरणो इत्यादि ॥ इदं उदारं मनोहरं तव हृदयं मदनद्रुमस्य कामवृक्षस्य हृद
यांतर्गतस्य नवकिशलयपरिवारं नूतनपल्लवसमूहं बहिर्दर्शयतीव प्रकटयतीव कीदृशं हृद
यं ॥ चरणकमलादन्यकामिनीपदपद्मांगुलतासूत्रलतालक्तकेन लिप्तं ॥ अपरोपि वृक्षः सि
क्तमूलः सन् पल्लवान् प्रदर्शयतीति ध्वनिः ॥ हृदि नायकाचरणालक्तक संबंधकथनेन नत्रौं चारखो
बंधः कथितः ॥ तदुक्तं वात्स्यायनेन ॥ योषित्पादौ हृदि न्यस्य न्यकराभ्यां धारयेत्कवान् यथेष्टं ताडयेद्यो
निं त्रौं चबंधः प्रकीर्तित इति ॥ परिवारः परिकरः समूहेनेष्टेनापि चेति विश्वप्रकाशः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चित्तमालिन्यनामेत्याह ॥ भ्रमतीत्यादि । भवान् वनेषु विपिनेषु अबलाकवलाय कामिनीजनकवल
नाय भ्रमति अत्रार्थे किं विचित्रं न किमपि आश्चर्यं ॥ तत्र हेतुमाह ॥ प्रथयतीत्यादि । पूतनिकेव वारा
वा पूतनैव वधूवधे स्त्रीवधे तव निर्दयं दयारहितं बालचरित्रं शिशुचेष्टं प्रथयति ख्यापयति ख्यापयति ।
तथापि बाल्ये येन स्तनदाने प्रवृत्ता राक्षसी निहता तस्य संप्रति कोमलांगीनां मादृशीनां मारणे

भ्रमति भवानबलाकवलाय वनेषु किमत्र विचित्रं ॥ प्रथयति पूतनिकैव वधूवधनिर्द
यबालचरित्रं ॥ ७ ॥ श्रीजयदेवभणितरतिवंचितखंडितयुवतिविलापं ॥ शृणुत
सुधामधुरं विबुधा विबुधालयतोपि दुरापं ॥ ८ ॥ ॥ इति सप्तदशः प्रबंधः ॥ ॥ ८ ॥

किं वक्तव्यमिति भावः ॥ खंडितात्वियं नायिका ॥ तदुक्तं भरते ॥ निद्राकलापकलुषीकृतताम्रनेत्रा ना
रीनखव्रणविशेषविचर्चितांगः ॥ यस्याः कुतोपि गृहमेति पतिः प्रभाते सा खंडितेति कथिता ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविभिः पुराणैरितिश्रीजयदेवस्यादि ॥७॥ ॥ हे विबुधाः पंडिताः इदं श्रीजयदेवेन कविना वर्णि
तं ॥ रतौ वंचितायाः प्रतारि ॥ तायाः खंडितायाः प्रातरागतान्यनायिकानखांकादिचिन्हितप्रि
यायाविलापं परिवेदनं शृणुत आकर्णयत ॥ कीदृशं ॥ सुधातोपिमधुरं ॥ तत्र हेतुमाह ॥ विबुधे
ति । विबुधालयतोपि देवालयेपि दुरापं दुःप्रापमिसर्थः ॥ सुधातु स्वर्गे सुलभा कथं मृत
पानसुखं तु तत्रापि दुर्लभमिति सुधापेक्षयाधिकमाधुर्यमिति भावः ॥ विबुधः पंडिते देवे
इति विश्वप्रकाशः ॥ विबुधालयतोपि यत्राधादिलांतस्य समु ॥ १ ॥ ॥ ७ ॥ ७ ॥ ७ ॥

६०

नदेवमित्यादि ॥ हे कितव धूर्त त्वदालोकस्तवदर्शनं प्रख्याताः प्रसिद्धाय: प्रणयभरोनुरागातिशयस्तस्य भंगेन नाशहेतुना शोकादपि दुःखादपि किमप्यनिर्वचनीयां लज्जां जनयति ॥ कीदृश्यामे ॥ तवइदं प्रसभं हृदयं पश्यंत्याः ॥ कीदृशं ॥ प्रियापादालक्तैः प्रियायाश्चरणसंबंधियाव

तदेवं पश्यंत्याः प्रसरदनुरागं बहिरिव प्रियापादालक्तच्छुरितमरुणच्छायहृदयं ॥ ममायं प्रख्यातः प्रणयरसभंगेन कितव त्वदालोकः शोकादपि किमपि लज्जां जनयति ॥४१॥ ॥ इति श्रीगीतगोविंदे जं० कृतौ खंडितावर्णने नामाऽष्टमः सर्गः ॥

कैर्व्याप्तं ॥ अतएवारुणच्छायं अरुणछायादीप्तिर्यस्य तादृशं ॥ कमिव ॥ बहिः प्रसरदनुरागमिव ॥ हृदयं परिपूर्णाधिक्याद्बहिर्निःसृतप्रेमेव ॥ या राधा पूर्वं सौभाग्यगर्वेण

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकांत न गणयति स्म से दानीं समस्तमन्यनायकाचरणालंकं छल्लहृदये यपश्यंती जीवं सेवे
ति विपक्षयुवतीपरिहासंशंकया शोकादपि मे धिकान्बुजा भवतीति भावः॥ ॥छायास्यादातपा
भावे प्रतिबिंबार्कयोषितोः॥ कलनो तोवयोः क्रांतिसंछो भार्यंत्रिषु स्मृतेति विश्वप्रकाशः॥४१॥
कोषानुसारिलिखितस्मरतंत्रेतं सालंकृति ध्वनियुतं कृतशब्दशुद्धिः॥ व्याख्यानमाकलयितुं
जयदेवकाव्ये चेदुत्सुकोसि तदिमां कलयस्व टीकां॥ ॥इति श्रीमहोपाध्याय श्रीशंकरमिश्र
विरचितायां श्रीरसिकनायकाभीतायां गीतगोविंदटीकायां रसमंजरीनामधेयायां अष्टमः स
र्गः॥८॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वसर्गे खंडितायाराधायाश्चरितमुक्तं संप्रति कृतपश्चात्तापां तां सखी उवाचेत्याह ॥ अथतामिति ॥
अथ अथानंतरं तां कलहांतरितां परुषवाचानंतरं कृतपश्चात्तापां राधां रहः एकांते सखीउवाच कथितवती ॥ कीदृशीं । मन्मथखिन्नां मन्मथेन कामेन खिन्नां दुःखितां ॥ अतएव रतिरसेन शृंगाररसेन भिन्नां संगतां ॥ अतएव विषादसंपन्नां सुद्वेगसहितां ॥ अतएवानुचिंतित

अथ तां मन्मथखिन्नां रतिरसभिन्नां विषादसंपन्नां ॥ अनुचिंतितहरिचरितां कलहांतरितां मुवाचरहःसुखी ॥ ५० ॥ गुर्जरी राग ॥ यतिताल ॥ हरिरभिसरतिवहति मधुपवने ॥ किमपरमधिकसुखं सखि भुवने ॥ १ ॥ माधवमाकुरु मानिनिमानमये ॥ ध्रुवपदं ॥ तालफलादपि गुरुमतिसरसं ॥ किं विफलीकुरुषे कुचकलशं ॥ २ ॥

स्मृतं हरेश्चरितं पुरा सा हो खिलसितं यया तां ॥ भिन्नमन्यार्थवचने संगते दारिते स्फुट इति विश्वः ॥ कलहांतरितामभरतोक्तं ॥ प्राणेश्वरं प्रणयकोपभरेणाभीतेयानादृत्य मविशदेव धार्यपश्चात् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सतएतेव न्हिसस्वै बाष्पाकुलाव वालहांतरी तातुसास्यादिति ॥५०॥ तदेव गीतेश्चन कथयति ॥ हरि
रिति ।गीतस्यास्यगुर्जरी रागः ॥यति तालः ॥गीतार्थस्तु ॥ अयेइति संभ्रमे हे मानिनि मानवति माधवे
लक्ष्मीपतौ मानं कुरु ।लक्ष्मीपतिरपिवा प्रसादयसेहा ते भाग्यं इत्यवृथं तवो मानस्माज्य सर्वनायमा
धवपदोपादानं ॥ध्रुवपदं ॥मधुपवनेनवसंत वायो वहति सति हरिः कृतोभिसरतित्वदीयसंकेतभूमिमा
हे सखि भुवनत्रैलोक्येऽपरं कृतोभिसरणाद न्यत्किं अधिकं सुखं अपितु न किं विद्धि सर्वः ॥ मधुः स्तो
रजं लोकोडि मधे पुष्प रसे मधुः ॥ देसे चैत्रे वसंतेच जीवा काशे मधुर्मद्य इति विश्वप्रकाशः ॥१॥ किंच
कुच कलशं कलशावन्मां सत्वस्तनं किं किमिति विफली कुरुषे ।कृष्णकर स्पर्शादेव कुच कलशय
योः साफल्यं तद भावे वैफल्यमिति भावः ॥कीदृशं ।तालफलादपि तालफलापेक्षयापि गुरुं कुटि
नमति सरसं वर संभोगारारव्य रसस हितं ॥तालफले रसो माधुर्यं तत्सहितं ॥अतिविमर्दे न वे
रसं प्रदलं भवति ॥ अपरः कलशोपि संपूर्णसन् गुरु भवति रसो जलं तत्सहितं च भवतीति अ ६२
पिध्वनितं ॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यदा हरि रागतस्तदा त्वयापि किमिति नो कः म्रियत आह ॥ कतिनेति ॥ इदमचिरं सांप्रतमेव उक्तं नुप
द स्थाने र प्रतिम पा कति न कथितं किं स्वल्पकथितं अपितु बहु कथितं ॥ इदं किं । हरिं अतिशयरुचि
रं अतिशयेन मनोहरं मापरिहर माउपसर्व । किमितीति ॥ ३ ॥ त्वं किमर्थं विषीदसि विषण्णा भव

कतिन कथितमिदमनुपदमचिरं मापरिहर हरिमतिशयरुचिरं ॥ ३ ॥ किमिति विषीद
सि रोदिषि विकला ॥ विहसति युवतिसभा तव सकला ॥ ४ ॥ सजलनलिनीदल
शीतलशयने ॥ हरिमवलोकय सफलय नयने ॥ ५ ॥ जनयसि मनसि किमि
ति गुरुखेदं ॥ शृणु मम वचनमनीहितभेदं ॥ ६ ॥

सि ॥ ननु नास्मि विषण्णेसत आह ॥ रोदिषीति ॥ विकला विकला सती रोदिषि । अत एव तव सकला
समस्ता युवतिसभा हसतीति भावः ॥ ४ ॥ तर्हि किं करोमीत्यत आह ॥ सजलेत्यादि ॥ हस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अलननळिनीदळशीतलशयनसडळानिजळसहितानियानि नळिनीदळानिकमलिनीपत्रा
णितेषांशीतलंशयनंशय्यायस्यास्तादृशे॥तंपुरस्थितंहरिंकृष्णमवलोकयपश्य।अतएव नयने
नेत्रसफलयरुतार्थयायद॥सजलेत्यादौसप्तमी तथाच॥त्वयारचितंयत्सजलनळिनीदळशीत
ळशयनंतत्रउपविष्टंहरिमवलोकयसार्थः॥तथाच॥सत्कारपूर्वकंशयनेउपविश्यहरिंपश्येति
तिभावः॥५॥तस्यात्मनसिवितेगुरुखेदंमहदुःखंकिमितिजनयसिममवचनंमाधवेमा
नंमाकुरुइतिममवाक्यंशृणु॥कीदृशंनंअनीहितानकांहितायुवयोर्भेदउपयामायत्र
तादृशंतथाच॥ममवचनंयुवयोःप्रीतिकारकंतद्वश्यंत्वयाश्रोतव्यमितिभावः॥मृद्धा॥मह
सहआकलितंभेदंयथास्यात्तथैवममवचनंस्पष्टं॥इयंसखीमंत्तोभिन्नामदनिष्टंनवदिष्यतीति
बुध्यामहद्वचनंस्पष्टंएवेतिभावः॥६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरिं हलः उपयातु वदं ति कुंगछतु ॥ बहुमधुरं अतिसरसं यथास्यादेवं वदतु । हृदयं स्वकीयं हृदयं अलि
विधुरं अलि दुःखितं किमिति करोषि ॥ ७ ॥ श्रीजयदेवेत्यादि ॥ श्रीजयदेवेन भणितं वर्णितं ललितं मनोहरं ।
हरिरमितं रसिकजनं कृष्णभक्ति रसास्वादग्राहिणः शृंगारादिरसास्वाद परजनं सुखयतु आनंदयतु ।

हरिरुपयातु वदतु बहुमधुरं ॥ किमिति करोषि हृदयमपि विधुरं ॥ ७ ॥ श्रीजयदेवभणितमति
ललितं सुखयतु रसिकजनं हरिचरितं ॥ ८ ॥ स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि य
द्रागिणि द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन् प्रिये ॥ युक्तं तद्विपरीतकारिणि तव
श्रीखंडचर्चा विषं शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातना ॥ ५९ ॥ ॥ इति श्रीगीत
गोविंदे महाकाव्ये जयदेवकृतौ ॥ कलहांतरितावर्णनो नाम नवमः सर्गः ॥ ९ ॥ ॥

११८ ॥ स्निग्ध इति यत् यतो हेतोः स्निग्धे तस्मिन् प्रिये मधुरवचनैः स्नेहं प्रकाशयति सति परुषासि
निष्ठुरभाषिणी असि । यत्र प्रणमति तस्मिन् त्वं स्तब्धासि । यद्रागिणि अनुरागवति तस्मिन् त्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वेषस्थासि द्वेषमखिलं बद्ध्वा स्थितासि ॥ यद्वा उन्मुखे आलिंगनाय संमुखे तस्मिन् त्वं स्तब्धासि विमुख
वतीयातासि पराङ्मुखतां गतासि । तद्धेतोः हे विपरीतकारिणि एतत्सर्वं युक्तमेव ॥ एतत् तत् विं तव
शीतलत्वहेतुः श्रीखंडनलेपो विषं । यथा विषं भोक्तारं मूर्छयति तथा चंदनलेपोऽन्येषां सुखदोपि त्वां मूर्छ
यति इति भावः । अथ च शीतांशुश्चंद्रः तपनः सूर्यः अन्येषां शीतलस्वभावोपि चंद्रस्त्वापि तापयद्
त्वात्तपन इति भावः । हिमं तुषारोपि हुतवहो अग्निः । अथ च क्रीडामुदः सखीभिः सह क्रीडाजन्यामुदः प्रमोदा या
तना तीव्रवेदना । यः परस्मिन् विपरीतमाचरति तस्य सर्वं विपरीतमेव भवतीति भावः । परुषं कर्कशं रू
क्षस्यानिष्टुरेव वसीति क्षिप्रप्रकाशः । यातना तीव्रवेदने समरः ५९ वाक्यार्थ पुनरिदमत तसंमतमत्र
यत्किंचिल्लोकाज्ञानमथ शाब्दनयप्रमेयं । यत्रापलंबितरहस्यनलेषि नतत्रा प्राप्तमूलमिम
ति सन्मतिभिर्विभाव्यं ॥ ९ ॥ इति गी॰ टी॰ र॰ अष्टादशप्रबंधः ॥ नवमः सर्गः ॥ ९ ॥ ॥ ७ ॥ ७ ॥ ६४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रांतर इत्यादि ॥ अत्रांतरे स्मिन्नवसरे हरिः राधां समुपेत्य राधासमीपं गत्वा दिनांते प्रदोषरात्रिमुखे इति वक्ष्य
माणाउवाच । कीदृशीं । मसृणः कर्कशो यो रोषस्तद्वशाद्दीर्घो यो निःश्वासस्तेन निःसहा विरहदुःखसहना
क्षमं मुखं यस्यास्तां पुनः कीदृशीं । सव्रीडं सलज्जं यथा स्यादेवं ईक्षिते सख्या वदनं मुखं यया तां ॥ कथं यथा स्यात्

अत्रांतरे मसृणरोषवशामसीम निःश्वासनिःसहमुखीं समुपेत्य राधां ॥ सव्रीडमीक्षितसखीवदनं दिनांते
सानंदगद्गदपदं हरिरित्युवाच ॥ ५१ ॥ वराडिराग अष्टतालः ॥ वदसि यदि किंचिदपि दंतरुचिकौमुदी हरति दरति
मिरमतिघोरं ॥ स्फुरदधरसीधवे तव वदनचंद्रमा रोचयति लोचनचकोरं ॥ १ ॥ प्रिये चारुशीले मुंच मयि
मानमनिदानं ॥ सपदि मदनानलो दहति मम मानसं देहि मुखकमलमधुपानं ॥ ध्रुवपदं ॥

सानंदगद्गदपदं आनंदेन गद्गदं पदं गलद्वाचा च सहितं यथा स्यात् ॥ ५१ ॥ तदेव गीतेन कथयति । वदसीत्यादि । गीत
स्यास्य देशी वराडी रागः । तालश्चाष्टतालः ॥ गीतार्थस्तु । हे प्रिये राधे चारु मनोहरं शीलं यस्याः सा हे चारुशी
ले मयि मयि विषये अनिदानं अकारणं मानं मुंच त्यज सपदि तत्क्षणे मानकाले एवं मदनानलः कामाग्निर्मम

मानसं दहति तापयति॥ अतो मुखकमलमधुपानं मुखमेव पद्मकमलं तत्संबंधि यत मधु तत्पानं देहि॥ ध्रुवपद॥
चारुशीलवमेवाहं॥ वदसी यादि॥ हे यदि किंचिदपि वदसि नववनमपि वदसि तदा दंतरुचिकौमुदी चंद्रज्यो
त्स्नासा अतिघोरं अति भीमं मंदरतिमिरं वरतासा एव तिमिरं अंधकारं तत् हरति। अत्रव साध्वस मतिपुरः
स्थितमपि वस्तु न प्रकाशते॥ तल्लक्षणं वोकंसाकू॥ चंद्रिकायां तु कौमुदी ज्योत्स्ना॥ दरमाध्वसगर्तयोरिति व॥
घोरं भीममहरेघोरं रुद्रमपि॥ सिंधूनां मदिरामृते। सीधुशब्दः पुस्यपि॥ तथाव॥ पुनपुंसकशेषइंद्रियस्तदभिलक्ष्याणां॥
रुचिं प्रति कर्तृविषयतया यत्र कारणत्वं तत्र चतुर्थीविधानात्। स्फुरत्कुंदनवंडुमसौन तत्प्रिजेन कलोचिवहितं॥
किं त्वदधरसीधुविषयकाभिलाषमात्रजनकत्वं॥ तथाच॥ बकुलवंड्यसे रुचिरीति रुचेरिच्छामात्रे सतिस्याद
तः कर्तुर्निर्देशादप्रत्ययेस्तर्पणरुचि स्तत्रैव चतुर्थीति। अतएव रुच्यर्थानां प्रीयमाणः इति पाणिनेः सूत्रं॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यमेवासीति ॥ हे सुदति शोभनदशने त्वं मत्सत्यमेव यथार्थमेव यदि मयि कोपिन्यसि कोपवत्यसि
तदा खरा नखास्त एव शरा बाणास्तैर्घातं प्रहारं देहि । तेनापि चेन्न तुष्यसि तदा भुजबंधनं भुजाभ्यां बाहु
भ्यां बंधनं घटय सिति ॥ नाप्यसंतोषाद्रदखंडनं रदनैर्दशनैः खंडनं अधरे क्षतं जनय येन त्वा सुख

सत्यमेवासि यदि सुदति मयि कोपिनी देहि खरनखरशरघातं ॥ घटय भुजबंधनं जनय
रदखंडनं येन वा भवति सुखजातं ॥ ५ ॥ त्वमसि मम भूषणं त्वमसि मम जीवनं त्वमसि
मम भवजलधिरत्नम् ॥ भवतु भवतीह मयि सततमनुरोधिनी तत्र मम हृदयमतियत्नम् ॥

जातं सुखमस्माकं भवति तदेवं कुरु तथा च मय्यपराधानुकूलं दंडं विधाय कोपं मुंचेति भावः ॥ सुदतीति
शोभनादंता अत्रास्येति वाक्ये च यदिदं सिद्धं तस्य दन्त इति दंतशब्दस्य दत्रादेशः ॥ जातसुजाता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घज्जन्म स्थितिति विश्वः ॥ ननु यातबत्प्रिया तस्या मानं मोत्त्व ममामानस्योगेन व किं प्रयोजनमपि
युत आह ॥ त्वमसीति । हे मम जीवनमसि त्वयि विषण्णायां मम विषादो भवति प्रसन्नायां प्रसाद इ
ति त्वमेव मम लोकान्तरं जीवनमिति भावः ॥ त्वं मम भूषणमलंकरणमसि त्वां विना कि
रीटादिमपि न मे शोभाप्रदं त्वयि प्रसन्नायामलंकरणं विनापि परमा कान्तिरिति त्वमेव मम
लोकान्तरं भूषणमिति भावः ॥ भवजलधौ संसाररूपे रत्नाकरे त्वमेव मम रत्नमसि ॥ यथा दरिद्र
स्य रत्नदृष्टे परमानन्दो भवति ॥ एवं मम त्वयि दृष्टायामिति भावः ॥ भवतीति । इह प्राणते ममाभर्त्सि
सत संसर्वदानुरोधिनी अनुरोधवती भवतु तत्रार्थे मम हृदयं यं अनियम त्वं अतिशयितयत लक्ष्य ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीलनलिनेत्यादि। हे तन्वि हे कृशांगि नीलनलिनस्य नीलोत्पलस्येव आभा कांतिर्यस्य एतादृशं तव लो
चनं रोषारुणं सत् कोकनदरूपं रक्तोत्पलसौंदर्यं धारयति॥ यदि त्वं कुसुमशरः कामस्तस्य बाणास्तेन
तद्बाणेनेति प्रायेण वा इदं हृत्कमलं च भृशमनुरंजयसि रक्तं करोषि एतस्य वपुषः अनुरूपं सदृशं।शा।

नीलनलिनाभमपि तन्वि तव लोचनं धारयति कोकनदरूपं कुसुमशरबाणभा
वेन यदि रंजयसि कृष्णमिदमेतदनुरूपं ४ स्फुरतु कुचकुंभयोरुपरि मणिमंजरी
रंजयतु तव हृदयदेशं॥ रसतु रशनापि तव घनजघनमंडले घोषयतु मन्मथनिदेशं

हिंसनं तं परशरीरस्य भोगिनो रुधिराक्तत्वेनारक्ता एव भातीति भावः॥ यद्वा॥ कुसुमशरबाणभावेन
कुसुमशरस्य बाणरूपो यो भावस्तेनाभिप्रायस्तेन॥ यद्वा कुसुमशरबाणभावेन तद्बाणस्वरूपेण वपुः
षोन्नता। हृत्कमलं मां रंजयसि इदं रंजनं एतस्यास्तव एतस्या वा वपुषस्य वा अनुरूपं सदृशं॥ श्यामलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिंसा पादानसमर्था पासत्ते मम रंजनमनुरूपमेवेति पश्च बाणेन ताडयेत सरुधिरादिना रक्तो भ
वस्येवेति भावः। कुसुमशरबाणभावेनानेन नयनेन त्वत्लुनं दासजं मां रंजयसि प्रणयास्य द
करा[?]ती रंपतस्मात्ताव अनुरूपमेवेति प्रकृतार्थः॥ मवो[?]को कनहंर लकै वेरवर त पंजवे इति स्त्रियः
२ स्फुरतिति। मणिमंजरीम[?]तिपरंपराकुच कुंभयोस्तनकलशयोरुपरि स्फुरतु त्वं वक्षो भवतु।
तव हृदयदेशं च स्तुः प्रदेशं रंजयतु स्वरश्मिभिः शोभयतु। तत्र पुनः न किंनरकांथ ते त्वं च लक्
मां रंजयसि अतो मणिमंजपितेव सा यदि रंजयति तदानुरूपं भवतीति भावः। अत्रैव स्मरके लिरूपगु
णकर्माणं भे मंजरीते निरूपणं। तत्र च भजघन मंडले मांसल जघनभागे रशनापि क्षुद्रघंटि
कापि रसतु नादायमाना भवतु मन्मथेनिशिरे कामाज्ञाघोषयतु वारंवारं कथयतु॥ का
मज्ञयैतो केचित् कुरुत इति कामाज्ञया सर्वे विलासिनो रमतामिति वा मन्मथनिदेशघोष ८७
यन्निति भावं ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थळे मादि। हे मसृणवाणि स्निग्धवचने भण आज्ञापय देहि॥ तव चरणद्वयं सरसलसदलक्तकरागं सर
सः स्निग्धो लसन्नलक्तकरागो महारंजनरागो यत्र तादृशं॥ मम हृदयरंजकं करवाणि कुर्यामिति। कीदृ
शं॥ स्थलकमलगंजनं स्थलोत्पन्नं यत् कमलं स्वकांत्या तत्स्यापि तिरस्कारकं॥ पुनः कीदृशं॥ मम

स्थळकमळगंजनं ममहृदयरंजनं जनितरतिरंगपरिभागं॥ भण मसृणवाणि कर
वाणि चरणद्वयं सरसलसदलक्तरागं ६ स्मरगरलखंडणं मम शिरसि मंडनं धेहि पदप
ल्लवमुदारं॥ ज्वलति मयि दारुणो मदनकदनानलो हरतु तदुपहितविकारं ७

हृदयरंजने मम हृदयानुरागजनकं॥ तथा चेदं मम हृदयं रंजयति मयाप्यलक्तकेनैतद् रंजनमुचि
तमेवेति भावः॥ अत एव जनितो रतिरंगः सुरतकौशलपरभागः परस्परशोभा यत्र
तादृशं॥ मया अलक्तकेन चेदिदं रज्यते तदेवमपि क्रोधबंधादेो मम हृदयलग्नः सस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रमशोभां दास्यतीति भावः ॥ स्फुरतु मणिमंजरीइसेने नखविपरीतरवम त्राभिमतं परस्परं तुया कांतिः
परभागः स कथ्य इति ध्रुत्तिः । रंगः कौतुहलरागयोरिति विश्वः स्मरे सदि ॥ ८ ॥ हे प्रिये उदारं सुंदरं पदपल्लवं चर
णकिशलयं मम शिरसि धेहि स्थापय ॥ कीदृशं ॥ मंडनं मम मस्तकस्यालंकरणं । पुनः कीदृशं । स्मरस्य यत्
गरलं तस्य खंडनं नाशनं ॥ विरहिणां मूर्छादिप्रदत्वेन मलयानिलादेः स्मरगरलत्वरूपणात् । स्मरस्य स
र्पस्य माक्षिप्यते । वर ॥ वरपल्लवयोर्हि सनेन नायकापागारुडिकत्वं चेत्साक्षेपकं रूपकमिदं । अपरमपि
सर्पादिविषं गारुडिकवरणाभिघातेनाभिमंत्रितपल्लवाघाराहणो नव शाम्यतीति इति ध्वनिः ॥ किंचापि प्र
रूण दुःसहो मदनकदनारुणः मदनः कामः स्तज्जनितं यत्कदनं तापः स एवारुणः सूर्यो ज्वलति अ
तस्तेन उपहितं जनितं विकारं ग्लान्यादिरूपं हरतु दूरीकरोतु । अन्योपि सूर्यसंतापः शिरसि पल्लवादि
स्थापनेन शाम्यतीति ध्वनिः । अरुणः स्फुटरागे स्यात् सूर्ये सूर्यस्य सारथौ इति विश्वप्रकाशः ६८
कलुषं कदनं तापे इति च ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीः इत्यर्थः ॥ इत्यनेन प्रकारेण मुरवैरिणः कृष्णस्य राधिकामधि राधायां उत्सोत्सुस्य अधिवचनजातं वा
क्यसमूहो ऽयाति सर्वोत्कर्षेण वर्त्ततां कीदृशं ॥ बहुलं मनोहरं चाटु प्रीतियुक्तं पटु चतुरं चारु सुकुमा
रं ॥ पुनः कीदृशं । पद्मावतीजयदेवपत्नी तस्याः रमणो वल्लभो जयदेवकविस्तेन भारती भा

इति बहुलचाटुपटुचारु मुरवैरिणो राधिकामधि वचनजातं ॥ जयति
पद्मावतीरमणजयदेवकविभारतीभणितमिति गीतं ॥ ८ ॥ १९ ॥ छ ॥

रती संज्ञा वक्तव्या कविहृदया भणितं वर्णितं ॥ जयदेव । जयदेवकवेर्भारत्या वाण्या भणितमिति पुन व्या
ख्यानं मंदं ॥ तथा सति पौनरुक्त्यापत्तेः जयदेवकविभणितमित्यस्यैवं सम्पन्नत्वात् पुनः कीदृशं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतिशांत अतिशायिते शांतं सुखं च समानार्दशं ॥ भारतीवृ सलक्षणं शृंगारतिलके ॥ प्रधानपुरुषः
प्राय सर्वकर्मसिति रंतरा ॥ भारतीसात्वतीवृत्ति वीरहास्याद्भुताश्रयेवी ॥ रसार्णवसुधाकरेपि ॥ शृंगारा
दिषु सर्वेषु रसेषु इष्टाहि भारतीति । वहुलः सुन्दरे वाले इति धरणिः ॥ वहु वाहु प्रियंवा क्मामिति सहड्चं
ड्ः । पटुस्तीक्ष्णे निरोगे च तुरे न्यवदिति विश्वप्रकाशः ॥ शर्म शांत सुखानि चेत्यमरकोशः ॥ ९ ॥

९२

परिहरेत्यादि ॥ हे कृतातंके विहितसंतापे अन्यं नायिकासंगसं[illegible]शंकां परिहर त्यज ॥ यतो मम स्वांते चित्ते तरम् अयं न रंतिन नोस्त
नुशून्यात् कामादन्यो धन्यो जनो न विशति ॥ कुतो न विशतीत्याह ॥ परेति ॥ परानवकाशिनि इतरावकाशशून्ये ॥ तत्र हेतुमा
ह ॥ त्वयेति ॥ घने निबिडे स्तनजघने यस्यास्तादृश्या त्वया सततमाक्रांते व्याप्ते ॥ तथा च ॥ सदा त्वया पूरिते मदीयहृदयेन्यस्य प्रवे
ष्टुं स्थलमेव नास्ति ॥ अनंग एव परं प्रविशति तस्माद्भावादित्यर्थः ॥ तस्मात् मत्शरीरं स्वाहं मे आलिंगनारंभे विधेयतां वचन

परिहर कृतातंके शंकां त्वया सततं घनस्तनजघनयाक्रांते स्वांते परानवकाशिनि ॥ विशति वितनोरन्यो धन्यो
न कोपि मर्मांतरं प्रणयिनि परिरंभारंभे विधेहि विधेयतां ॥ ५३ ॥ मुग्धे विधेहि मयि निर्दयदंतदंशदोर्वल्लिबंधनि
बिडस्तनपीडनानि ॥ चंडि त्वमेव मुदमंच न पंचबाणचांडालकांडपतनादसवः प्रयांतु ॥ ५४ ॥ शशिमुखि तव भा
ति भंगुरभ्रूर्युवजनमोहकरालकालसर्पः ॥ तदुदितभयभंजनाय यूनां तदधरसाधुसुधैव सिद्धमंत्रः ॥ ५५ ॥

ग्राहिता विधेहि कुरु ॥ ततो हे चंडि परिरंभमावेरतिमद्भवनं कुर्वीत्यर्थः ॥ उक्तायशंका स्वातंत्र्यइस्मरः । विधेयो
वचनग्राहि ॥ ५३ ॥ यद्येवं न प्रत्येषि तदा ॥ मदपराधानुरूपं दंडमाचरेत्याह ॥ मुग्धेत्यादि । हे मुग्धे सुंदरि निर्दयं दयार
हितं दंतदंशं दशनक्षतं अथ च दोर्वल्लिबंधनं निबिडगाढं स्तनाभ्यां पीडनं च विधेहि कुरु ॥ ततो हे चंडि अतिको

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पनेत्वमेवमुग्धमत्स्यापराधिनोममदंडाचरणेनानंदमग्ना माभुह्किनपुनःपंचबाणःकामःसहैवनिरपराधिमाहृ
गायनहिंसत्वत्वेनचांडालस्तत्तस्यकांडदंडेनान्नाशावप्रहराणाद्दसवःप्राणाःप्रयांतुनिर्गच्छंतु।चांडालप्रहारेणानस
मीचीनागातिरतस्त्वयासास्वाद्देवपर्योचितंदंडाचरणंविधेयमितिभावः॥चंडीकात्यायनीहिंस्त्राकोपनस्त्रीतुसंम
तेविश्वः।ननुकोपोनास्मिवेयतआह॥शशिमुखीसदि।हेशशिमुखिवदनेनतवभंगुरभ्रूःकुटिलाभ्रूश्च।त्तोति
शोभते॥कीदृशी।युवजनानांतरुणजनानांमोहनायसंमोहनायकरालोभीषणःकालसर्पः।अन्योभु
जंगोदष्ट्वामोहंप्रयंसयंतुदष्टमात्रएवमृतस्तस्यकरालत्वं॥अतस्तदुदितविषभंजनायततःसकाशादुदितमु
त्कृतंयद्विषंगरलंतस्यभंजनायनाशायभूवानांतरुणानांत्वदधरसिंधुसुधैवत्वदीयाधरएवसीधुर्मदि
राविशेषः।सएवसुधामृतंसैवसाधुःसमीचीनःसिद्धिःसाधितामंत्रः॥अन्योमंत्रोजपादीनाविषंनाशाय
सयंत्वास्वादितंएवसेतस्यान्यमंत्रापेक्षयासाधुत्वं॥तथाच॥अहमपितवभ्रूकालसर्पविषमूर्छितस्तत्त्रा
सायोपधरेनतवाधरसुधाजीवेतिभावः।करालोभीषणोन्यावदितिविश्वप्रकाशः॥५॥ ७०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यथ्यरातीति। हेतन्वितक्वृथामौनमकाः एवं वागबंधनेमां [illegible] त्युतिपीडयति। किंवहेतरुणी मधुरालापैर्मधुरा
लापैनेः पंचमस्वरविशेषं प्रपंचय विस्तारय। किंचदृष्टिभिरेव [illegible] केनेत्तापं संतापं विनोदय विशेषेण नोदय अप
सारय। हेसुमुखि विमुखीभावं मयि विमुखतां तावत् विमुंच। सुमुख्यास्ते वैमुख्यमनुचितमिति भावः। मानस्य
याप्यपाति वृथा मौनं तन्वि प्रपंचय पंचमं तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः॥ सुमुखि विमुखि
भावं॥ तावद्विमुंच न मुंच मां स्वयमतिशयस्निग्धो मुग्धे प्रियोहमुपस्थितः॥५६॥ बंधूकद्युतिबांधवोय
मधुरः स्निग्धो मधूकछविर्गंडश्चंडि चकास्ति नीलनलिनश्रीमोचनं लोचनं नासाभ्येति तिलप्रसू
नपदवीं कुंदाभदंति प्रिये प्रायस्त्वन्मुखसेवया विजयते विश्वं सपुष्पायुधः॥५७॥
वनमस्त्त्व हे मुग्धे अयं प्रियः स्वयमनाहूत एवोपस्थित आगतः॥ कीदृशः॥ अतिशयस्निग्धः॥ अतिशये
नस्नेहवान्॥ तथा च स्वयमागतः प्रियो हातुं नोचितमिति भावः॥५६॥ संप्रति सपि मानवत्सां त्वन्मुखेने
व। कामो मां पीडयति तस्मात् प्रसीदेत्याशयेनाह॥ बंधूकेसादि। हे चंडि जातिकोपने अयं तवाधरो बंधूक
द्युतिबांधवः बंधूकस्य पुष्पविशेषस्य या द्युतिर्दीप्तिस्तस्या बांधवः सुहृत्॥ अत्र गंधवत्सरूपणेन बंधूक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्युतिनामधोरेनि संस्थितिर्युंजेते॥ अयं च स्निग्धः गंडः कपोळः मधूकच्छवि मदिरहजनित पांडिम तया मधूकस्य
मधुकपुष्पं च धविः कांतिर्यस्य एतादृशोस्य यस्य वा भक्ति अतिशोभते॥ तेलोचने नीळनळिनश्रीमोचने॥ स्वकांत्या
नीळनळिनश्रीमोचनं॥ स्वकांत्या नीळनळिनस्य नीलोत्पलदळस्य श्रीयं कांतिं मोचयति॥ स्याज्जयतीति ताह
शं॥ प्रथमं स्वभावत एव नीळं ताहकत्वा नीलं वस्तु रंजनेन सुतरां नीलामति नीळोत्सत्वमप्यतिशोभत इति भा
वः॥ हे कुंदरभदंति कुंदपुष्पस्येव आभा येषां तादृशा दंता यस्यास्तादृशि तव नासा तिलप्रसूनस्य पदवीं तिलपु
ष्पप्रसिद्धिं अभ्येति प्राप्नोति प्रायः इति तर्कयामि॥ प्रसिद्धः॥ पुष्पायुधः पुष्पमेवायुधं शस्त्रं यस्य एतादृशः॥
कामस्त्वन्मुखमेव या सेनाकळक्रं तेन विश्वं जगत् विजयते॥ कामः पंचभिरिव सम्भोनैर्विश्वं जयति॥ तन्मु
खेव बंधुकमधूकनीळोत्पलतिलकुंदपुष्पाणि पंच संनतीति त्वन्मुखेनैव कामो विश्वं जयतीति भावः॥ बंधू
कबंधुजीवित्यादि तिविंश्वप्रकाशः॥ मधुपुष्पो मधूकश्च गुडपुष्पो मधुद्रुम इति हारावळी॥५७॥ श्रा॥ छा॥ ७१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृशौ तवेति ॥ हे तन्वि इमं पृथ्वीगता पृथ्वी पृथिव्यां गता प्राप्ता [illegible]ो विबुधयौवनं देवयुवतीनां समूहं अहो आश्च
र्येण वहसि ॥ तदेवाह ॥ दृशाविति ॥ तव दृशौ नेत्रे मदाल[illegible] [illegible]ौ एवेत मदालसा त्वं तु नेत्रे एव वह मदालसे
दधासी साश्चर्यमितिभावः ॥ तव वदनमिंदुमत्सास्पदं चेदुलविषयिणी यामति[illegible]स्यास्त्रार स्यद्दृविषय इत्यर्थः
॥ तव मुखमयमिति तिरिनिमातिर्मवतिलोकानां ॥ अथवा ॥ इंदुमती नाम्नी काचिद् देवांगना तदात्मिका ॥ अथवा

दृशौ तव मदनालसे वदनमिंदुमत्सास्पदं गतिर्जनमनोरमा विधुतरंभमुरुद्वयं ॥ गतिस्तव
कलावती रुचिर चित्रलेखे भ्रुवा वहो विबुधयौवनं वहसि तन्वि पृथ्वीगता ॥ ५८ ॥ ॥ इति श्री
गीतगोविंदे महाकाव्ये श्रीजयदेवकृतौ माननीवर्णने चतुरचतुर्भुजो नाम दशमः सर्गः ॥ १० ॥ ॥

स्या आश्रयः तव गतिर्गमनं जनानां लोकानां मनोरमा मनोहारिणी ॥ अथवा ॥ मनोरमा नाम्नी या
देवांगना तदात्मिका ॥ अथवा ॥ रंभा लक्ष्मीस्तदालिवेत्यर्थः ॥ तथा तव ऊरुद्वयं तु युग्मं विधुरस्तं विधुने
स्व शोभया तिरस्कृतरंभे कदलीस्तंभे येन तादृशं ॥ अथ रंभा सर्वैश्या स्वर्गे एके वरंभा स्वं ऊरुद्वयात्मकं रंभा

द्वयं दधासीति भावः ॥ अथ च ॥ तव रतिसुरतकेलिः कलावतीकौशलशालिनी ॥ अथ च ॥ तव रतिः का
मववद्दंती अलिकलावतीनाम्नी च देवांगनाते भ्रुवौ । चित्तविचलेखरचिता मषिकोपवशात् विचित्रविचित्रा
लेखा भ्रुकुटीयोम्यां ताहशे ॥ तथा च ॥ स्वर्गे एवैकी चित्रलेखा तव भ्रुवां तु चित्रलेखाद्वयं रचितमित्याश्चर्यमिति
भावः ॥ प्रेयसीनामापल्लवकारः ॥ तदुक्तं दहिना । प्रेयः प्रियतराख्यानं रसवदस्तुपेशल्यमिति । पृथ्वीनामवर्णवेद
छंदस्यापि ध्वनिः ॥ तदुक्तं तु छत्ते रत्नाकरे ॥ जसौ जसयलावसु ग्रहयतिश्च पृथ्वीगुरुरिति । रंभाकदलनपस
रसो रितिविश्व ॥ युवतीनां समहेत्यौवनं इति भिक्षादिमुपसर ॥ यौवनं गणोऽस्य मरः ॥ ५८ ॥ स्फुटोरसो
त्कंठं प्रथितशालिना पोलरस्फारद्रुम समुद्भवां विबुधवर्गदत्तोत्सवां ॥ रणां रसलसमाधवो त्तमगुणोः प्र
मोदप्रमा ॥ श्लिहंतु रसमंजरी रमि सिकवैननरीकामुदः ॥ १० ॥ ॥ इति श्री महामहोपाध्याय श्रीशंकर
मिश्र विरचितायां शालिनाथकारितायां श्री गीतगोविंदटीकायां रसमंजरीनामधेयायां दशमः ७१
सर्गः ॥ १० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुचिरेत्यादि कापि सखि राधां जगाद ॥ उवाच ॥ क्व सति ॥ प्रदोषे स्फुरति सति ॥ कीदृशे ॥ दृष्टिमोषे दृष्टिमोषे दृष्टौ विमुह्याति चोरः मतिश्चविषयग्रहणसमर्थं चोनोतितादृशे ॥ गाढांधकारदूसर्थः ॥ पुनः क्व सति । केशवे मृगाक्षीं हरिणनयनां राधां सुचिरं बहुकालं व्याप्य अनुनयेन प्रीणयित्वा प्रसाद्य कुंजशय्यां लतावेष्टितकुटीरस्थं तरस्थशय्यां मेव गतवति गते सति ॥ कीदृशे केशवे । कृतवेशे कृतालंकरणे । कीदृशीं राधां ॥ रचितारुचिराम

सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं गतवति कृतवेशे केशवे कुंजशय्यां ॥ रचितरुचिरभूषां दृष्टिमोषे प्रदोषे स्फुरति निरवसादां कापि राधां जगाद ॥ ५१ ॥ ॥ वसंतरागेयतिताले ॥ ॥ विरचितचाटुवचनरचनं चरणे रचितप्रणिपातं ॥ संप्रति मंजुलवंजुलसीमनि केलिशयनमनुयातं ॥ मुग्धे मधुमथनमनुगतमनुसर राधिके ॥ ध्रुवपदं ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

नोत्साहक्षपणालं कृतयेयातां ॥ पुनः कीदृशीं ॥ निरवसादां निर्गतो वसादः कृष्णानागमनजन्यं दुःखं यस्यास्तो ॥ ५१ ॥ तदेवगीतेन कथयति । विरचितेत्यादि ॥ गीतस्यास्य वसंतरागो यतिताल्लः । तल्लक्षणमुक्तं प्राक् ॥ गीतार्थस्तु । हे मुग्धे राधे मधुमथनं कृष्णमनुसर ॥ कीदृशं । अनुगतं त्वामनुसृतं ॥ ध्रुवपदं ॥ अनुगतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लमे वृद्धः॥ विरचितेति॥ विरचिता विहिता चाटुवचनस्य रचना संदर्भो येन तादृशं॥ तव चरणे रचितः प्रणिपातः
प्रणामो येन तादृशं॥ तर्हि संप्रति किं कर्त्तव्यमित्यत आह॥ संप्रतीत्यादि॥ संप्रत्यधुना मंजुलो मनोहरो यो वंजुल
वेतसस्तस्य सीमनि पर्यंते यत् केलिशयनं क्रीडाशय्या तामनुलक्ष्य सयातं। गतं त्वां तव रस्य अनुरतीक्षत इत्यर्थः।१
तां प्रोत्साहयंती सखीप्याह। घनेति। हे राधिके उपेहि तल्पमुपगच्छ मुखरितः शब्दायमानः कृतो मणिमंजीरो
नूपुरो यत्र गमनेन यथा स्यात्। दरे ईषत् साधु सुन्दरं मंथरः चरणविहारः पदविन्यासो यत्र एवं यथा स्यात्॥ त
त्र हेत्वंतरगर्भविशेषणमाह॥ घनेति घनयोर्नितंबयोः जघनस्तनयोः भरेण भारेण गतिः गमनं यस्यास्तादृशी॥ म
रालानां हंसानां स्वकीयमंथरगमनेन मंजीरादिशब्देन च निकारं तिरस्कारं विधेहि कुरु॥ संप्रति मराके
षु शब्दायमानेषु सत्सु मंजीरादिध्वनिरपि मरालशब्दे नैव लोकैर्लक्ष्यते इति संप्रति योगप्राप्तिसाधन इति ध्व
निः॥ अथवा॥ संप्रति हंसः स्वशब्दाभावात्त्वत्पार्श्वे भव येत्यपि गमनं प्रति विलंबो न कार्य इत्यपि ध्वनितं। त
दुक्तं वसंतराजे काष्ठासु सर्वास्वपि दर्शनेन हंसस्य शब्देन तु सर्वसिद्धिरिति। मरालो राजहंसस्य्यान्मराको ७३
हंसपत्रके इति धरणिः॥ निकारः स्यात् समभिभवे धान्यस्यो... रणेपि चेति विश्वप्रकाशः॥२॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शृण्विस्मादि ॥ तरुणीजनानां मोहनं मोहजनकं मधुरिपोः [illegible] स्य रावं शब्दं तत्र गत्वा शृणु ॥ रमणीयतर
मतिशयेन रमणीयं पपिकनिकरे कोकिलसमूहे कुसुमशरासनशासनवंदिनि सति ॥ कुसुमान्येव शरासनं
धनुर्यस्य तादृशः कामस्तत्साशानस्य तदाज्ञापायावं यं दिनि स्तावके सति ॥ यद्वा ॥ कुसुमशरासनशासन

शृणु रमणीयतरं तरुणीजनमोहनमधुरिपुरावं ॥ कुसुमशरासनशासनवंदि
नि पिकनिकरे भजभावं ॥ ३ ॥ अनिलतरलकिशलयनिकरेण करेण लता नि
कुरंबं ॥ प्रेरणमिव करभोरु करोति गतिं प्रति मुंच विलंबं ॥ ४ ॥ ॥ छ ॥ छ ॥ छ ॥ छ ॥

वंदितुं नमस्कर्तुं शीलमस्य तेदृशो कामस्य [illegible] त्ता कीर्ति [illegible] सती सर्थः ॥ भावं कृष्णानुरागं भज आश्रय ॥ अत्रा
पि कनिकरा जकारेण कृष्णमधुराला [illegible] स्य परै दल स्यत यात दीयनिशंकाभाषिता न्यपि वंतत्र गता सखी
श्रोष्यसीति ध्वनितं ॥ अथवा ॥ पिकस्य मधुरस्वरो यात्रायां शकुनमित्यपि ध्वनितं । वंदिनः स्तुति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाळकुाह्समरः॥३॥अनिलेत्यादि॥केकरभोरुकरभः कनिष्ठाभो मणिबंधपर्यंतं करस्यबहिर्भागस्तद्वत्त्रि
म्रोन्नतेतुस्यस्याःसंबोधने॥गतिंप्रतिगमनंप्रतिविलंबंकालक्षेपंमुंच॥अनिलतरळकिशलयनिक
रेणकरेण॥अनिलेनवायुनातरळंचंचलायुःकिशलयनिकरोनवपल्लवसमूहस्तस्वरूपेणकरेण
लताभिर्कुरंबंलतासमूहस्तत्वप्रेरणमिवकरोतीति॥किशलकंपल्लवेनासमंजसमसहमानोलतास
मूहोपितांप्रेरयतीतिभावः॥अथवा॥अग्रेपल्लवान्वितवृक्षादिदर्शनंयात्रायांफलसिद्धिसूचकमितय
तोगमनंप्रतिविलंबोनकार्य्यइतिध्वनितं॥तदुक्तंशाकुनशास्त्रे।वामेमधुरवाक्यपक्षीवृक्षःपल्लवितो
ग्रतः॥अनुकूलोवहन्वायुःप्रयाणेशुभसूचकरः॥समूहेनिकुरंबंस्त्रियामित्यमरः॥मणिबंधा
दाकनिष्ठंकरस्यकरभोबहिरित्यमरः॥४॥७॥

७४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्फुरितमिसादि ॥ अमुं कुचकुंभं स्तनकलशं हे सखि सखीचीनं वा वदेस्पिशअंकुर ॥ कीदृशं ॥ स्फुरितं
काम्यंकुरसादिव अनंगतरंगवशादिव अनंगास्य नामस्य यत्तरंगभूमिस्तद्वशादिव ॥ अत्र अभंग
तरंगयुनेन तस्यारसतोगिमिव मास्सिप्यते ॥ अन्योपि नद्यांतरंगैः प्रेर्यमाणाह सकंपो भवति अयमपि

स्फुरितमनंगतरंगवशादिव सूचितहरिपरिरंभं ॥ हृदयमनोहरहारविमलजलधारममुं कुचकुंभं ॥५॥ अधिगतमखिलसखीभिरिदं तववपुरपि रतिरणसज्जं ॥ चंडिरसितरशनारवडिंडिममभिसरसरसमलज्जं ॥६॥ ॥७॥ ॥७॥ ॥७॥

तो कुचकुंभमस्थापि रसते रंगिण्या मनंगतरंगैः प्रेरणादिव सकंपमाह इति भा च ॥ इव शब्दोत्रोत्प्रेक्षाद्योतकः पु
नः ॥ कीदृशं कुचकुंभं ॥ मनोहरो यो हारः स एव विमलं निर्मलं जलधारा यत्र तादृशं ॥ अत्र स्तनोपरि
स्थितस्य हारस्य जलधारारूपणं ॥ स्तनस्य पूर्णकलशात्वेन रूपणमाक्षिप्यते ॥ पूर्णादेव कलशान्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तरंगैरांदोलने सति बहिर्डोलधारणिः सरण संभावात ॥ पुनः कीदृशां ॥ स्मृविलोहरेः हृत्कस्यपरिरंभ आलिं
गंनं येन तादृशां ॥ नारीणां स्तन कंपः प्रिय संगः सूचयतीति शाकुनिकाः स्त्रदुते ॥ मिसंनार्य स्तने वंपः प्रियसंगम सूच
क इति ॥ पूर्णकलशतेन रूपाणामपि यात्रायां पूर्णकलशदर्शनं शुभमिति सूचनाय ५ ॥ ननु सखीजने पु
पश्य सखु कथं मत्रागंतव्यमिति स्यत आह ॥ अधिगतमिसादि ॥ इदं तव वपुः सातिनिवि रतिश्रायेन शतिर एणाय सु
रत संग्रामाय सन्नां कृतालंकरणादिसंबंधिनां अधिगतं शातं ॥ तथा च ॥ सखीभिर्दृष्टमेवाधुना किं
विलंबनेति भावः ॥ यद्वा ॥ सखीभिरिदं तव वपुर्बहुधारतिरणे सक्षमधिगातं ॥ तथा च ॥ नासां कालक्षे
पि भावः ॥ जतोहे चंडि कोपेन रक्षितः श्लाघ्यमानः ॥ तो रशनावलिः क्षुद्रघंटिकातत्कलेवद्धिंडिमो वा घरि
शोषाय यथा स्यादेवं मनसिसरहस्संकेत भूमिमुपैहि ॥ अन्यत्रापि रणे डिंडिमस्ताड्यत एवेति ध्वनिः ॥ पुनः
कथं यथा स्यात् सरससलज्जं सरसः शृंगारः २ रसस्तेन सहितं लज्जासहितं यथा स्यात् एवं ॥ ६ ॥

७५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मरेत्यादि ॥ करेण सखीमवलंब्य सलीलं लीलासहितं यथा स्यादेवं वल्लगच्छ ॥ कीदृशेन करेण ॥ स्मरस्य का
मस्य ये शरास्तद्वत्सुभगः सुंदरः नखो यस्मिन् तादृशेन ॥ अन्यस्मिन्नपि रणे शस्त्राणि भवंति रतिरणे तु तत्र
नखा एव स्मरस्य शस्त्राणीति भावः ॥ अथ च ॥ वलयक्वणितैः कंकणशब्दैः हरिमपि निजगातिशीलं स्ववाय
गमनस्वरूपं च अवबोधयन्ती ॥ अन्यत्रापि समीचीना योद्धा प्रतिभटमवहितं स्वसैन्यं युध्यत इति ध्वनितं ॥

स्मरशरसुभगनखेन सखीमवलंब्य करेण सलीलं ॥ वलयक्वणितैरवबोधय
हरिमपि निजगतिशीलं ॥ ७ ॥ श्रीजयदेवभणितमधरीकृतहारमुदासितवामं ॥
हरिविनिहितमनसामधितिष्ठतु कंठतटीमविरामं ॥ ८ ॥ ॥२०॥२०॥२०॥२०॥

श्रीजयदेवेत्यादि ॥ इदं श्रीजयदेवेन भणितं हरिविनिहितमनसां हरौ विनिहितं तत्परं मनो येषां तादृशानां
अविरामं अनवरतं कंठतटीं अधितिष्ठतु ॥ कंठदेशे वसतिरित्यर्थः ॥ कीदृशं ॥ अधरीकृतः स्वगुणैः

हीनिः। कृतो हारो येन तादृशां। पुनः कीदृशां॥ उदासीनाः स्वगुणैः तिरस्कृता रामा येन तादृशां॥ ॥ यद्यपि
हारस्य रामानां कंठदेशे वक्षसि स्थितिः स्थिता तथा शोभायुद्दलं संपन्नवति तथापि। तयो रागिनामेव शो
भा प्रकटेनं न तु मुमुक्षूणां तत्रापि तासां गण एव न तु सर्वदा॥ श्रीजयदेव भणितं तु। कृष्ण कृपालेन सरसलेन
व सर्वेषां सर्वं वपुषि शोभा प्रदत्तमिति हारपक्षाया नायिकापक्षया चेद माधिक्यमिति भावः। कंठतटी
मित्यत्र अधिशीङ् स्थासां कर्मे घाधिकरणे द्वितीया॥ ~॥ १० ॥ ७ ॥ ७ ॥ ७ ॥ ७॥

७६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानींहरेरुत्कंठाधिक्यमाह॥ सेत्यादि॥ हे सखि सा राधा आगत्य॥ समांद्रक्ष्यति। इक्षिष्यते॥ दृष्ट्वापिमांस्मरकथां वक्ष्यतिकथइष्यति स्मरकथामुक्त्वापि॥ सा प्रत्यंगं प्रत्यवयवं मम मालिंगनैः प्रीतिं यास्यति प्रीतियुक्तापि मया हर्षं हारंस्यते। केलिं करिष्यति इति चिंताकुलः॥ सत्वां सुकृत्कः स्थिरतमः पुंजे स्थिरांधकारसमूहे कुंजे त्वां पश्यति ध्यानेन दृष्ट्वा॥ किं मियपुरुषं करिष्यति मधुसूदनेति निर्यामाध्यानेन वेपते कंपते। पुलकयति अंगानी सर्वाणि॥

सामांद्रक्ष्यतिवक्ष्यति स्मरकथांप्रत्यंगमालिंगनैः प्रीतिंयास्यतिरंस्यते सखिसमागत्येतिचिंताकुलः॥ सत्वांपश्यतिवेपते पुलकयत्यानंदति स्विद्यति प्रत्युद्गच्छतिमूर्छितास्थिरतमःपुंजेनिकुंजेप्रियः॥ १०॥ अक्ष्णोर्निक्षिपदंजनंश्रवणयोस्तापिंछगुछावलींमूर्ध्निश्यामसरोजदामकुचयोःकस्तूरिकापत्रकं॥ धूर्तानांमभिसारसत्वरहृदांविष्वङ्निकुंजेसखिध्वांतनीलनिचोलचारुसदृशीप्रत्यंगमालिंगति॥ ११॥

ध्यानेनैवत्वालिंगनंपरिकल्प्यसात्विकेन रोमांचयुक्तो भवतीसर्थः॥ पुनः ध्यानेनैवं तत्सुरतकेलिंपरिकल्प्यानंदति आनंदयुक्तो भवति। ततो ध्यानेनैवसुरतसुखं परिकल्प्य स्विद्यति। प्रस्वेदयुक्तो भवति। पश्चात्केलिं कृत्वा उत्थाय गंतुं प्रवृत्तायां त्वयि प्रत्युद्गच्छति। प्रत्युत्थानकरोति। पश्चाद्ध्यानादिं छित्वा

महत्त्वान्मूर्छितेति मूर्छां प्राप्नोति ॥६०॥ नवलंकारवनं विधायगंतव्यमित्यत आह ॥ अक्ष्णोरित्यादि अभिसार साह
सकृतां अभिसाररूपं स्याद्रसीं कुर्वन्नित्यभिसारसाहसकृतांस्तासां ॥ अत एव धूर्तानां शठानां सुदृशानां नाय
कानां ध्यानं नमं निकुंजे विषयवृ सर्वतः नर्मगप्रसवाय वं आलिंगति तदेव विशेषमाह ॥ अक्ष्णोरिति ॥ किं कुर्वती
नमः अक्ष्णोर्नयनयोरंजनं कज्जलं निक्षिपद्दर्पयत ॥ श्रवणयोः श्रोत्रयोः स्तापिच्छगुंजावलीतापिच्छस्यत
मालस्य गुच्छावलीं स्तबकपरंपरां निक्षिपत ॥ कुचयोः स्तनयोः कस्तूरिकापत्रकं मृगमदपत्ररचनां निक्षि
पत ॥ कीदृशी ध्यांतेः नीलनिचोलचारुनी नीलनिचोलवत् श्यामकंचुकवत् ॥ चारूपनोहरं ॥ तथा च ॥ नवा
भिसारयोग्याभरणानि तमेव धार्येति प्रतीतिर्यि ॥ क्लिंबनेति भावः ॥ अत्र स्त्रीणां मल्लंकारादि रचनाधिकारो
नपुंसकादीनामेवेति ॥ नपुंसकनिर्देशेन ध्वनितं ॥ कालस्कंधतमालस्यात्तापिच्छस्समरः ॥ स्याद्गुच्छ
स्तबके स्कंधे हाभेदकालयोरिति विश्वः ॥६१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच संप्रति मणिसुवर्णयोर्घाष्ट्रणां नोपादेयमित्याह ॥ काश्मीरेत्यादि ॥ काश्मीरवत् कुंकुमवद्गौरवं
वपुः शरीरं यासां तादृशीनां नायिकानां अभिसारपराणां नायिका नामभितउभयतो मणिमांडरीभिः म
णिपरंपराभिः रावद्धरेषमाबद्धरेषमाबद्धरेषा येन तादृशमेव तमालदलवत् तमं तमालदलवत् गमा

काश्मिरगौरवपुषामभिसारिकाना माबद्धरेषमभितो मणिमंडलीभिः ॥ एत त्तमालदलनी

नि॰क्र

लतमं तमिस्रं तत्प्रेमहेमनिकषोपलतां तनोति ॥ ६४ ॥ हारावलीतरलकांचनकांचिदाममं
जीरकंकणमणिद्युतिदीपितस्य ॥ द्वारे निकुंजनिलयस्य हरिं निरीक्ष्य व्रीडावतीमयि सखी
निजगाद राधा ॥ ६५
लपल्लववदतिशयेन नीलं तमिस्रं अंधकारं तत्प्रेम हेमनिकषोपलतां तासां अ
भिसारकामां यत्प्रेम तदेव हेम सुवर्णं तस्य निकषोपलतां कषपाषाणतां तनोति विस्तारयति
संकेतभूमिं व्रजंति । नामभिसारिकानां ताटंककंकणमंजीरादि रचितमणिदीप्ति उभयपार्श्वे रेखे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेसतिरेषाकारं तयावलक्ष्यमाणाभतिगौरतरंगकांतिरंधकाररूपकपट्टिकायांतेयेमसुवर्णरेखेव भाती
तिभावः॥अथवा॥ताहश्यापिगाढांधकारे कांतारेसर्वमुपेक्ष्य गंजाणिसारप्रस्थानेनप्रेमःशुद्धिः परीक्ष्य
इतिध्वनिः॥णाणाणाप्रस्तरयावोसल्लदमानः शिक्षादयादित्यहारावकीसादि॥अथअथानंतरं इयंदूती
सखीराधांइतिनिःनगादवक्ष्यमाणंउवाच॥कीदृशींसखीं॥निकुंजनिलयस्यनिकुंजएवनिलयोनिभृत
गृहंतस्यद्वारेहरिंनिरीक्ष्यदृष्ट्वाव्रीडावतींलज्जावती॥एतस्मेकतिननिष्ठुराणिवचांसिमयोक्तानिसं
प्रतिकथंतत्समक्षयामीतिलज्जायुक्ता॥कीदृश्यानिकुंजनिलयस्य॥हारावल्याहारपंक्त्यातरलो
हारमध्यमणिःकांचनकांचिदामसुवर्णखचितनमेखलादाममंजीरोनूपुरःकंकणंकरभूषणंए
तेषुखचिताएमणयस्तेषांघुसाकांसाह्वीपितस्यप्रकाशितस्य॥तरलश्चकंचेतिपिंगोहारश्रमरूपभाण॥
पीतिविश्वप्रकाशः॥८३॥ ॥ ॥८७॥ ॥८७॥ ॥८७॥ ॥८७॥ ॥८७॥ ७०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेव गीतेनाह ॥ मंजुतरेत्यादि। गीतस्यास्य वराडीरागो। मठतालश्च। गीतार्थस्तु ॥ हे राधे माधवसमीपं लक्ष्मां
तिक देशे प्रविश ॥ इह मंजुतरकुंजतलकेलिसदने मंजुतरं यत्कुंजतरुनिकुंजाभ्यंतरदेशस्तदेव यत्के
लिसदनं लीलागृहं तत्र विलस विलासं कुरु। हं कीदृशी ॥ रतिरभसेन सुरतोत्साहेन हसितं हास्ययुक्तं वद

वराडीरागो ॥ मठताले ॥ मंजुतरकुंजतलकेलिसदने ॥ प्रविश राधे माधवसमीपमिह विलस
रतिरभसहसितवदने ॥ १ ॥ ध्रुवपदं ॥ नवभवदशोकदलशयनसारे ॥ प्रविश राधे मा
माधवसमीपमिह विलस कुचकलशतरलहारे ॥ २ ॥ कुसुमचयरचितशुचिवासगेहे ॥
प्रविश राधे माधवसमीपमिह विलस कुसुमसुकुमारदेहे ॥ ३ ॥

नं मुखं यस्यास्तादृशी ॥ प्रविश राधे माधवसमीपमिह विलसेसेतत ॥ ध्रुवपदं ॥ प्रतिपदं वर्तमानत्वा
त् ॥ यद्वा ॥ इह माधवे विलस। कीदृशे माधवे केलिवासे। मंजुतरकुंजतलकेलिसदनं यस्य तादृशे ॥ पुनः
कीदृशे ॥ रतिरभसेन हसितं वदनं यस्य तादृशे ॥ १ ॥ ध्रुवपदं ॥ कीदृशे केलिसदने। नवं नूतनं। अथ वल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत् शोभायमानं यस्शोकदलं ॥ अशोकपत्रं पस्थत छयनं शाय्यां तदेव सारो महाधनं यत्र तादृशे ॥ सं
कीदृशी ॥ कुचकलशयोः स्तनकुंभयोस्तरलश्चंचलो हारो यस्यास्तादृशि । अपरस्मिन्नपि गृहे महाधने
तीष्ठतीति ध्वनिः ॥ यद्वा ॥ नवकुलसदृशेपि राधे इत्यस्मैव विशेषणं । तदा नवकलसदृशो कदलनशयनमेव सा
रे यस्यास्तादृशी ॥ यद्वा ॥ वराडीरागे ॥ इह माधवविलसम । कीदृशे माधवे । नवकसदृशोपदलनशायनमेव
सारो यस्य । तादृशे ॥ २ ॥ कुसुमचये सादि । हे राधे इह कुसुमचयेन पुष्पसमूहेन रचितं विरचितं मय
च शुचि । अनुपहतांनापिकोतारे । नानुपशुनं यद्वा गेहे लीलागृहं तत्र किलस । यद्वा ॥ कुसुमचयन रचितं
अर्थात् कुसुमनिर्मितं शुचि वासगेहं यस्यास्तादृशीति राधेइत्यस्यैव विशेषणं । पुनः कीदृशी त्वं । कुसुमवत्
सुकुमारः कोमलो देह यस्यास्तादृशि ॥ यद्वा ॥ इह माधवे विलस । कीदृशे माधवे । कुसुमचयेन रचित
शुचि वासगेहं । येन तादृशे । पुनः कीदृशे । माधवे । कुसुमवत्सुकुमारो देहो यस्य स्तादृशे । शुचि शुद्धेनु ७९
पहत इति रिश्वः ॥ ७ ॥

चलेत्यादि ॥ हे राधे माधवसमीपं चल व्रज ॥ इह केलिसदने प्रविश विलसच ॥ कीदृशे केलिसदने ॥ मलयसंबंधो
यः पवनो वायुस्तेन सुरभीषीतेव ॥ यद्वा ॥ चलेत्यपि पवनस्यैव विशेषणं ॥ तथा च ॥ चलश्चंचलो यो मलयपव
नस्तेन सुरभौ शीते च इत्यर्थः ॥ चलमन्मनरई पद्मां वल्भमुक्तं ॥ त्वं कीदृशि । रतिवलितललितगीते ॥ रतौ वलि
तमनोहरे ललितगीतं लतिकेसंहावविशेषगीतं वयस्यास्ताहृशि ॥ यद्वा ॥ उह कुंडविलास ॥ कीदृशे छले ॥ र

चलमलयपवनसुरभिशीते ॥ प्रविश राधे माधवसमीपमिह विलस रतिवलितललितगी
ते ॥ ४ ॥ विततबहुवल्लिनवपल्लवघने ॥ प्रविश राधे माधवसमीपमिह विलस चिरमलसपीनज
घने ॥ ५ ॥ मधुमुदितमधुपकुलकलितरावे ॥ प्रविश राधे माधवसमीपमिह विलस मदनरससरभसभा

ति वलितं संयुक्तं ॥ ललितगीतं यस्य हे वशे ॥ कवितसरसवलितकलितेति पाठः ॥ ललितलक्षणं तु नाना
विधमनाहार्यस्वभावजमनोहरं ॥ शृंगारवेष्टितश्रीस्त्रीणां ललितं संप्रवक्षत इति ॥ ६ ॥ विततेत्यादि । हे
राधे माधवसमीपं प्रविश ॥ केलिसदने चिरं विलसच ॥ कीदृशे केलिसदने विततेविस्तीर्णैः बहुभिर्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छीनां त्वतानां नवेपल्लवत्तल्पे सांद्रे ।तं कीदृशी अलसपीनजघने अलसमंथरे पीनमांसलजघने यस्यास्तादृशि ॥
मधुमुदिते सति ॥ कीदृशे केलिसदने ॥ मधुनापुष्परसेन योरभसस्तेनोपलक्षितो भावो यस्य तादृशः सर्थः
यद्यपि मधुपेस्सनेनैव मधुपानकर्त्तृत्वं ॥ कीदृशे केलिसदने ॥ मधुना पुष्परसेन मुदितान्यानंदितानि यानि
मधुपवृंदानि भ्रमरसमूहास्तैः कूजितो विहितो रावः शब्दो यस्य तादृशे । तं कीदृशि । मदनरसरभसभावेम
दनस्य कामस्य यो रसः शृंगार ॥ स्वकृतया रभसउत्साहस्तेन अलक्षितो भावो यस्यास्तादृशि ॥ यद्वा पिहे राधे
इह विलस ॥ कीदृशे माधवे ॥ मदनरसेनयो रभसस्तेनोपलक्षितो भावो यस्य तादृशोस्त्वर्थः ॥ यद्यपिम
धुपेस्तेनैव मधुपानकर्त्तृत्वं प्राप्तं तथापि तदानीं मधुपान प्राप्तय मधुमुदिते त्सपातं ॥ ८ ॥ ॥७५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मधुतरेति॥ कीदृशे केलिसदने॥ मधुतरोऽतिशयेन मधुरो यः पिकनिकराणां पिकसमूहानां यो निनदः शब्दस्तेन मुखरे वा
चाले॥ यद्वा॥ एतदपि राधे इत्यस्यैव विशेषणं। तदा मधुरतरः पिकनिकराणामिव यो निनदः सुरते कंठकूजितं तेन मुख
रेत्यमिसर्थः। पुनः कीदृशीं। दशनरुचिरे दशनकांतिरेव रुचिरं शिखरं माणिक्यविशेषो यस्याः सा तादृशि। दशन

मधुरतरपिकनिकरनिनदमुखरे॥ प्रविश राधे माधवसमीपमिह विलसदशनरुचिरशिखरे॥
७॥ विहितपद्मावतीसुखसमाजे॥ प्रविश राधे माधवसमीपमिह विलस भणति जयदेवकविरा
जराजे॥ ॥ तां चित्तेन चिरं वहन्नयमतिश्रांतो भृशं तापितः कंदर्पेण तु पातुमिच्छति सुधा सं
बाधबिंबाधरं॥ अस्यांकमलंकुरु क्षणमिह भ्रूक्षेपलक्ष्मीलवक्रीते दास इवोपसेवितपदांभोजे
कुतः संभ्रमः॥ सा ससाध्वससानंदं गोविंदे लोललोचना॥ सिंजानामंजुमंजीरं प्रविवेश निवेशनं॥

रुचिरवत्॥ रुचिरं शिखरं माणिक्यविशेषो यस्याः सा तादृशि। यद्वा। इह माधवे विलस कीदृशे माधवे। दशनरुचिर
शिखरे। दशनरुचीनां च द्विविधः स्फारगाने प्रसीदत्स्य शिखरस्योपमेयतयाविपर्ययासोऽपमा बोध्य। तदुक्त
दंडिना। त्वदाननमिवोन्निद्रमरविंदमभूदिति। सा प्रसिद्धविपर्ययासोपमेत्युच्यते। एकदाडिमबीजानां मौक्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म्पशिखरं विदुरिति विश्वः ॥ ७ ॥ विहितेत्यादि हे मुरारे त्वं जय यद्देवकविराजराजे जयदेवे यः कवीनां राजराजः सार्वभौमः ।
तत्र मंगलशतानि कल्याणशतानि कुरु ॥ कीदृशे। भणितिविभवगुणान् वहति। पुनः कीदृशे विहितः प्रणतेः पद्मावत्याः सु
पद्मावत्याः सुखसमाजः सुखसमूहो येन तादृशे। एतेन स्वस्मिन्नमस्कारकथनेन नपरस्मिन्नेव मुख्यध्वनितं। राजराजः कुबेरे
सार्वभौमे सुधाकरे। इति विश्वः ॥ ८ ॥ २१ ॥ कस्योत्कण्ठाधिक्यमाह। त्वामित्यादि ॥ ॥ अयं हलकस्त्वां विनैव मनसा
वहति ॥ अतिश्रान्तोऽपि शयनश्रमपुलकोऽसौ ततः। वां दर्पणं कामेन भशामतिशयेन तापितः। अतिसूक्ष्मचित्ते पीनस्तन
जघनवसान्तराधेन नश्रमोऽसुत एव ॥ अन्योऽपि पीयो गुरुतरभारे वहनं करोति तस्यापनी श्रमो भवतीति भावः॥ अस्
मत्त स्वस्तुधामृतेन सबाधं संकटं विबाधं विबाधं कुलसहशाम धारमोदृष्टपातुमिच्छति। न तस्माद्देवो स्तस्य हलकस्यांके
क्रोडे स्थानं त्वमकं कुरु भव य। न न्वयमपि सकुशपराधो तस्तद कथं दूरे तो विभेमीमत आह। क्षिपेति इह हलकेतु
कस्माद्धेतोरसौ भ्रमः भयं वीदृशो। सेवितं हरिपदांभोजे तद्विधयतरं पादकमलं येन तादृशो अत एव दासजनोऽपि
। तत्र हेतु गर्भविशेषणमाह ॥ भ्रूक्षेपेति। भ्रूक्षेपस्य भ्रूवालनस्य या लक्ष्मीः संपत्। तस्याः पोलबोले शास्त्रेन कांते
संकटे नातु सबाधये स्मरः ॥ लवल्ले शाकपाणवस्तिवा। ध्वा। सेत्यादि। सा राधा निकृतनं लीलागहं प्रविवेश प्र
विष्टवती कुर्वती। मंजुमनोहरो योऽसौ मंजीरो नूपुरस्तसिंजा भासितर्ध्वं कुर्वती ॥ कथं यथा स्यात् ससाध्वसं सहि
तं सानंदमानंदसहितं च यथा स्यादित्यर्थः। कीदृशी सा। गोविंदे लोले सौधसेवलोचनेयस्याः सा ॥ ८९ ॥ ॥ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राधावदने त्यादि ॥ गीतस्यास्य वराडीरागो तालश्च रूपकः ॥ गीतार्थस्तु ॥ सा राधा हरिं हस्तं ददर्श दृष्टवती
॥ कीदृशं ॥ एकरसं एको मुख्यः शृंगाराख्यो रसो एकरसतं ॥ यद्वा ॥ एकस्तुल्यो रसो एकरसं यस्यतं ॥ राधा यथा यादृ
शः शृंगाररसः तस्यापि तादृश एवेति भावः ॥ पुनः कीदृशं ॥ चिरं बहुकालं व्याप्य अभिलषितो वांछितो विला

वराडीरागे रूपकताले ॥ राधावदनविलोकनविकसितविविधविकारविभंगं ॥ जलनिधिमिव
विधुमंडलदर्शनतरलिततुंगतरंगं ॥१॥ हरिमेकरसं चिरमभिलषितविलासं ॥ सा ददर्श गुरु
हर्षवशंवदवदनमनंगनिवासं ॥ ध्रुवपदं ॥ हारममलतरतारमुरसि दधतं परिरभ्य विदूरं ॥
स्फुटतरफेनकदंबकरंबितमिव यमुनाजलपूरं ॥२॥ ॥७॥ ॥७॥ ॥७॥

सा केलिर्येन तं ॥ पुनः कीदृशं ॥ गुरुर्महान् यो हर्ष आनंदस्तस्य वशंवदमापन्नं वदनं यस्य तं ॥ पुनः कीदृशं ॥
अनंगनिवासं कामसदृशं ॥ क्वचिदनंगविकाशमिति पाठः ॥ तदा तु ॥ अनंगस्य विकाशः स्फूर्तिर्यस्य तं
ध्रुवपदं ॥ राधेत्यादि ॥ पुनः कीदृशं हरिं ॥ राधाया यद्वदनं मुखं तस्य विलोकनेन वीक्षणेन विका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिताःश्चकलिताविविधानानाविधा विभ्रमा जं भणगया ग क्षेपणा करविमर्शादिरूपा स्त एव विभंगा वीचीरूपो-
मेयोयेनतं ॥ १ ॥ कमिव ॥ जलनिधिमिव समुद्रमिव । कीदृशं जलनिधिं । विधुमंडलस्य चंद्रमंडलस्य दर्शने-
नतरलितधृष्टं बलीकृता लाः । अत्र उत्तरांगा उर्मयो यस्य तादृशं । अत्र राधा शृंगाररसाश्रयेत्वेन कृष्ण-
स्य जलनिधिसाम्यं । राधामुखस्य लावण्यादिना चंद्रसाम्यं ॥ जेष्ठ्यादिरूपांगविकारस्यो-
तरोत्तरतया तरंगसाम्यं । बोध्यं ॥ भंगस्तरंग उत्तुंग भंगोऽलय विपर्ययो इति विश्वः ॥ १ ॥ विविधविकारा-
नेवाह ॥ हरिरिसादि । कीदृशं कृष्णं । विदूरमतिशयेन परिरंभालिंगनं वक्षसि हृदये धवं विभ्राणं । कीदृशं ।
अमलतरो अतिशयेन विमलस्तारः मौक्तिकं यत्र तादृशं ॥ कमिव ॥ स्फुरत प्रकटतरो यो फेनस्तदंबफेन समूह-
स्तेन करंबितं मिश्रितं यमुनाजलमिव कालिंदीप्रवाहमिव । अत्र कृष्णशरीरस्य श्यामलत्वेन यमुना-
प्रवाहसाम्यं । हारस्यातिशुभ्रतया फेनसमूहसाम्यं बोध्यं । अत्र हारालिंगनेन स्वाभिलाषप्रकटन-
मोऽनविनाख्यो भावो वर्णितः । तदुक्तं रसार्णवसुधाकरे ॥ स्वाभिलाषप्रकटनं मोदायितमितीरितं ॥ मि-
श्रितं तु करंबितं रामितिधरणिः । तारो मुक्तादिसंशुद्धौ करणे शुद्धमौक्तिके ॥ तारं वरजतं पुंस्यपरस्यप्ल- ८२
व । हीरितर इति विश्वः । हारो जलप्रवाहस्यादिसांपि ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनः कीदृशं॥ श्यामलं नीलं मृदुलं कोमलं कलेवरमंडलं शरीरमंडलं यस्य तादृशं॥ पुनः कीदृशं॥ अधिगतं अधिकं परिधेयत्वेन ज्ञातं गौरं पीतं दुकूलपट्टवस्त्रं येन कं कमिव॥ नीलनलिनमिव श्यामकमलमिव॥ कीदृशं नीलनलिनं पीतोयः परागः पुष्परेणुस्तस्य पटलं समूहस्तस्य यो भरोऽतिशयस्तेन वलितं वेष्टितं मूलं यस्य तादृशं॥ ३ अत्र लक्ष्मस्य स्निग्धश्यामतया नीलोत्पलसाम्यं। पीतपट्टांबरस्य च॥ मूलस्य

श्यामलमृदुलकलेवरमंडलमधिगतगौरदुकूलं॥ नीलनलिनमिव पीतपरागपटलभरवलयितमूलं॥३॥ तरलतदृंचलचलनमनोहरवदनजनितरतिरागं॥ स्फुटकमलोदरखेलितखंजनयुगमिव शरदि तडागं॥४॥ वदनकमलपरिशीलनमीलितमिहिरसमकुंडलशोभं॥ स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभं

पीतपरागसाम्यं॥ अथ कलेवरं गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः इत्यमरः॥ पुनः कीदृशं। तरलायोहगं चल चलात् स तस्य चलनेन मनोहरं सुंदरं यद्वदनं तेन जनितस्त्वत्पादितो रतिरागो राधायाः सुरते येन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तादृशं॥ कमिव॥ शरदि शरत्काले॥ स्फुटकमलोदरे विकसितपद्मगर्भे खेलितं क्रीडितं खंजनयुगं खंजरीट
युगलं यत्र तादृशं॥ कमिव॥ शरदि शरत्काले स्फुटकमलोदरे तडागमिव॥ अत्र उत्फुल्लस्य राधादर्शनात्
संफुल्लितानां यन्नेत्रेन शरत्कालीन तडागसाम्यं स्मेरत्वसुखे च विकसितकमलसाम्यं। तारकाया मिलत्को
पे तत्वेन परितः शुभ्रत्वेनाति चंचलत्वेन च नेत्रयोः खंजरीटसाम्यं। शरत्काले जलाश्रयस्य कमलगर्भ
से खेलता खंजनो दृष्टः स्तनयथाऽनु वांछितं प्रयच्छतां चंचल्लपांगत्व उत्फुल्ल दर्शनां राधाया वांछितं कृष्णि
सुखं। कस्यतीति शरत्कालीनं कमलमध्यस्य खंजनोपमानेन ध्वनितं। तदुक्तं। गाहसंहितां। हेमसमीपसीतां
बरकमलोत्संगपूजितोपल धेनुदधिपात्रधान्यकूटे दृष्टोऽतीष्टानि वक्ष्यते विहंग इति। खंजरीट खंजन
नरसमरः। तडागस्तु जलधारविशेष इति विश्वः॥४॥ पुनः कीदृशी कृष्णे॥ वदनकमलस्य मुखपद्मस्य परि
शीलनाय प्रकाशनाय मिलितो या मिहितौ स्तनौ ताभ्यां शोभिता कान्तिर्यस्या तां॥ अत्र कुंडलयोः नाम
लि खचितत्वेन स्तनोपमा बोध्या॥ अद्भुतोपमा वेयं। कीर्तनेनार्कमार्तंडमिहरा पूषणा इत्यमरः॥ पुनः
कीदृशं॥ स्मितस्यापधासस्य यारुचिः कान्तिः तया रुचिरा मनोहरा सा च सा मुग्धसिता राधाधरपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शशिकिरणेसादि ॥ पुनः कीदृशं शशिकिरणैश्चंद्रकिरणैः छुरितं सबद्धमुदरमभ्यंतरं यस्य तादृशो योऽ
ळधरो मेघस्तद्वत्सुंदरः सुकुमारः कुसुमं पुष्पं तत्सहिताः केशा यस्य तं ॥ अत्र केशानां श्यामतया जळधर
साम्यं तत्र स्थित कुसुमानामिधांतश्चारिचंद्रकिरणसाम्यं ॥ पुनः कीदृशं तिमिरं धकारे उदितं प्रकटीभूतं

शशिकिरणछुरितोदरजलधरसुंदरकुसुमसुकेशं तिमिरोदितविधुमंडळनिर्मळमलय
जतिलकनिवेशं ॥ ६ ॥ विपुलपुलकभरदंतुरितं रतिकेलिकलाभिरधीरं ॥ मणिगणकिरणस
मूलसमुज्वळभूषणसुभगशरीरं ॥ ७ ॥ श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारं ॥
प्रणामतहृदि विनिधाय हरिं सुचिरं सुकृतोदयसारं ॥ ८ ॥

यच्चंद्रमंडळं चंद्रबिंब तद्वन्निर्मलस्य मलयजतिलकस्य निवेशो विन्यासो यस्य तादृशं तिलकं ॥ अत्र स्यं कृष्ण
स्य गाढांधकारसाम्यं ललाटस्य मंडलाकृति तिलकस्य पूर्णचंद्रसाम्यं बोध्यं । पूर्णचंद्रबिंबस्थितिकाळे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिमिरस्यातिमिरस्या संभवादमृतोयमाबोध्या ॥६॥ पुनः कीदृशं विपुलो यः पुलको रोमांचातिशय
स्तेन तं दंतुरितं व्याप्तं ॥ पुनः कीदृशं ॥ मणिगणानां मणिसमूहानां किरणसमूहेन समुज्वलानि
यानि भूषणानि मुकुटांगदमंजीरादीनि तैः सुभगशरीरं यस्य तं ॥ निम्नोन्नतं तथा व्याप्तं तं दंतुरवथ्यते
बुधैरिति धराणिः ॥७॥ श्रीजयदेवेत्यादि ॥ हे जना हरिं प्रणमत ॥ किं कृत्वा सुचिरं बहुकालं यावत्
हृदि चित्ते विनिधाय कीदृशं सुकृतोदय एव साराधनं यस्मात्तं ॥ श्रीजयदेव भणित विभवे द्विगुणीकृ
तो भूषणभारालंकरणसमूहो येन तं ॥ जयदेवसरस्वती स्वयमेवोपमा सेव्याय त्वं चारवती भग
वद्भणितविभवे कृतो रत्नवर्णनीयैः स्वतरालंकृतेति भावः ॥८॥२२॥ ८४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मञ्जंसाइत्यादि॥ तस्मिन्काले तल्पांतं शय्यैकदेशं मञ्जंसाआश्रयं सा मृगदृशोहरिणनयनायाराधायाः लज्जापिसलज्जेव सव्रीडेव मूला दूरमति ध्यायेनच्यगमत्॥ विगता ध्वसति अवहिताल्पिपरिजने अवीहतः कृतावधानोयः आलीपरिजनः सखीपरिजनस्तस्मिन् कपटकंड ति यथास्यात्॥ कृताकपटेन

मञ्जंसा रतल्पांतं कृतकपटकंडीतिविहितंस्मितं जातेगेहाद्बहिर्न वहि तालीपरिजने॥ प्रियास्यं पश्यत्या; स्मरशरसमाकूतसुभगं॥ सलज्जा लज्जापि च्यगमदिव दूरं मृगदृशः॥८८॥ ॥इति गीतगोविंदे ११ सर्गः॥

व्याजेन कंडतिः कर्णादिकंडूयनं यत्र एवं यथास्यात्॥ चित्तस्मितं विहितेषद्धास्यं यथास्यात्॥ कीदृश्याः स्तस्याः प्रियास्यं प्रियस्य कृष्णस्यास्यं मुखं पश्यंसाः॥ कीदृशं स्मरसस्तां स्मरेण कामेन सरसंस्म

गाररससहितं ॥ पुनः कीदृशं ॥ आकूतशुभगं ॥ आकूतेन मनोरथेन सुभगं मनोहरं ॥ ८८ ॥ नर्बोदोल
न कर्कशापि सुमतिर्याहा स्वभावंति वर्ष्यारेकरसोन्नयादि वुशलो माशंकरे वेवलं ॥ दिंशं मोरपरत्र
विश्वविजयादृष्टस्मरदेषितादेहा द्वी कृतकामिनि प्रणयिता च कापि देवांतरे ॥ ९१ ॥ ॥ इतिश्री म
हामहोपध्याय श्रीशंकरमिश्रविरचितां श्रीशालिनाथकारितां गीतगोविंदटीकायां रसमंजरीनाम
मध्येयायां एकादशः सर्गः ॥ ११ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

८५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गतवतीसादि ॥ हरिः प्रियां राधांउवाच ॥ धन्नति । सखीवृंदे सखीसमूहे गतवतिसति ॥ कीदृशीं राधां मंद
त्रयाभरनिर्भरस्मरपरवशाकूतस्फीतस्मितस्नपिताधरं । मंदः कूरोथ त्रयाभरणात्लज्जासमूहेन निर्भरोति
शयोयः स्मरः कामतत्सरवशास्तदापन्नोय आकूतोभिप्रायस्तेन स्नपितौ व्याप्तावधरौ यस्यास्तां ॥ पुनः की

भगवतिसखिवृंदे मंदत्रयाभरनिर्भरस्मरपरवशाकूतस्फीतस्मितस्नपिताधरं ॥ सरसमनसं दृ
ष्ट्वास्पृष्टां मुहुर्नवपल्लवप्रसवशयने निक्षिप्ताक्षीमुवाच हरिः प्रियां ॥ ८७ ॥ विभासरागे जतिताळे ॥
किशलयशयनतले कुरु कामिनि चरणनलिनविनिवेशं ॥ तव पदपल्लववैरिपराभवमिदम
नुभवतु सुवेशं ॥ १ ॥ क्षणमधुना नारायणमनुगतमनुभज राधिके ॥ ध्रुवपदं ॥ करकमलेन करो
मि चरणमहमागमितासि विदूरं ॥ क्षणमुपकुरु शयिनोपरि मामिव नूपुरमनुगतशूरम् ॥ २ ॥

दृशीं ॥ राधां मंदत्रपाभरनिर्भरस्मरपरवशाकूतस्फीतस्नपिताधरां । मंदः कूरोथ सरसं रसोनुरागस्तत्सहितं
मनो यस्यास्तां किंभूतां । नवपल्लवशरशीयनं नवकिसलयपुष्पमयशयने शयनीये निक्षिप्तां

श्रीनिहितनयनां ॥ विलोक्य दृष्ट्वा ॥ अत्र शय्याविलोकनेन संभोगेच्छाध्वन्यते ॥ ८७ ॥ किशलयेति ॥ वि भागरा
गे ॥ गीतार्थस्तु ॥ हे राधे क्षणमधुना अनुगतं नारायणं मनुसर ॥ ध्रुवपदं ॥ हे कामिनि किशलयशयनतले चर
णकमलं विनिवेशं पादपद्मार्पणं कुरु ॥ इदं भुवनमपि सम्यक्त्वयत्र रचनादिना सुष्ठु अलंकृतमिति । किशलयशय
नं तव पादपल्लव यो वयो वैरिशत्रुस्तस्मात् सकाशात् पराजयं अनुभवतु ॥ यद्वा ॥ इदं किशलयशयनं तव पादपल्लव एव यो
वैरिशत्रु पराभवं अनुभवतु ॥ कीदृशं तव पदपल्लवं वैरी ॥ तव पदपल्लवस्य वैरि विरोधीत्यर्थः ॥ १ ॥ करेत्यादि ॥ अ
हं कर कमलेन निजकरांबुजेन तव चरणं करोमि संवाहयितुमर्थात् ॥ यद्वा ॥ चरणमहमित्येकमेव पदं ॥ तथा च ॥
कर कमलेन तव चरणयोर्महं पूजां संवाहनादिरूपां करोमि । कथमित्याह । त्वं विदूरं अतिशयेन दूरं आगमिता
सि आनीतासि अर्थात् मया ॥ तथा च दूरगमनजन्यं ते श्रममपनयामि इति भावः । शयनोपरिशय्यायाउ
परि नूपुरानुपकुरु । नूपुरस्य परिधानेन महार्घता पादनमेवोपकारः । कीदृशं नूपुरं ॥ अनुगतिशरं ॥
अनुगतोतवानुसरेण शूरं । अपरोपि योऽनुगमाति शूरो भवति सउपक्रियत इत्युचितं भवति भावः ॥ क्षमि
व ॥ मामिवयया तवानुसारणशूरं मामालिंगादिना उपकरोति । तथा नुपूरमप्युपकुर्वीत्यर्थः ॥ २ ॥ ८५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वदनेसादि।हे प्रिये अनुकूलं उचितं वचनं रचय॥वदनेवसुधानिधिश्चंद्रस्तस्मात् गलितं च्युतं॥किमिव॥अमृतमिव।अंत
स्तल्लपएयवाक्यमवाप्यउरसिहृदये दुकूलं पटं वस्त्रं॥अपनयामि॥कीदृशं पयोधरयोरोधकं॥तिरोधायकं।तिरोधीकं।
वामिव।विरहमिव।यथा तद्विरहं मयापनीतं तस्तथा दुकूलमपनयामीत्यर्थः॥विरहपक्षे पयोधरोधकं स्तना श्लेषप्र

वदन सुधानिधिगलितममृतमिव रचय वचनमनुकूलं॥विरहमिवापनयामि पयोधररोधकमुरसि दु
कूलं॥३॥प्रियपरिरंभणरभसवलितमिव पुलकितमतिदुरवापं॥मदुरसि कुचकलशं विनिवेशय शोष
य मनसिजतापं॥४॥अधररसुधारसमुपनय भामिनि जीवय मृतमिव दासं॥त्वयि विनिहितमनसं विर
हानलदग्धवपुषमविलासं॥५॥शशिमुखि मुखरय मणिरशनागुणमनुगुणकंठनिनादं॥श्रुति
युगले पिकरुतविकले मम शमय चिरादवसादं॥६॥मामतिविफलरुषा विकलीकृतमवलोकित
मधुनेदं॥मीलति लज्जितमिव नयनं तव विरम विसृज रतिखेदं॥७॥

तिबंधकं॥३॥प्रियेति॥हे राधे मदुरसि मद्वक्षसि कुचकलशं।विनिवेशय अर्पय॥कीदृशं॥अतिदुरापं।अतिदुर्ल
भं।पुनः कीदृशं।पुलकितं रोमांचितं॥तत्र हेतुमुत्प्रेक्षयति।प्रियपरिरंभणात् आलिंगनेयो रभस उत्साहस्तेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वलितमिव युक्तमिव ॥ अपरोपि योहर्षयुक्तो । भवति तस्य रोमांचोपमवलेव ध्वनिः । तेनालिंगनेन मनसिज तापं ॥
शोषय नाशय ॥ ५ ॥ अधरेत्यादि ॥ हे पामिनि अधर सुधारस अधर संबंध्यमृतरससुपनय वितर ॥ दासं मा सदृशं
अनुगतं जीवय । कीदृशं मृतमिव ॥ अन्यो ऽपि मृतस्सुधापानेन जीवतीति ध्वनिः ॥ मृतत्वे हेतुभूतं विशेषणमाह ॥ त्वं
यीति । त्वयि विनिहित मनसि त्वय्यर्पितं चित्तं ॥ पुनः कीदृशं ॥ विरहानलेन त्वद्विरहरूपेणाग्निना दग्धं वपुर्य
स्यतं ॥ अत एव अविलासरहितं ॥ अन्योपि यो मृतो भवति स निश्चेष्टो दग्धदेहश्च भवतीति ध्वनिः ॥ मृतत्वे हे
तुभूतं ॥ शशिमुखीति । हे शशिमुखि चंद्रवदने मणिरशना गुणा मणियुक्तकांचीदाम मुखरय सशब्दं कुरु ॥
गमनेन हंसलीलाखर्वं विपरीत मालिङ्ख्यतिध्वनितं ॥ तल्लक्षणं बोधं प्राह ॥ कीदृशां मणिरशनागुणां । अनुगु
णकं निनादं ॥ अनुगुण सदृशः कंठनिनादः कंठशब्दो यस्य तादृशां रशनागुणानुकारि कंठशब्दं कुर्वि
त्यर्थः ॥ अनेन शब्देन मम श्रोत्रयुगके श्रोत्रयुग्मे विरादत्र सादं विरकालीनमुपतापं शमय नाशय । कीदृशे
पिकुरुतेन कोकिलशब्देन विकल्पदुःखिते ॥ मामीति । हे राधे मां मुंच लोकितुं तव नयनं मीलति मुद्रां प्राप्नो
ति ॥ किमिव लज्जितमिव । मां कीदृशं । अतिविफलरूपा अतिनिष्फलेन रोषेण विफलीकृतो नीतं । अधुनाऽ ७
इदानीं विरमनिः फल रोषादिसर्पात् । रतिखेदरतेः संभोगस्य खेद विसरज ॥ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीजयदेवेत्यादि ॥ इदं श्रीजयदेवभणितं श्रीजयदेवेन कल्पितं गीतं रसिकजनेषु मनोरमरतिरसभावविनोदं र
तिः संभोगः शृंगारः रसः भावः संचारि सात्विकादयस्तेषां मनोरमविनोदं कौतुकं जनयतु ॥ कीदृशं भणितं ॥ अ
नुपदं प्रतिपदं निगदितो मधुरिपोः कृष्णस्य मोद आनंदो यत्र तादृशं ॥ ४ ॥ प्रसूहर इत्यादि ॥ ॥ तयोः राधामाधवयोः

श्रीजयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदं ॥ जनयतु रसिकजनेषु मनोरमरतिरसभा
वविनोदं ॥ ८ ॥ प्रसूहरः पुलकांकुरेण निबिडाश्लेषे निमेषेण च क्रीडाकूतविलोकिते धरसुधापा
नेकथा नर्मभिः ॥ १ ॥ आनंदाधिगमेन मन्मथकथायुद्धे पियस्मिन्नभूद्‌द्भुतः सत्वयोर्वैभवलब्धवा
रंभः प्रियं भाउक ॥ ॥ धूलिदोर्भ्यां संयमितः पयोधरभरेणापीडितः पाणिजैः राविद्धो दशनैः क्षताधरपुटे
श्रोणीतटेनाहतः ॥ हस्तेनानमितः कचेऽधरमधुस्पंदेन संमोहितः कांतः काममपि तृप्तिमाप तद्दहो का
मस्यलोकोत्तरो ललितारंभो ललितमनोहरआरंभो यस्य तादृशः ॥ शृंगारक्रीडाविशेषरूढूतउढः प्रियं भाउकोबभू
वप्रियो वभूवस कस्मत आहे ॥ प्रसूहर इत्यादि ॥ यस्मिन् ललितरंभेनिबिडाश्लेषे कर्तव्ये पुलकांकुरेण रोमांचो
द्गमेन प्रसूहरो विघ्नो भूत ॥ अथवा ॥ क्रीडाकूतविलोकिते क्रीडासु यदाकूतपूर्वकमिलिप्राय पूर्वकं यद्विलोकितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रनिमेषपानेत्रस्पंदेनेन प्रसूहोऽभूत ॥ अथ च ॥ अधररसुधापाने अधरामृतपाने ॥ वर्त्तव्ये नर्मभिः रहःकथा
कौतुके प्रसूहोऽभूत ॥ अथ च ॥ मन्मथकथायुद्ध मन्मथस्य कथायां मन्मथयुद्धेषु रतेष आनंदाधिगमेन आनंद
प्राप्त्या प्रसहो ऽभूत ॥ ८० ॥ दोर्भ्यां पिसादि ॥ दोर्भ्यां बाहुल्यां अथोऽद्यया सय मितो बद्धः ॥ अथ च तये च पयोध
रभरेणास्तनभारेणापीडितः ॥ ८१ ॥ अथ च तया पाणिजेन खेन विद्धस्ताडितः ॥ अथ च तया दशनेदंतैः क्षताधरस्तु
टः क्षतो दष्ट अधरस्फुट यस्य स तादृशः ॥ ८२ ॥ अथ च तया श्रोणीतटेन नितंबमाहतआस्फालितः ॥ अथ च तया ह
स्तेनानमितः च वेकेशाधृत्वेयथाते ॥ ततो अधररसपदेनाधूरमधुनास्पंदेन संमोहितः ॥ एवं विशिष्टोऽपि कांतः का
मप्यनिर्वचनीयां तृप्तिमिवापप्रापत तथा होतारहोऽइस आश्चर्यं कामस्य कामापि द्विरूढागतिः ॥ यस्य प्रबंधनादिकं कि
यते सप्रीतिं न प्राप्नोति ॥ अयं तु तादृशोऽपि प्रतिमाय नंदिति कामस्य विरूद्धे वरीतिरितिभावः ॥ ८३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मारांकेइत्यादि॥मारांके मारस्य चिन्हे युद्धेयद्वा मारस्य मरणस्य अंके चिन्हे रतिकेळिसंकुळे रणारंभे रतिकेळि
भिश्चुंबनालिंगनाकृष्यानखबंधादिरूपाभिः संकुळे व्याप्ते रणारंभे कामयुद्धारंभे तया राधया साहसं बहुळं कांत
जयाय तदुपरि तस्य कांतस्योपरि किंचिद्विलोकोत्तरं प्रारंभि पुरुषायितं मारयुद्धं यत संग्रामात्म्यत्संवेगात् तस्यारा
मारांके रतिकेळिसंकुळे रणारंभे तया साहसप्रायं कांतजयाय किंचिदुपरि प्रारंभि यत्सत्यं मात्॥ निस्पं
दाजघनस्थली शिथिलता दोर्वल्लिरुत्कंपितोवक्षोमीलितमक्षिपौरुषरसः स्त्रीणां कुतः सिध्यति॥१०॥
तस्याः पाटलपाणिजांकितमुरो निद्राकषाये दृशौ निर्धौताधरशोणिमा विलुलिता स्रस्तस्रजो मूर्द्धजाः॥
कांचीदाम दरश्लथांचलमिति प्रातर्निखातैर्दृशोरेभिः कामशरैस्तदद्भुतमभूत्सत्युर्मनः कीलितं॥११॥
अथ कांतपरिश्रांतमपि मंडनवांछया॥ निजगाद माधवं मुग्धा राधा स्वाधीनभर्तृका॥१२॥१॥१॥
धिकायायत्ततदुपरि जघनस्थली निस्पंदानिश्चला जाता दोर्वल्लिर्बाहुलता शिथिला स्थली भूताः वक्षोहृदयमु
त्कंपितं॥ अक्षि मुद्रितं॥ ततः स्त्रीणां पौरुषरसः पाकमाभिलाषः कथं सिध्यति॥ अपितु न सिद्ध सेवेत्यर्थः॥ मा
रांमृतौ विषे नगइति विश्वः॥ समौ संवेगसंभ्रमाइ समरः॥१॥ तस्यादित्यादि॥ एतैः कामशरैः पक्षेदृशोः

चनयोः प्रातर्निर्यातैर्मनः कालितं विद्मि सद्भुतमाश्चर्यं ॥ अन्यत्र मिरवौ तैर्बाणैर न्यत्कीलितमित्याश्चर्य
मित्यर्थः ॥ वेः कामशरैत स्याराधायापादलेन श्वेतरक्तेन पाणिजेन नखेन मंकितमुरः निद्राकषायितेन दृशौ
लोचनेन च ॥ निर्धौताधररसोणिमा ॥ निर्द्धौतश्चुंबनादिना । स्नात्क्कतो धाधरस्य शोणिमा लौहित्यतत्सम्मूढ जाः
केशाश्च ॥ कीदृशा मूर्धजाः विलुलित स्रस्तस्रजः ॥ विलुलिताः केशाग्रहणपूर्वकचुंबनादि दानेन स्तना अत
एवस्रस्ताः शिथिलाः स्रजः पुष्पमाला येषु तादृशाः ॥ कांचीदाम वमे खप्पांस्रस्तंचदृस्थलयां चलथ्यंदामी
षत्स्लथं शिथिलमंचलं वस्त्रप्रांतश्च ॥ ७१ ॥ अथ स्वादि ॥ अथानंतरं राधा कांतं कल्पंमंडनवांछयानिजगाद ॥
कीदृशं कांतं ॥ परिश्रांतमपि सुरतखिन्नमपि चित्तं मपि ॥ कीदृशी राधा ॥ निर्गताबाधापीडायस्याः पुनः कीदृशी ॥ स्वा
धीनभर्तृका ॥ तल्लक्षणं चशृंगाररतिलके ॥ यस्यारतिगुणाकृष्टः पतिः पार्श्वं न मुंचति ॥ विचित्रविभ्रमासक्ता
क्ता स्वाधीनभर्तृका यथो ॥ ७१ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्देवगीतेन कथयति॥ कुर्विसादि॥ गीतस्यास्य रामकरी रागः॥ गीतार्थस्तु॥ सा राधा यदुनंदने निजगाद॥ उक्तवती॥
कीदृशे यदुनंदने॥ क्रीडति रममाणे॥ पुनः कीदृशे हृदयानंदकारके॥ ध्रुवपदं॥ किं निजगाद इत्याह॥ कुर्विति हे यदु
नंदन त्वं अत्रानुष्ठागरागे मम पयोधरे स्तने करेण मृगमदपत्रकं कस्तूरिकापत्रावलीं कुरु॥ कीदृशेन करेण

रामकरीरागेन गीयते॥ कुरु यदुनंदन चंदनशिशिरतरेण करेण पयोधरे॥ मृगमदपत्रकमत्र मनो
भवमंगलकलशसोहोदरे॥१॥ निजगाद सा यदुनंदने क्रीडति हृदयानंदने॥ ध्रुवपदं॥ अलिकुलसंवे
जनगंजनसंजनकं रतिसायकनायकमोचने॥ त्वदधरचुंबनलंबितकज्जलमुज्ज्वल प्रियलोचने॥२॥
श॥ नयनकुरंगतरंगविकाशविशकरश्रुतिमंडले॥ मनसिजपाशविलासधरे शुभवेशनिवेशय कुं

चंदनशिशिरतरेण॥ चंदनादपि शीतलतरेण॥ कीदृशे पयोधरे॥ मनोभवस्य कामस्य मंगलकलशो मांग
ल्यायस्थापितः॥ पूर्णकुंभस्तस्य सोहोदरे सदृशे॥१॥ अलिकुलेत्यादि॥ हे प्रियलोचने नेत्रे त्वदधराभ्यां यच्चुं
बनं तेन लंबितं गलितं यत्कज्जलं तदुज्ज्वलय पुनर्दीपय॥ नयनयोः कज्जलं पुनरर्पयेत्यर्थः॥ कीदृशे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९० लोचने ॥ रतिनायकस्य सायकान् कटाक्षरूपान् मुंचतीति रतिसायकनायकस्तस्मिन् ॥ कीदृशं कडुकं ॥
अलिकुलस्य षट्पदस्य मूढस्य खंजनानां यद्गंजनं तिरस्कारस्तस्य सज्जनकं विधायकं ॥ उज्ज्वलो दीप्तिश्शृं
गारविशदेषु विकाशशीलीति विश्वप्रकाशः ॥ नयनकुरंगे साहेतुभवेश शुभः शोभनो वेशोऽलंकारणं यस्य
तादृशः ॥ मम श्रुतिमंडले कर्णप्रदेशे कुंडले विनिवेशायभर्पय ॥ कीदृशे श्रुतिमंडले ॥ नयने एव यो
कुरंगौ मृगावतिवेगावल्गत्पोऽस्तरौ ॥ तयो विकाशः प्रसरणं तस्य निरासके निरासकारिणि नयनयो दै
र्घ्यविघातकारिणि ॥ अन्यथा कियद्दूरं नयनयो देर्घ्यं स्यादित्यर्थः ॥ पुनः कीदृशे शनि श्रुतिमंडले ॥ म
नसिजस्य कामस्य पः पाशो बंधनविशेषस्तस्य विलासधरे तल्लीलाभृतीति ॥ ३ ॥ १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्रमरप्रियाद्यादि ॥ मम संमुखे रुचिरं मनोहरं अलकं ॥ चूर्णकुंतलं परिकर्मेयमस्य ॥ कीदृशं अलकं ॥ नर्म्मजनकं ॥
कीदृशे मुखे विमले निर्म्मले ॥ पुनः कीदृशे ॥ जितकमले जितं तिरस्कृतं निजशोभया कमलं येन तादृशे ॥ कीदृशम् अलकं ॥ सुचिरं ॥ चिरात् उपरि मुखस्योपरि स्थात् भ्रमरवयं भ्रमरसमूहं रचयंतं स्वकीया भ्रमरभ्रमं जनयंतं

भ्रमरचयं रचयंतिमुपरि रुचिरं रुचिरं मम सन्मुखे ॥ जितकमले विमले परिकर्मय नर्म
जनकमलकं मुखे ॥ ४ ॥ मृगमदरसवलितं ललितं कुरु तिलकमलिके रजनीकरे ॥ वि
हितकलंककलंक मलामन विश्रमितश्रमशीकरे ॥ ५ ॥

मिसर्थः ॥ ५ ॥ हे कमलाननमुखपद्म अलिकरजनीकरे अलिकं ललाटमेव रजनीकरश्चंद्रस्तस्मिन् तिलकं
कुरु ॥ कीदृशं तिलकं मृगमदरसवलितं मृगमदरसेन कस्तूरीरसेन वलितं निर्मितं ॥ पुनः कीदृशं तिलकं ॥ मृ
गमदरसवलितं ॥ मृगमदरसेन कस्तूरीरसेन वलितं निर्मितं ॥ पुनः कीदृशं तिलकं ॥ विहितकलंक सफलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८१ छनस्य ॥ कलाशोभायनतादृशो ॥ अत्र कमळाननेति विशेषणेनाननरूपकम् अविरोधिन्यल्लवरू-
परजनीकरे मृगमदतिलकलक्षणेन कलंकवदाननमुचितमनेनेति ध्वनिः ॥ श्रीदृशोऽलिके ॥ विश्रमितो विश्रामं
प्रापितो यः श्रमस्तज्जनितः शीकराम्बुकणा यत्र तादृशो ॥ अत्र विश्रमितेत्यनेन व्यजनवातादिना
तनुभूतानां प्रस्वेदबिंदूनां अतिशीततया हिमकणात्वमाक्षिप्यते ॥ तेन वालिकस्य चंद्रत्व रूपणं
सांगानिर्वहतीति ध्वनितं ॥ ललाटमल्लिकं गोधिरिसमरः ॥ ८ ॥ ८१

[OrderDescription]
,CREATED=18.10.19 10:30
,TRANSFERRED=2019/10/18 at 10:55:15
,PAGES=183
,TYPE=STD
,NAME=S0002070
,Book Name=M-508-GITGOVINDAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection